
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

क. ६८

~~इदं सिद्धांतकौमुदी~~
इदं मनोरमा कविमंडनस्य

(2)

नोर०स्रु०

ॐ श्रीमन्महागणाधिपतये नमः॥ ॥ध्यायंध्यायंपरंब्रह्मस्मारंस्मारंगुरोर्गिरः॥सिद्धांतकौमुदीव्याख्यां
कुर्म्मःप्रौढमनोरमाम्॥१॥हयवरट्।हकारोपदेशः।अट्।अरहरइपरग्रहणेषुग्रहणार्थः।अर्हे
णअ-म्अवायेऽपीतिणत्वंच।देवाहसन्निभोभगोरितिरोर्यत्वंच।देवोहसतिहशिवेत्युत्वंच।लिलिहिद्वेलि
लिहिध्वेविभाषेटइतिवाढः।हल्।इदंसूत्रंवल्रल्हल्शल्षुहकारग्रहणार्थंच।रुदिहिस्वपिहि।रु ॥रा
दादिभ्यःसार्वधातुकेइतिवल्यादिलक्षणइट्।स्निहित्वास्नेहित्वारलोव्युपधादितिवाकित्वंच।अदाग्धां ॥
सलोसलीतिसलोपः।अलिक्षतशलइतिक्सः।हलंत्यम्।सूत्रेत्यमिति।हलिअन्त्यमितिविग्रहेसप्त
मीतियोगविभागात्सुप्सुपेतिवासमासइतिभावः।यद्वा०षष्ठीतत्पुरुषोऽयम्।स्यादेतत्।हलित्येकदेशस्ये
वतंत्रावृत्त्येकशेषाद्वातममस्तु।हस्यल्इतिव्याख्यास्यते।सामीप्यंषष्ठ्यर्थः।यद्वामास्तुतंत्रादि
भस्तुसमाहारद्वंद्वःहल्चवल्चेति।लकारस्यसंयोगांतस्यलोपइतिचेन्नैवं।आद्येसमासस्याक्लिष्ट

त्याद्या। न हि आम्रेडितस्थाकं बलइत्यादौ ब्राह्मणसमीपवर्ती अन्यदीयः कंबलः प्रतीयते। न वा चित्रगुश
ब्दात् चित्रगवीनां समीपवर्ती वृक्षादिः प्रतीयते। अतएव अनंतरादिषु न समासोऽनभिधानादिति स्पष्टमा
करे। किं बहुना। ब्राह्मणस्य कंबलः चित्रागावोऽस्येति व्यस्तप्रयोगोऽपि तत्रानिष्टः। द्वितीयेऽपि। संयोगांत
लोपो दुर्लभः यणः प्रतिषेधारंभात्। तत्र त्याख्यानपक्षेऽपि सलोसलीति हल्ग्रहणमपहाय संयोगांत
स्य सलोलोपविधानाच्च। किंच। पदार्थबोधं विना वाक्यार्थबोधासंभवेन हल्प्रत्याहारप्रसिद्धेः प्राकृ एतत्सू
त्रार्थबोधे प्रसक्ते तदुद्धाराधीयं यत्नः। अस्यां वा वस्थायां हल्शब्दार्थाप्रसिद्धौ द्वंद्व एव दुर्लभः सह वि
वक्षाया असंभवात्। तस्माद्यथोक्तमेव न्याय्यम्। मध्यगानामिति। आद्यंताभ्यामवयवाभ्यामवयवीसमु
दाय आक्षिप्यते। तस्य च युगपल्लक्ष्ये प्रयोगाभावात्तदवयवेष्ववतरंती संज्ञा मध्यमेषु विश्राम्यतिनत्वा
द्यंतयोः। संज्ञास्वरूपांतर्भावेण तयोः पारार्थ्यनिर्णयादिति भावः। स्वस्य चेति। स्वं रूपमित्यनुवृत्तेः स्वरू

3

ल्नो० रू० पंत्वादेरेव गृह्यते नान्यस्य। अन्येनेत्य प्रधाने तृतीयानिर्देशात्। सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वात्।
आद्योच्चारणमिति। यद्यप्युपदिश्यते। नेनेति करणल्युटस्त्याशास्त्रमुपदेशइति भाष्यवृत्त्यादिषु व्याख्या
तं तथापि तत्प्रौढिवादमात्रम्। करणे घञो दुर्लभत्वात्। ल्युटा बाधात्। न च घः असंज्ञात्वात्। प्रायेण संज्ञाया
मिति व्याख्यानस्य क्लिष्टत्वात्। नं ह्यं पायेरूपाधिर्भवतीत्यादिना भाष्यकृता अवहेलनाच्च। अत एव घाप ।।राम।
वादो हलश्चेति घञपि न भवति। बाहुलकं तु अगतिकगतिः। अत एव प्रक्रियायां तेशब्द्यामिरितिकरण ।।२।।
ल्युत्पत्तिरपि परास्ता। तथा च वार्तिकं च। अजब्भ्यां स्त्रीखलनाः स्त्रियाः खलनौ विप्रतिषेधेनेति। अतो भा
वएव प्रत्ययोन्याय्यइति भावः। यत्तु धातुसूत्रे स्यादिपठं तिघञ्चा व्याचक्षते करणल्युटस्त्याहर्वर्द्धिपातानाम्
मुपदेशत्वं कर्मल्युटस्त्यागमादीनां उणादि लिंगानुशासनयोरपि सूत्रत्वाभिसिद्धेः पृथगुपादानं
गोबलीवर्दन्यायेन। एवं गणत्वादेव सिद्धे धातोरपीत्यादि। तत्रेदं वक्तव्यं किमेषामुपदेशसंज्ञा उत

(5)

गताकारोऽप्याम्प्रत्ययो भवतीति मित्त्वं स्यादेवा२

योगमात्रं नाद्यः संज्ञायाः शास्त्रकारैरनुक्तेः असंज्ञात्वाद्यप्रत्ययो नेति भाष्योक्तेश्च अस्मदादि
कृतसंज्ञायाः शास्त्रव्यवस्थापकत्वे ऽतिप्रसंगाच्च आमोः मित्त्वमदन्तत्वादित्यादि स्वपरग्रंथविरो
धाच्च न ह्युपेस्त्र ष्टानुबंधस्यामो न प्रत्ययत्वं येन मित्त्वं न भवेत्। किंच प्रत्ययविधौ पंचम्याः प्रक
ल्पकत्वे सनः सनवादेशो ऽस्त्वित्याशंक्य उपदेशाभावादित्संज्ञा न स्यादिति भाष्यकैयटोक्तं
व्याकुप्येत किंच न धातुलोप इति सूत्रे धातुग्रहणं किम् लूञ् लविता पूञ् पविता इति भाष्यं उपदे
श एवानुबंधलोपेकृते ततो धातुसंज्ञेत्येवं परः कैयटग्रंथश्च विरुध्येत। अपिच। घुमास्थेति
तिसूत्रे लोपश्चेति द्विशाकारको निर्देशः द्वितीयः शाकार इदिति अलोन्त्यात्सूत्रस्य भाष्यकैयटा
दिकमपि विरुध्येत। न द्वितीयः योगस्यैव पुरस्कारपरिगणनस्य व्यर्थत्वात्। धात्वादिषु करणव्युत्प
त्तिः। आगमादिषु नेति वैषम्यस्य दुरुपपादानत्वाच्च। उपदेशेंता प्रयोजक धातुत्वादिरूपोपाध्यवच्छि
न्नसमुदायान्त्यं हलित्यर्थ इति स्वग्रंथविरोधाच्चापक्षद्वयेपि लिंगानुशासनस्य प्रकृतानुपयोगात्।
उपदेशतासंज्ञात्वावच्छेदको धर्मः धातुत्वादिरूप संज्ञित्वावच्छेदकः योगत्वे संज्ञात्वपुरस्कारे मूलाननुगुणः। २

० स० लोपश्चेति शकारस्यासंग्रहाच्च। आदेशउपदेशे उपदेशो वर्तत इत्यादावाद्योच्चारणस्यैवोपदेशपदार्थतायाः सर्वसं
मतत्वाच्चेति दिक्। उपदेशेऽजनुनासिक इत्। यद्यप्यत्रोपजीव्यत्वादनुनासिकसंज्ञा प्रथमं वक्तुमुचिता त
थापि नासिकामनुगत इति योगाश्रयणेनैव गतार्थत्वादनुनासिकसंज्ञासूत्रं मंदप्रयोजनमिति ध्वनयितुं नेहो
पन्यस्तम्। उपदेशे किम्। अभ आँ अपः। यद्यपीह उ अऊँ इत्यनेनैव विधानसामर्थ्यान्नेत्वमिति सुवचं तथाप्यु
त्तरार्थमवश्यं कर्तव्यमुपदेशग्रहणं स्पष्टप्रतिपत्तये इहैव कृतम्। अत्र किं। मनिनो मकारस्य मा भूत्। प्रतिज्ञा ॥राम॥
यत इति प्रतिज्ञा आतश्चोपसर्ग इति कर्मण्यङ्। प्रतिज्ञा आनुनासिक्यं एषामिति विग्रहः। एवं च प्रतिज्ञासम ॥३॥
धिगम्य प्रतिज्ञाशब्दस्य लक्षणेति क्लिष्टव्याख्यानं नाश्रयणीयं। पाणिन्युपज्ञं व्याकरणमित्यादिष्विव लक्ष
णां विनैव निर्वाहात्। यद्यपि सूत्रकारकृतोऽनुनासिकपाठ इदानीं परिभ्रष्टस्तथापि वृत्तिकारादिव्यवहारब
लेन यथाकार्यं प्राक् स्थित इत्यनुमीयत इति भावः। ननु रलयोरिति निर्देशेन टकारस्यापि मध्यगत्वादित्यत आह।
प्रत्याहारेष्विति। व्यवह्रियन्त इति। प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा येनेति बाहुलकादधिकरणे घञ्। यद्यपि

योगमात्रमकारादिसंज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः। प्रत्याहारार्थैकचत्वारिंशदिति प्रांचः चतुर्दशसू
त्रीस्थैर्ह्लिरिङ्क्तिः कृता अष्टाध्याय्यां व्यवहृता एकचत्वारिंशदिति तस्यार्थः। तेनसु इति ऊँ तादीनां र प्रत्याहारस्य
चयो द्वितीया इति वार्त्तिकस्थ रय प्रत्याहारस्य बाधिक्येऽप्यदोषः। यत्तु अमंताङ् इति यमिञमंतेषु निङ्क इष्यत इति
चत्र्म्रवार्त्तिककृता व्यवहृत इत्याऊस्तन्म सामिधानम्। आद्यस्योणादिसूत्रस्थत्वात् द्वितीयस्य व्याघ्रभूतिकारिका
स्थत्वादित्याहुस्तांतावत्। एषवसंख्यानियमो नातीवोपयुज्यत इत्युपेक्षितः। ऊकालोऽज्झ्रस्वदीर्घप्लुत इति समाहारद्वं
द्वः। सौत्रं पुंस्त्वं। वां काल इवेति फलितार्थकथनमिदम्। विग्रहस्तु वः कालोऽस्येति बोध्यः। ऊ शब्देन स्वोच्चारणकालो ल
क्ष्यते। आय इति। निपाता आद्युदात्ता इत्याकार उदात्तः। यद्वा फिट्स्वरेण। अवङ् इति। अकारोऽनुदात्तः। त
स्यादितः। अतंत्रमिति। उपेयिवानित्यत्र उपसर्ग इव अविवक्षितमित्यर्थः। ननु तत्र ईयिवांसमतिस्रिध इत्यादिप्रयो
गदर्शनादविवक्षाऽस्तु। इह तु अविवक्षायां प्रमाणं किमिति चेत्। लक्ष्यदर्शनं प्रातिशाख्यादिकं चेति गृहाण। त
थाहि। येऽरा इत्यत्र एकारः तन्न पाठे चीपतिमित्यत्र पदपाठे ऊदीतौ वाद्धदात्तौ इति सकलबह्वृचप्रसिद्धम्।

जात्यः स्वारित भेदः। स्वरितस्य हि सप्त भेदाः। तथा वोत्त असंहि. वत्. २

वभो ० स्क०

तत्र न पाठ्यवीपति शब्दयोरूमेव न स्यात्यादिषु युगपदितिपूर्वोत्तरपदयोराद्युदात्तत्वे कृते अनुदात्तं पदमेकवर्जमिति शेषनिघातः पूर्वपदभूतयोस्तत्र शचीपतयोरंत्यस्यपाक्षिकं स्वरितत्वं प्रातिशाख्ये उक्तम्। जात्यव व्रात यावांत्योत्तर शचीतिपूर्वयोरिति। तथा स्वरितार्द्धस्य उदात्तत्वे प्रातिशाख्यमिति। एकाक्षरसमावेशे पूर्वयोः स्वरितः स्वरः। तस्योदात्ततरोदात्तादर्द्धमात्रार्द्धमेव वा। अनुदात्तः परः शेषः स उदात्तश्रुतिर्भवेत्। उदात्तं वोच्यते किंचित्स्वरितं वाऽन्तरंपरमिति। २ अस्यार्थः। पूर्वयोरुदात्तानुदात्तत्वयोरेकत्र समावेशे सति स्वरितो बोध्यः। तस्य स्वरितस्य स्वतंत्रोदात्तापेक्षया उदात्ततरार्द्धमात्रा बोध्या इति कैश्चित्। इत्यादिकं स्वाभिप्रायम्। अर्द्धमेवेति दीर्घाभिप्रायम्। अनेनैव ह्रस्वस्यापि संग्रहाद्यापकत्वादिदमेवादर्त्तव्यमिति सूचयितुमेवकारः। अनुदात्त इत्यादि परिशेषसिद्धार्थकथनम्। स शेषः उदात्तश्रुतिः स्यात्। किमविशेषेणेत्याह। नवेदित्यादि। उदात्तस्वरितपरं विहायेत्यर्थः। शाकल्यो ह्याह। अप्राप्त तस्कयः स्वारः स्वरितोदात्तपूर्वगः। उदादायार्द्धमस्याथ शिष्टं निघ्नंति कंपितमिति। ३ उदादाय उदात्तं कृत्वा। अर्द्धं ह्रस्वशब्देन अर्द्धमात्रालस्यत इतिहरदत्तादियंथास्कमतांतरपरतया कथंचिन्नेयाः। ह्रेति। किमो:

उदात्तादनुदात्तस्य स्वरितस्य किंचित्प्राप्नुतः २

॥राम॥

॥ ४ ॥

(8)

नुतिस्स्वरितश्चवइति। अनुदात्तंसर्वमपादादावित्यधिकारादनुदात्तं। अश्वाइति। अशेःक्वनिनिस्वरेणाद्युदात्तं संहिता
यांत्वेकादेशउदात्तेनोदात्तइत्योकारउदात्तः। येऽराइतिद्वयमपिपित्स्वरेणांतोदात्तं एकादेशस्तु पक्षेस्वरितःस्वरितो
वाऽनुदात्तेपदादावित्युक्तेः। मुखंचनासिकाचेतिविग्रहे प्राण्यंगत्वादेकवद्भावे मुखनासिकमितिस्यादत आह मुख
सहितेति। तुल्यास्य। आस्येभवमास्यंशरीरावयवाद्यदित्यभिप्रेत्याहताल्वादीति। आभ्यन्तरेति एतच्चप्रशब्दबला
ल्लभ्यते। तुल्यास्यंकिम्। तप्तं अत्र पकारस्यतकारेपरेसरोऽझरीतिलोपोमाभूत। प्रयत्नग्रहणंकिम्। वाक्श्च्योतति
शस्यलोपोन। ञमङणनानांनासिकाचेतिचकारेणास्वस्ववर्गानुकूलंताल्वादिसमुच्चीयते। अनुस्वारोयमा अनु
नासिकाइतितैत्तिरीयानांप्रातिशाख्यम्। यमानुस्वारनासिक्यानांनासिके। अनुनासिकाश्चोत्तमाइतिकात्याय
नप्रातिशाख्यं। वर्गोत्तमाङञणनमा अनुनासिकाभवंति। वशाक्षात्स्वस्थानाद्यपरित्यागद्वारेणनासिकास्थानं
द्वितीयमेषामित्यर्थइतितद्भाष्यञ्च। एदैतोरित्यादौतपरत्वमसंदेहार्थंन तु तत्कालग्रहणार्थं। तेन प्लुतस्यापिसंग्र
हः। पूर्वत्रासिद्धम्। यद्ययंस्वतंत्रोविधिःस्यात्तर्हि त्रिपादीपूर्वंप्रत्यसिद्धाइत्येवलभ्येत त्रैपादिकंतुपूर्वंप्रतिपरं

देवदत्तस्य। ह ९९
इतिन्यायात् २

नो। सू.

नासिद्धं स्यादत आह। अधिकारोयमिति। यद्यत्र कार्यासिद्धत्वमिष्येत तर्हि पूर्वत्रासिद्धमिति मनोरथ इत्या
दौ उत्वं न स्यात् सरवाङ्गोरी त्यस्य प्रसंगात्। तथाच। पूर्वत्रासिद्धे नास्तिविप्रतिषेधोऽभावादुत्तरस्येति सिद्धांतो
व्याकुप्येत। अमू अमी इत्यादिवन्न सिध्येत् अत आह। त्रिपादीति। परं शास्त्रमिति च। एते न त्रिपाद्यां विहितं का
र्यमसिद्धमित्यादि प्राचो ग्रंथः परास्तः। विष्टएवतेकण्ठमिति। विवारएषोप्रयत्न इति भावः। वर्गयमगा इति। ॥ राम।
वर्गगाः यमगाश्चेत्यर्थः। कादय इति। लोकप्रसिद्धपाठापेक्षमिदम्। चतुर्दशसूत्र्यां मावसानत्वायोगात्। अर्द्ध ॥ ५ ॥
विसर्गेति। साद्दृश्यमुच्चारणे लेखने च बोध्यम्। ऋल्ह वर्णयोरिति। आच आच रलौ तौ च तौ वर्णौ चेति वि
ग्रहः। उश्च उश्च रैलौ तयोर्वर्णयोरिति वा। प्रथमांतेन परिनिष्ठितविभक्त्यावावियहः सिद्धान्तात्। ऋत्यक इ
ति प्रकृतिभावः। नाज्झलौ। आकारसहित इति। अत्र वकालसमय वेलासु इत्यादिनिर्देशाः प्रश्लेषे लिंगं।
नन्वेवमपि पियासोइत्यादौ गुरोरनृत इति प्लुतादाकारात्परस्य सनः सस्य षत्वं स्यादेवेति वाच्यम्। आश्च
आश्चेति द्वंद्वे सवर्णदीर्घेण दीर्घात्परत्र प्लुतोपि प्रश्लिष्यत इति व्याख्यानात्। यणादिकमिति। शीतलशाद्वे सव

(10)

णदीर्घ आदिशब्दार्थः। अत्रेति। अत्रैवेत्यर्थः। यद्यपीति। ग्रहणकशास्त्रस्य अग्रहणात्प्रनिष्पत्तेरिति भावः। ह्रोढ इत्यु
पलक्षणं। रमास्त्वित्यत्र षत्वं वागाशीरित्यत्र झयो ह इत्याकारस्य घकारः। दासीद्वेत्यादौ दादेरिति घत्वं चने
ति बोध्यम्। यदि तु विवृत्तेनेमूष्मणामित्यत्र ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवर्त्य प्रयत्नभेदो व्याख्यायेत त
दा नाज्झलाविति सूत्रं मास्त्विति भाष्येऽस्थितम्। वृद्धिरादैच्। ऐजिह द्विमात्र एव गृह्यते तातपरत्वात्तेन क्लृप्ते
कृत्वमित्यत्र त्रिमात्रेण। एवमुत्तरसूत्रेऽपि तेन गंगोदकमित्यादौ त्रिमात्रेण। भूवादयो धातवः। भूश्च वाश्चेति
द्वंद्वः। आदिशब्दयोर्व्यवस्था प्रकारवाचिनोरेकशेषः। भूर्वा आदी येषामिति बहुव्रीहिः। भूप्रभृतयो वासदृ
शाः सादृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह क्रियावाचिन इति। क्रियावाचिनः किम्। याः पश्यसीत्यादौ धा
तुत्वं मा भूत्। सति हि तस्मिन्नातो धातोरिति स्यात्। भ्वादयः किम्। हिरुक् पृथक् इत्याद्यव्ययानां शिक्ष्य इति भा
चार्थ्येति ङ तस्य च मा भूत्। स्तम्भ्वादीनामुदित्करणे न सौत्राणां धातुत्वं ज्ञाप्यते तु लुंपादीनां तु बहुलमेतन्निद
र्शनमिति गणसूत्रेण संग्रहः। चादयः। असत्त्वार्थाः किम्। पशुः। लिंगसंख्यान्वितं द्रव्यम्। इह तु स्यादेव लो

मनो० सू०

धनंयंति पशुमन्यमानाः। पशु इति सम्यगर्थे। उपसर्गाः। निस्दुस् इति सान्तौ निसस्तपताविति निर्देशात्। अयोगवा
हा नामविशेषेणेति प्रकरणे निष्कृतं दुष्कृतमित्युदाहृत्य इदुदुपधस्य सकारस्य यो विसर्जनीय इति भाष्यकारो
क्तेश्च। उपसर्गस्यायताविति सूत्रे वा मनोऽश्चेवम्। निरः कुषः सुडु रोरधिकरणे इति निर्देशाद्रेफान्तावपीति तेन नैरस्त्र
त्रे हरदत्तः॥ ॥इति संज्ञाप्रकरणम्॥ ॥इकोगुणवृद्धी॥ गुणवृद्धिशब्दाभ्यामिति। एतच्च पूर्वसूत्राभ्यां गुण
वृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति योजनया लभ्यते। तेनेह न। दिव औत्। द्योः। त्यदादीनामः इ ॥राम॥
मं। षष्ठ्यंतमिति। सूत्रे षष्ठ्यंतस्यानुकरणाद्वा पूर्वस्वरूपपरतया नपुंसकात्सोर्लुक् इति भावः। पदमिति। तच्चसं ॥६॥
भवति सामानाधिकरण्ये इगंतस्यांगस्येत्यादिक्रमेण संबध्यते। मिदेर्गुणः मृजेर्वृद्धिरित्यादौ तु सामानाधिक
रण्यासंभवात् मिदिमृज्योरवयवस्येक इति संबध्यते। यत्तु इक एव स्थाने स्त इति प्रासाद्व्याख्यातं यच्च तट्टीका
कृतोक्तं अनियमप्रसंगे नियमार्थमिदमित्यादि तत्सर्वं भाष्यविरोधादुपेक्ष्यम्। तच्चैषपक्षं दूषयित्वा पदोप
स्थितिपक्षस्यैव भाष्ये समर्थितत्वादित्याकूतः। तच्चैषपक्षेपि दूषणोद्धारस्तु शब्दकौस्तुभे स्पष्टीकृतोऽस्माभिः।

यद्यपि अभक्तत्वेऽपीदं सिद्धं तथाऽपि तातापिण्डानामित्येन लोपङ्दाहार्यः। २

आदिनापयांसीत्यादिर्ज्ञेयम्। स्वमते तु व्यपदेशिवद्भावेन हि हलन्तत्वाच्छान्तस्यैव स्यात्। १

अचां मध्य इति। यत्तु प्राचोक्तं अन्त्यादचः पर इति तन्न। शेमुषादीनामित्यादावंत्यस्याचोऽसंभवात्। तस्यैवांतावयव इति। तेन च पृणीत्यादावंगस्य नान्तत्वेन दीर्घः सिद्धः। परादित्वे स न सिध्येत्। अभक्तत्वे तु वहंलिह इत्यत्र वहाभ्रेलिह इति खशि अरुर्द्विषदिति मुमि मोऽनुस्वारो न स्यात् अपदांतत्वादिति भावः। यत्तु अभक्तत्वे च पृणीति दीर्घो न स्यादिति तत् तदादिग्रहणं स्यादिनुमर्थमित्यंगसंज्ञासूत्रस्थवार्त्तिके नैव दूषितप्रायम्। स्थाने योग इति। स्थानेन योगोऽस्या इति विग्रहः। निपातनादेत्वम्। अनेकविधमिति। स्थानार्थगुणप्रमाणकृतमित्यर्थः। बलीय इति। तेन चेतास्तोता इत्यत्र प्रमाणत आन्तर्याद्वा नकारो नेति भावः। तस्मिन्निति। सप्तम्यन्तानामनुकरणम्। निःशब्दो नैरंतर्यपरः। दिशिरुच्चारणक्रियः। अवियणित्युक्ते व्यवहितेऽव्यवहिते च सति प्राप्तमव्यवहित एवेति। पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते। अव्यवहितस्येति तु फलितार्थकथनम्। परस्य यदिति। तस्मादित्युत्तरस्यादेरिति तु न सूत्रितम्। आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेः। सिद्धांते तु परत्वात्सर्वादेशत्वं बाधकमित्यनुपदमेव वक्ष्यति। अनेकाल्शित उदाहरणम् इदम इश्। इतः। यत्तु वृत्तिकृता जश्शसोः शिरित्युदाहृतं तन्न। सर्वादेशतायाः प्राक् शित्वस्यैवाभावात्। तत्र हि जाणालोरिव आनुपूर्व्यादिनेकाल्त्वेनैव सर्वादेशत्वमिति सिद्धान्तः। इत्यादाविति। आ

नित्यादंतरंगं यथा। ग्रामणिनी इत्यत्र नित्यमपि कृल्लक्षणं नुमं बाधित्वा। यत्तु नरस्येत्यंशो न प्रवर्तेत तर्हि परमरान्तभिर
न्तरंगो नपुंसकह्रस्वः। अनजन्तत्वान्न स्यात्। २
नवतय इत्यादावपि स्यात्। ९

मनो॰सु॰ दिशब्देन अतो भिस ऐसिति गृह्यते। परत्वादिति। अत एव आदेः परस्येति पृथक्कृत्य यत इत्युक्तम्। उत्तरस्येत्यंशस्त्व
शेसो रपि प्रवर्तत एव। यत्तु प्राचा आदेरिति सूत्रे त्रिविक्रणवतापंचमीनिर्देशेनेत्याद्युक्तं तदसंबद्धमिति स्पष्टमेव। अनन्तरार्थत्व
परनित्येति। परान्नित्यम्। यथा तु दतिरूणद्धि परमपि लघूपधगुणं बाधित्वा श्नमो। तथा रयेणिविरंधयति प
रामपि उपधावृद्धिं बाधित्वा रधिजभोरिति नुम्। न च सोपि शब्दान्तर प्राप्त्या ऽनित्य इति वाच्यम्। कृताकृतप्रसंगमात्रेण
पिकविन्नित्यता ऽभ्युपगमात्। अन्तरंगं यथा। उभये देवमनुष्याः। इह प्रथमचरमेति परमपि विकल्पं बाधित्वा स ॥राम॥
र्वादीनीति सर्वनाम संज्ञा विभक्ति निरपेक्षत्वेनान्तरंगत्वात्। अपवादोपि यद्यन्यत्र चरितार्थस्तर्हि अन्तरंगेण बाध्य ॥ ७॥
त एव। तद्यथा। अयजे इन्द्रं ग्रामे इह सर्वे इत्त्वं। अत्रान्तरंगेण गुणेन सवर्णदीर्घो बाध्यते। स च यद्यपि यण्गुण
योरपवादस्तथापि समानाश्रये चरितार्थः। तथा च वार्त्तिकम्। इण्ड्शीनामाङ्गुणः सवर्णदीर्घत्वादिति। असिद्ध
मिति। तेन पचावेदमित्यादौ एत ऐ इत्येत्वं न। अकृतव्यूहा इति। यद्यपि कृतमपि वानिवर्तयन्तीति परिभाषान्तरं पष्ठ
ते फलं च तुल्यम्। तथापि अकृतेत्येव लघु। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायादिति भावः। नकुर्व
न्तीति। यथा निषेदुषीमित्यादौ क्वसोरिटं अन्तरंगत्वात्प्राप्तमपि भाविना संप्रसारणेन बलादित्वं नंक्ष्यतीत्यालो

१५

ग्रहणक शास्त्रं तु अस्य चावित
रितार्थं॥ २

च्यन कुर्वन्तीत्यर्थः॥ ॥इति परिभाषाप्रकरणम्॥ ॥इको यणचि॥ ॥प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढलक्षणा
दीर्घाज्जसि चेति ज्ञापकात्। ल्वादिभ्य इत्यादिनिर्देशाच्च। तेन इकः स्थाने षट् षष्टिर्वा स्युः। यण्शब्देन सप्त। भाव्यमानत्वे
न सवर्णाग्राहकत्वेपि गुणानामभेदकत्वेनानुनासिकानामपि यवलानां ग्रहणात्। अतो नास्ति यथासंख्यम्। न च लक्ष्या
र्थबोधात् पूर्वं भाविनं शक्यार्थबोधमादाय यथासंख्यमस्त्विति वाच्यम्। एवमपि तृतीयचतुर्थाभ्यां ऋकारल्कारा[भ्यां]
प्रत्येकं त्रिंशदुपस्थितौ ल्ववर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसंगात्। तस्मादिह स्थानेऽन्तरतमसूत्रेणै
वेष्टसिद्धिरित्यभिप्रेत्याह। स्थानतआन्तर्यादिति। अनचि च। द्वे वेति। यरोऽनुनासिक इति पूर्वसूत्राद्वाग्रहणमनु
वर्तत इति नाज्झलाविति सूत्रे कैयटः। एवं च सर्वत्र शाकल्यस्येति सूत्रं तत्प्रपंचभूतं पूर्वत्रिसूत्रं च द्वयं च नारंभणीयमि
ति भावः। यत्तु दीर्घादाचार्याणामिति सूत्रे आचार्यग्रहणं पूजार्थमित्यभिप्रेत्य वाक्वाक्क इति भाष्योदाहृते विकल्पोऽ
पपत्तिविशिष्टार्थं क्लिश्यन्ते तन्मुधैव। पूजार्थतायाः प्रामाणिकैरनुक्तेः। त्रिप्रभृतिष्विति सूत्रे शाकटायनग्रहणस्या
पि तथात्वापत्तेः। न चेष्टापत्तिः संस्कर्त्तेति त्रिसकारपरकैयटहरदत्तादिग्रंथविरोधात्। स्वग्रंथविरोधाच्च। अ
त एव प्रातिशाख्यभाष्येपि आत्वारथमिति मंत्रे तकारद्वित्वविकल्प उदाहृतः। माधवेन च आस्ते इत्यत्र सकार
ननु स्थानेऽन्तरतम इति परिभाषा किं विस्थानसाम्ये उत सर्वस्थानसाम्ये। नाद्यः। ल्कारस्थाने वकारप्रसंगात्। दन्तस्थानसाम्यात्। नान्त्यः।
चेतास्तोतेत्यादौ एकारानापत्तेः। कंठ्यतालुस्थानकस्य तस्याभावात्। तस्मादनेनापि नेष्टसिद्धिरिति दिक्॥ ६

15

गे॰ मु॰

स्यद्वित्वविकल्पउक्तः। एवं यथा त्वंशाइत्यत्र तकारस्य द्वित्वं असदित्युक्तिरेवासतीति दिक्। स्थानिवदादेशः। धात्वंगकृत्त
द्धिताव्ययसुप्तिङ्पदादेशा इति प्राचोक्तम्। तत्किं परिगणनं उदाहरणमात्रं वा। नाद्यः। सिद्धं स्सरङ्ङ नदीनां श्वादे
शस्य शानच् श्वासं यस्तापत्तेः। नान्त्यः। अव्ययस्यांगपदाभ्यां पृथक् ग्रहणवैयर्थ्यात्। प्रसक्तत्येतिदृत्तिकारोक्त त्वदुदा
हरणमपि मन्दम्। क्त्वामात्रस्यानव्ययत्वात्। कृत्त्वेन सिद्धत्वाच्च। इत्याशयेनाह आदेश इति। अनल्विधाविति किम्।
तेन न स्मात्रस्य तस्मिंश्च विधौ माभूत्। तत्र अलाविधौ यथा व्यूढोरस्केन। अत्र सकारस्य स्थानिवत्त्वेन विसर्गस्याद्य ।।राम।।
माश्रित्य अद्धवायइति णत्वं प्राप्तम्। अल्लः परस्य। द्यौः पन्थाः। हल्ङ्यादिलोपेन। अलो विधौ। प्रकामः। वलि ।। ८ ।।
लोपेन। अलि विधौ। यजेः क्तः। कइष्टः। हशि वेत्युत्वं न। अल्वे हस्थान्यवयवन एव गृह्यते तेन रामायेत्यादौ सु
पि चेति दीर्घः सिध्यति। तद्वि यो हि यआदित्वमाश्रितम्। यत्र आदेशावयवः न तु स्थान्यवयव इति। तदेतत्सकल
मभिप्रेत्याह न तु स्थान्यलाश्रय इति। आश्रयणं चेह यथाकथंचित् न तु प्राधान्येनैवेत्याग्रहः। तेन प्रपठ्येत्यत्र व
लादिलक्षणइण्न। तन्निषेधादिति। स्थानिवत्त्वनिषेधादित्यर्थः। अल्विध्यर्थमिति। तेन वव्रश्चेत्यत्र वस्य संप्रसारणं
न। उरदत्वस्य स्थानिवत्त्वेन संप्रसारणतया न संप्रसारण इति निषेधात्। नचोरदत्वं परनिमित्तं नेति वाच्यम्। अंगा।

इत्यत्र व...
दिल...
निवत्त्वं...

क्ङिति प्रत्यये परे तद्विधानात्। प्रागभ्यासविकारेभ्योऽधिकार इति पक्षं दूषयित्वा आसन्नमसमाप्तेरिति पक्षस्यैवाकरे सिद्धा
न्तितत्वात्। किंच। पूर्वसूत्रेण स्थानिप्रयुक्तमतिदिश्यते न त्वादेशप्रयुक्तं वार्यते। नायकः पावक इत्यादौ एचोऽयवायाव इ
त्यादीनामप्रवृत्तिप्रसंगात्। अनेन तु वार्यते। शास्त्राधिकारमाश्रित्य भावाभावयोरुभयोरप्यतिदेशोऽयमिति स्वीकारा
त्। न पदान्तेति सूत्रे यलोपदीर्घादिग्रहणं चेह लिंगं। अत एव गणयतीत्यादौ न वृद्धिः। स्थानिनि सति अभवन्त्यास्त
स्या आदेशेऽप्यभावातिदेशात्। उक्तं च। काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्तीति। स्यादेतत्। पूर्वत्वस्य सा
वधित्वेन सन्निहितस्यैव अवधित्वमुचितम्। सन्निहितं चेह त्रयम् स्थानी आदेशः निमित्तं च। तत्र न तावत्स्थानी अ
वधिः तस्यादेशेनापहारात्। नाप्यादेशनिमित्ते वैयाकरण इत्यत्र ऐकारस्य आयादेशापत्तेरित्याशंक्याह। अचः
पूर्वत्वेन दृष्टस्येति। पूर्वत्वमुपलक्षणम् न तु विशेषणमिति भावः। एतेन अचः पूर्वत्वविज्ञानादेतोः सिद्धमिति वा
र्त्तिकं व्याख्यातम्। न पदान्त। पदस्य चरमावयव इति। वृक्षं वेतीति वृक्षवीः। वृक्षं वातीति वृक्षवाः। तमाचष्टे वृक्षव्
णिच्। इह लोपो व्योरिति वलोपो न। स्थानिवत्त्वात्। न च न पदान्तेति निषेधः। इह विधेयस्य लोपस्य पदानवयवत्वात्।

नो॰ सु॰

पदान्तस्यस्थानेविधौनेतिव्याख्यानेतुनेदंसिध्येत्। सुबंतात्णिजितिहरदत्तादिमतेऽन्तर्वर्तिसुपापदत्वात्। नचेष्टवदित्यतिदिष्टेन
णिचिभत्वेनपदत्वबाधः। णिचोलुप्तत्वात्। नच प्रत्ययलक्षणम्। वर्णाश्रयत्वादितिभावः। द्विर्वचनादौ चेति। यल्लोपादय आदिशब्द
ग्राह्याः। वरेइतितुवरेयोऽजादेशःसनस्थानिवदितिव्याख्येयम्। सहविवक्षाभावेपिनिपातनात् द्वंद्वः सप्तम्यलुक्। अथोदा
हरणानि। पदान्तेकानिसन्तिकौस्तः। द्विर्वचने। सुध्युपास्यः। वरे। यायावरः। यश्चयङ इतिवरच्। अतोलोपयल्लोपौ। सतच्चा
तोलोपइटि चेत्यालोपेकर्तव्येनस्थानिवत्। यल्लोपे। यातिः। यातेर्यङंतात् क्तिच्। अतोलोपः यल्लोपः। अल्लोपस्यस्थानिव ॥ राम ॥
त्त्वादातोलोपः। यल्लोपः। नचपुनरालोपःशंक्यः। विप्रो लुङ्न्यायेन आलोपस्यासिद्धत्वात्। स्थानिवद्भावाच्च। स्वरे। चिकीर्ष ॥ ९ ॥
कः। सनोऽतोलोपः। लितीतिककारेकारस्यउदात्तत्वेकर्तव्येनस्थानिवत्। सवर्णानुस्वारयोः। शिण्ढि। दीर्घे। प्रतिदीव्ना।
जक्षिं। सग्धिश्चमे। अदनंग्धिः। अदेः क्तिनिबहुलंछंदसीतिघस्लृ आदेशः। घसिभसोर्हलि चेतिउपधालोपः। झलोझ
लीतिसलोपः। धत्वम्। घस्यजश्त्वम्। सहस्यसइतिसूत्रात्सइत्यनुवर्तमानेसमानस्यछंदस्यमूर्धप्रभृत्युदर्केष्विति
सूत्रेणसः। वरि। जक्षतुः। संयोगांतस्य। तदंतस्येति। अलोऽन्त्यपरिभाषयेतिभावः। यद्यपिविशेषणेनतदन्तविधिला

भात्संयोगस्येत्येव सूत्रयितुमुचितम्। तथापि प्रत्येकं संयोगसंज्ञेति पक्षे दूषणं करोतीत्यादौ लोपं वारयितुं संयोगान्तस्येति
द्विवचनान्तेन समासलाभार्थमन्तग्रहणम्। हल्तौ हि उपसर्जनानामेकत्वसंख्या औत्सर्गिकी द्वित्वादिकं तु यत्नलभ्य
मिति भाष्ये स्थितम्। यण इति। वार्त्तिकम्। यद्वा वाच्यो व्याख्येयः। व्याख्या च द्वेधा। झलो झलीत्यतो झल्ग्रहणमपकृष्य
झल एव लोपो विधीयत इति। अन्तरंगे लोपे कर्त्तव्ये बहिरंगस्य यणोऽसिद्धत्वमिति वा। न च षाष्ठी असिद्धपरिभाषा त्रिपादी
स्थत्वेनासिद्धमन्तरंगं लोपं न पश्यतीति वाच्यम्। कार्यकालपक्षाभ्युपगमात्। न च नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिरिति निषेधः।
तस्यानित्यत्वात्। उत्तरकालप्रवृत्ते लोपेऽजानन्तर्याभावाच्च। तथा च वार्त्तिकम्। संयोगान्तस्य लोपे यणः प्रतिषेधः। न वा झ
लो लोपात्। बहिरंगलक्षणत्वाद्वेति। इह यथोद्देशपक्षे आद्यं वार्त्तिकद्वयं तृतीयं तु कार्यकालपक्ष इति विवेकः।
यत्त्वाहुः। वार्त्तिककृतो वचनं प्रत्याख्यानप्रकारद्वयं तु भाष्यकृत इति तन्निर्मूलं मतभेदे प्रमाणाभावात्। यद
प्याहुः। कार्यकालत्वं शास्त्रस्य चावस्थानां कावृकलत्वं शास्त्रस्य दृश्यते रथ बितिति तदपि न। पक्षत्रयेपि संयोगान्तलोप
स्य दुर्लभत्वात्। आद्यपक्षद्वये कत्वार्थं पूर्वं पूर्वमन्तरंगं परं परं बहिरंगमिति अल्लोपणिलोपयोरसिद्धत्वस्य सुवचत्वा

मनो॰ सु॰

तु। अत एव कातंत्रपरिशिष्टेप्युक्तं यतेः क्विपि युक्तं इत्युदाहृतम्। वान्तयोः क्विपि ऊठो दुर्बलत्वात् न वस्थानिवत्त्वं क्वौ विधिं प्र
ति तन्निषेधात्। विविलोपाख्यो रित्यस्य प्रसंगाच्च। गिरिवेश्मयतेस्तु क्विपि यणः प्रतिषेधार्थं वचनारंभपक्षे गिरिवेद्य इत्यु
चितम्। प्रत्याख्यानपक्षे तु मान्नमेवेति दिक्। इति पठ इति। पक्षद्वयस्यापि भाष्ये स्थितत्वादिति भावः। चत्वारि रूपाणीति। यत्तु
वदन्ति धकारयकारोभयद्वित्वे उभयोः पुनर्द्वित्वे लोपविकल्पेऽन्यतरद्वित्वे अनुभयद्वित्वे च नव रूपाणि। तथाहि। एक
धं त्रिधा। एकयं द्वियं त्रियं च। एवं द्विधं त्रिधं च त्रिधेति। तन्न अन्तरंगे द्वित्वे बहिरंगस्य यणोऽसिद्धत्वं चैपादिके न्तरंगे बहिरंगप
रिभाषा न प्रवर्त्तत इति विसर्जनीयसूत्रे भाष्यकैयटाभ्यां व्यवस्थापितत्वादिति। अत्रेदं वक्तव्यम्। पुनर्द्वित्वमशुद्धम्। एक
स्यां व्यक्तौ एकं लक्षणं सकृदेव प्रवर्त्तत इति एकः पूर्वपरयोरिति सूत्रे भाष्ये सिद्धान्तितत्वात्। अन्यथा द्वित्वानामानंत्याप
त्तेः। न च स्त्ररो स्त्ररीति हलो यमां यमीति च लोपेन निर्वाहः। लोपस्य वैकल्पिकत्वात्। कथमन्यथा त्रिधं त्रियं चेति भवदुक्तिः सं
गच्छेत। किञ्च। एवं सति सर्वस्य द्वे इति द्वित्वमपि पुनः पुनः प्रवर्त्तेत। अत एव लिटि धातोरिति सूत्रे [illegible]भ्यासग्रहणं भाष्ये
प्रत्याख्यातम्। सन्नन्ता यङन्ता वा णिचि विवक्षितः द्वित्वाभावार्थं तदिति तु कैयटादिभिरुक्तं। तस्मादिह त्यज वा पञ्चमा

॥ राम ॥
॥ १० ॥

दीनि रूपाणि स्वीकुरु वा रूपा॰ न स्यमिति। न व त्वोक्ति रसंगतैव। सकारद्वित्वे नाष्टौ विसर्गद्वित्वे न षोडशेति त्वन्यदेतत्।
यदप्युक्तं त्रैपादिके ऽन्तरंगे इत्यादि तदपि न। नार्कुटः नार्पत्य इत्यत्र विसर्गनिवारणाय हृद्वेरसिद्धत्वस्य तत्रैव भाष्ये
स्पष्टत्वात्। संयोगान्तलोपे यणः प्रतिषेध इत्यस्य बहिरंगत्वेन प्रत्याख्यातत्वात्। स्वयमपि तथैवानूदितत्वाच्च। तस्मा
दिह यणो द्वे शपस्तो ग्राह्यो बहिरंगपरिभाषाया अप्रवृत्तये। तथा च। भाष्ये मयः परस्य यणो द्वित्वे दध्यत्रेत्युदाहृत
म्। नैवमपि इको ऽसवर्ण इति शाकल्येन रूपान्तरमस्त्विति वाच्यम्। समासे तन्निषेधात्। न च नित्यसमास एव निषे
ध इति वाच्यम्। भाष्ये नित्यग्रहणस्य प्रत्याख्यातत्वात्। यथोत्तरं मुनीनां प्रामाण्यात्। न चेह यणो व दुर्लभः सुधीशब्दस्य ध्यायतेः सं
प्रसारणे निष्पन्नत्वेन संप्रसारणाच्चेति पूर्वरूपापत्तेरिति चेत्। न। संप्रसारणपूर्वत्वे समानांगग्रहणमिति वार्त्तिकोक्तेः। सं
प्रसारणस्थानिकस्य अतथात्वाच्चेति किं सित्। तन्न। पूर्वत्रत्वस्यासिद्धेः। नैवमपि न भूसुधियोरिति यण्निषेधः शंक्यः। अं
गत्वेन प्रत्यये परत एव तस्य प्रवृत्तेः। अनंतरस्येति न्यायेन एरनेकाच इति ग्रः सुपीति वस्तुत्रद्वये न प्राप्तस्यैव निषेधाच्च।
धात्रे श इति। अत्र रेफस्य द्वित्वेन। द्वित्वप्रकरणे रहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन रेफस्य कार्यित्वबाधना
त्। सुद्युपास्य इत्यादौ तु स्थानिवत्त्वेन निमित्तत्वमिकस्तस्मादित्युत्तरस्येत्यादिनिर्देशाज्ञापकान्न बाध्यत इति केयप

नो॰ स्कृ॰

टः। तकारस्य तु द्वित्वं भवत्येवेत्युक्तम्। तत्र वेत्यतो न रूपद्वयम्। लाकृतिरित्येकमेव। हलो लोपमाह। लोपः स्याद्वेति। झयोह
इत्यतोऽन्यतरस्यामित्यनुवृत्तेः। एतच्च लण्सूत्रे भाष्ये स्पष्टम्। माहात्म्यमिति। अन्नमल्लोपा नेत्यर्थः। हलो यरां यरि सवर्णे
लोप इति तु न सूत्रितम्। आर्द्धावमृद्धः शार्ङ्गं आत्तः इत्यादौ रेफात्परस्य लोपापत्तेः। वा नोपि। यकारादाविति। विशेषण
मात्मान्तस्य संज्ञा स्यादित्येतदर्थकस्य येन विधिरिति सूत्रस्य अपवादभूतेन यस्मिन्विधिस्तदादावल्ग्रहणे इति वार्त्तिके
नायमर्थो लभ्यते। आदैतो रिति। पूर्वसूत्रे तयोरेव वान्तौ प्रतिस्थानित्वेन निर्दिष्टत्वादित्यर्थः। ननु गव्यूतिरित्यत्र तस्मिन्सर्वे
षामिति लोपः शाकल्यस्येति वा लोपः स्यादित्याशंक्याह। वान्त इत्यत्रेति। लव्यमिति। लुनातेरचो यत् सार्वधातुकार्धधातु ॥राम॥
कयोरिति गुणः। अवश्यलाव्यमिति। ओरावश्यक इति ण्यत्। क्षय्यमिति। शकि लिङ्चेति यात्कृत्याः। जेयमिति। अर्हे कृ ॥११॥
त्यतृचश्चेति कृत्यः। हरएहीति। इह ओमाङोश्चेति पररूपं प्राप्तम्। उरण्रपरः। आन्तरतम्यादिति। रेफशिरस्कस्य ऋकार
इत्यस्य रेफद्वारा ऋकारेण स्थानसाम्यादित्यर्थः। पक्षे द्वित्वमिति। ऋधेर्यस्येति भावः। लोपो वेति। झयो होऽन्यतरस्यामि
ति सूत्राद्विकल्पानुवृत्तेः। एतच्च नाज्झलाविति सूत्रे भाष्यकैयटयोः स्पष्टम्। प्राचस्तु विकल्पानुवृत्तेरनुक्तेर्न्यूनता। य
दपि व्याख्यातृभिः शरोऽचीति ज्ञापकमुपन्यस्यते तत्र संवादार्थं भाष्यमुपन्यस्तम्। अनुवर्त्तते विभाषा शरोऽचि यद्वारयद्य

यं द्वित्वमिति। तन्न। तदुत्तरभाष्येण वडकृ ज्ञापकस्य दूषितत्वात्। लोपस्य हि नित्यत्वे नोरहाभ्यामिति द्वित्वं लोपापवा
दः स्यात्। तथा च शरोऽचीत्यस्य सार्थक्यं स्पष्टमेव। तस्माद्विकल्पानुवृत्तौ ज्ञापकान्तरमनुसर्तव्यम्। भाष्यकारादिव्या
ख्यानमेव वात्र शरणम्। द्वित्वलोपयोरिति। यत्तु द्वित्वविधानसामर्थ्यात् द्वावेवानुशिष्येते इति। तन्न। लोपस्यैवैकल्पि
कत्वेन द्वित्वस्य पक्षे चरितार्थत्वात्। त्रिधमिति। यणो मय इति लक्षणांतरेण पुनर्द्वित्वे चतुर्धमपि बोध्यम्। एत्येधत्यू
ठ्सु। अत्र एचीत्यनुवर्तते तच्चैत्यादेर्विशेषणं नत्वेधतेः। अव्यभिचारात्। नाप्यूठः। असंभवादिति वृत्तिकारः। अत्र कैय
टः। एधतेरपि विशेषणं माभवान्प्रेदिधदित्यत्र व्यभिचारसंभवात्। यद्यपीदं कैयटपुस्तकेषु प्रायेण न दृश्यते तथा
पि क्वचित् दृश्यत एव। न च णौ चङ्युपधाया ह्रस्व इति ह्रस्वे कृते नायमेधतिरिति वाच्यम्। एकदेशविकृतस्यानन्यत्वात्। न चैवमध्य
जादेर्द्वितीयस्येति धिशब्दस्य स्थाने धिधिशब्दादेशः सति च सन्नन्तत्वे सरिवत् प्रकृतिप्रत्ययविभागसंमोहः इति वाच्यम्।
द्विः प्रयोगो द्विर्वचनं षाष्ठमिति षाष्ठभाष्ये सिद्धान्तितत्वात्। अन्यथा इह वणि लोपो न स्यात्। जिघांसतीत्यादौ स
नः सकारेण विशिष्टस्य द्वित्वे कृते कुत्वं च न स्यात्। न चान्तरंगत्वात्प्रथमं चङीति द्वित्वे कृते ह्रस्वो न भवत्येवेति
वाच्यम्। ओणोर्ऋदित्करणेन बहिरंगस्यापि णौ चङ्युपधाया ह्रस्वस्य प्रथमं प्रवृत्तिरिति ज्ञापितत्वात्। अत्र माधवः।

स्.

माभवान्प्रेदिधदित्यत्र नातिप्रसंगः। ण्यन्तस्य शब्दान्तरत्वादेधातिग्रहणे नाग्रहणात्। अत एव हि न भाभूपूकमिग
मीत्यत्र ण्यन्तानां भ्रादीनामुपसंख्यानमित्युक्तम्। ते च शब्दान्तरत्वादप्राप्तावुपसंख्यानमिति कैयटन्यास
कारहरदत्तादिभिः सर्वैरेवोक्तम्। किं च। ण्यधिकस्यापि ग्रहणे उपसर्गात्सुनोतीत्यत्र अभिषावयतीत्युदा
हृत्य ण्यन्ते नाभेर्योगात् सुनोतिं प्रत्यनुपसर्गत्वात् कथं षत्वमित्याशंक्य भाष्ये प्रकृत्यर्थविशेषकत्वेन समाधानं भा
ष्यकाराद्युक्तमसंगतं स्यात्। न च हेरचङीति लिंगात् प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणमिति भ्रमितव्यम् ज्ञा ।।राम।।
पकस्य कुत्वमात्रविषयत्वात्। तथा च वार्तिकम्। हेरचङि प्रतिषेधानर्थक्यमंगान्यत्वात्। ज्ञापकं तु चङोऽन्यत्र ण्य ।।१२।।
न्तेपि कुत्वभावस्येति। तस्मादुक्तिविरोधात् भाष्यवार्तिकवृत्तिन्यासादिग्रंथैः पूर्वापरस्वग्रन्थेन च विरोधादुप
च्योयं कैयट इति। अत्रेदं वक्तव्यम्। अस्तु विशिष्टस्य शब्दान्तरत्वं तावतापि प्रकृतिभागस्य एकदेशत्वं केनापण
तमिति परिभाव्यताम्। न ह्युपेधतेरित्यादौ तिङः तस्य एकदेशतानास्तीति प्रकृत्यंशे साहाय्यते। तथा च उपसर्गा
त्सुनोतीति सूत्रे वार्तिकम् सिद्धं त्ववयवानन्यत्वादिति। यत्त्वभिषावयतीत्यत्र भाष्यादिविरोधोद्भावनं तद्वि
द्विपरीतम्। यतः प्रकृतेः सुनोतिरूपानपायात् कैयटमते सिद्धा यथोक्तव्यवस्था। त्वन्मते तु रूपान्तरत्वेन ण्य

धिकस्याग्रहणादसंगतैवप्राउक्तव्यवस्थास्यात्। कोह्येवंयति सावयत्योर्विशेषः यदेधतेर्ण्यधिकस्याग्रहणंसुनोतेरूक्
ग्रहणमिति। यदपिण्यन्तभादीनामुपसंख्यानमुपन्यस्तंतदपिनास्माकंप्रतिकूलम्। विशिष्टस्यशब्दान्तरत्वेनग्र
क्त्यंशस्यतुणिचाव्यवधानेनउपसंख्यानस्याऽवश्यकत्वात्। अतएवनतत्रत्यन्यासादिभिः स्वोक्त्याबाविरोधः प्रत्यु
ततैवविरोधः। षष्ठेभाष्यवार्तिकयोरेत्येधत्योरितियोगंविभज्यएवेतिविशेषितत्वात्। तस्मादिहहत्तिग्रंथोमा
धवग्रंथश्च असंगतएवेत्यभिप्रेत्यव्याचष्टे एजाद्योरिति। अक्षौहिणीति। ऊहोऽस्त्यस्याः ऊहिनी अक्षाणामूहि
नीतिविग्रहः। परिमाणविशेषविशिष्टासेना अक्षौहिणी। पूर्वपदात्संज्ञायामिति णत्वम्। यत्तुप्राचाविग्रहीतं अ
क्षाणामूहः समूहः सोऽस्त्यस्या इति। तदपूहिनीशब्देनषष्ठीतत्पुरुषइत्येवंपरतयैवकथंचिन्नेयम्। ऊहशब्देन
समासेतत्रइनौतुवृद्धिर्नस्यात्। अन्तरङ्गेणगुणेनबाधात्। अपवादभूतायाअपिवृद्धेरूहिनीशब्देनविग्रहेचरि
तार्थत्वात्। यथोक्तंप्राक्। इण्। शीनामाक्रुणाः सवर्णदीर्घत्वादिति। स्वादीरेरिणोः। ईरेरिण्योरितिकाशिकोक्तो
पपाठः। स्वैरीतिणिन्यन्तस्यआस्त्रियांवृद्ध्यभावप्रसंगात्। स्वैरिणीत्यत्रतुङीपः प्रागभागमादायवृद्धिर्बोध्या। यत्तु
व्याचख्युः लिंगविशिष्टपरिभाषयेतितन्निष्फलम्। प्राद्दूहोढोढ्येषैष्येषु। अत्रऊहशब्दः केश्चित्प्रक्षिप्तः भा

घादौ तु न दृश्यत इति भावः। इदानींतनपुस्तकेषु तु भाष्यवार्त्तिकयोरूहशब्दो दृश्यत एव। नानर्थकस्येति। उपस्थितस्यार्थ
स्य शब्दं प्रति विशेषणत्वसंभवेऽप्यायोगात्योगादिति भावः। सीरदेवस्त्वाह। वृश्चेति सूत्रे राजेः पृथक् भ्राजिग्रहणमिह ज्ञाप
कमिति। नन्वेतदयुक्तम्। फणादिना राजिना साहचर्यात् तथा च तस्यैव षत्वार्थतया भ्राजिग्रहणस्योपक्षीणत्वादिति
चेत्। विभ्राड् विभ्रागिति रूपद्वयं हि साध्यम्। तत्र च व्रश्चादिसूत्रे राज इति पठितत्वादपि तु साधम्। एकस्य भ्राजतेः ऋकार
स्य प्रागपि दातुं शक्यत्वात्। ऋ भ्राज इति। भ्राज भास इति विकल्पस्य वाचनिकतया ऋकारस्यात्मनेपदमात्रफलकता ॥राम॥
या वक्ष्यमाणत्वेन तत्स्थाने ऽकारस्य सुपठत्वाच्च। तस्मात् सीरदेवोक्तं ज्ञापकमिति सम्यगेव। प्रेष्य इति। एषसाहच ॥१३॥
र्यादिष्योँः ण्यन्तयोर्ग्रहणात्। तेन णयन्तादिषेः क्तोल्यपि पररूपमेव न वृद्धिः। प्रेष्यगतः। प्रवत्सतर। अत्र कालापानु
सारिणः वत्सरशब्दमपि पठित्वा वत्सरे दयमृणं वत्सरार्णमिति उदाहरन्ति। अपरे तु वत्सशब्दमपि पठन्ति तत्सर्वं
भाष्यादिविरुद्धम्। अन्तादिवच्च। इह एकः पूर्वपरयोरित्यनुवर्तते। यथासंख्यं चेत्यभिप्रेत्याह पूर्वस्यान्तवदिति।
स्थानिवत्सूत्रेणैव गतार्थमिदं सूत्रम्। न वाल्विध्यर्थमिति भ्रमितव्यम्। अस्याप्यल्विधावनिष्टत्वात्। अन्यथा अय
ज्ञेई इ इत्यत्र सवर्णदीर्घापत्तेः। तथा च वार्त्तिकम्। न वाश्रितादृष्यातिदेशादिति। न विसर्ग इति। एतच्च सुखार्थम् इ

(26)

त्यादावपितुल्यम्। अत्र कार्यकालपक्षे बहिरंगत्वादसिद्धत्वमपि बोध्यम्। न च नाजानन्तर्य इति निषेधः। यत्रांतरंगे वहिरंगे
वा अवीरानन्तर्यं तत्रेति हरदत्तपक्षे न त्याज्यत्वपि यत्र पश्चात्प्रवर्तमाने अजानन्तर्यमिति केयट मते निषेधाप्रवृत्तेः। बहूपेक्ष
त्वेन बहिरंगायांवृद्धौ अजानन्तर्यसत्वेऽपि पश्चात्प्रवर्तमाने विसर्गे तदभावात्। उपसर्गेणेति। यत् क्रियायुक्ताः प्रादयस्तं प्र
त्येव गत्युपसर्गसंज्ञा इति उक्तत्वादिति भावः। प्रार्षभीयतीति। शरौँवीतिद्वित्वनिषेधः। प्रेजत इति। एजृ दीप्तौ कंपनार्थस्तु
परस्मैपदी। एजते कंपत इति तु प्राचां व्याख्यानं प्रामादिकमेव। एङ्ङि त्येव सिद्धे पररूपग्रहणं अतो गुण इत्युत्तरार्थं
रूपग्रहणं तु विस्पष्टप्रयोजनं। एङि पर इत्येव सिद्धे। यथाऽमि पूर्व इति। नियोगोऽवधारणमिति। यदाऽऽहुः। अनवक्लृ
प्तौ यदादृष्टः पररूपस्य गोचरः। एवस्त्व विषयोऽवृद्धे नियमेऽयं यदा भवेदिति॥१॥ एतेन नियोजनं नियोगो व्यापार इति
व्याख्यानं परास्तम्। यदेव पूर्वं ज्वलनेशरीरं मम मैव जन्मान्तरपातकानां इत्यादि प्रयोगाविरोधात्। उदाहृतत्वातिश्लो
कविरोधाच्च। लक्षः शाकटायनस्यैवं तपस्तपः कर्म्मकस्यैव इत्यादि सौत्रप्रयोगविरोधाच्च। यत्तु श्लोकवार्तिकमिद
मित्याहुस्तद् भसात्। शकंध्वादिषु इति। शकंध्वादि विषये तत्सिद्ध्यनुगुणं पररूपं वाच्यमित्यर्थः। अतएवाह। तच्च
टेरिति। यदि तु आदित्यधिकारादकारस्यैव वक्ष्यते तर्हि मनीषापतंजलिरिति न सिध्येत्। केचित्तु मनः पतत्ववृद्धयोः

म.गो.सु.

पृषोदरादित्वादन्त्यलोपः कारस्यैव पररूपमाङः। शकानां देशविशेषाणामन्धुः कूपः। शकन्धुः। कर्कोणां राज्ञामन्धुः कर्कन्धुः। बदरी वा। सा तु कर्कन्धूशब्दो दीर्घान्तः। अन्दूदृंभूः इत्यादिना उणादिषु वक्ष्यते। अटतीत्यटा पचाद्यच्। कुलस्याटा कुलटा। ईषउच्छे ईषगत्यादिषु। आध्यां गुरोश्च हलः इत्यप्रत्यये ईषा। मनस ईषा मनीषा। हलस्य ईषा हलीषा। लांगलदंडः मूर्द्धन्योपधः। यत्तु प्रभु शंकरयोरीशाः स्त्रियां लांगलदण्डके इति रभसकोशात् तालव्योपधः तस्मिन्न रे आकृणइत्ये वभवति। हले शा। पतन्नंजलिर्यस्मिन् नमस्कार्येत्वात्। इति पतञ्जलिः। मार्त्तण्ड इति। केचिदत्र सवर्णदीर्घमेवाङः। परामार्त्तण्डमास्यत्। पुनर्मार्त्तण्डमाभरत्। विश्वामार्त्तण्डो व्रजमित्यादि वैदिकप्रयोगास्तेषामनुकूलाः। ओत्वोष्ठयोरिति। अकारस्य ओत्वोष्ठयोश्च एकत्र समासे स्थितौ सत्यां इदं प्रवर्त्तते तेनेह न। हे षलस्तु तौष्ठव्र ण्यास्त इति। अव्यक्तशब्दं व्याचष्टे ध्वनेरिति। अनुकरणस्येति। परिस्फुटाकारादिवर्णस्येति भावः। तस्य चानुकरणत्वं किंचित्साम्येन बोध्यम्। यत्तु प्राचोक्तम्। अतः किमुंदकारान्तेमाभूदिति। यच्च व्याख्यातं दकारान्त इति रूपान्तरोपलक्षणम्। घटकुमरुत् इत्यादेरपीति तन्निःसारम्। प्रश्नस्यदान्त इत्युत्तरस्य च निरालंबनत्वात्। यत्तु व्याचख्युः। अतो गुण इत्यतोऽत इत्यनुवर्त्यशब्दाधिकाराश्रयणात्सिद्धमिति प्रश्नः। यदा जश्त्वं वशाद्दान्तत्वं तदापि स्यात् पुनर

॥ राम ॥

॥ १४ ॥

28

ग्रहणे तु तात्त्वस्य विवक्षणान्नेत्युत्तरमिति तच्चिन्त्यम्। जश्त्वशास्त्रस्यासिद्धत्वेन पररूपस्यैव प्रवृत्तेः। नाम्रेडितस्येति नि
षेधे पटत्पटदितीति उदाहरणस्यासंबद्धत्वापत्तेश्च। तत्र हि भवदुक्तरीत्या प्राप्तिरेव नास्ति दान्तत्वात्। एतेन अनुका
र्यानुकरणयोरभेदविवक्षया विभक्त्यभावेन गतित्वयमाह तिवद्पदत्वात् पटत् इतीत्य नजश्त्वं नेति यन्योपि प्रत्यु
क्तः। उत्तरग्रंथविरोधात्। जश्त्वशास्त्रस्यासिद्धतया पररूपेणैव बाधाच्च। ननु तदपि नित्यं तथा च कथं पररूपविरहेण
प्रयोग इति चेत्। न। अलौकिकप्रक्रियावाक्यमिदमिति स्वयमेव व्याख्यातत्वात्। संहितायामविवक्षायां तु संभवा
च्चेति दिक्। अकः सवर्णे। अचि पर इति। यदा तु ऊष्मणामीषद्विवृतत्वमाश्रित्य नाज्झलाविति सूत्रं प्रत्याख्यायते तदे
ह अचीति नानुवर्तनीयम्। अकोकिदीर्घ इति सुवचम्। वर्णद्वयं द्विमात्रमिति। यत्तु प्राचा व्याख्यातं दीर्घप्राप्ते ऋस्व
ऋकारः लृकारश्च विधीयत इति तन्न भाष्यकैयटादिविरोधादुपेक्ष्यम्। एङः पदान्तादिति। ङसिङसोश्चेत्यस्यारंभा
दस्य पदान्तविषयत्वे लब्धे उत्तरार्थं पदान्तादिति स्पष्टार्थमिह वक्तव्यम्। सर्वत्र विभाषा गोः। यद्यपि छन्दसीति न प्र
कृतं तथापि यजुष्षुर इत्यादि प्रक्रमाच्छन्दस्येवेदमिति संभाव्येत। अतः सर्वत्रेत्युक्तम्। तथा वष्टे लोके वेदे चेति
इह एङ् इत्यनुवर्त्य एङन्तस्य गोरिति व्याख्येयम्। तेनेह न। चित्रग्वग्रमिति। प्रतिपदोक्तस्य एङो ग्रहणान्नेह। हरि

मनो॰ स्क॰

त्रगोऽग्रम्। प्रकृतिभाव इति। प्रकृत्यांतः पादमितिसूत्रात्प्रकृत्येत्यनुवृत्तेः। यद्यपि भाष्ये एकोगुणवृद्धीतिसूत्रेनान्तःपादमिति पाठः स्थितः प्रायभाष्ये च्येवमुक्तं तथापि शाकलसूत्रे चक्रस्वशेति चकारेण प्रकृत्येत्यनुकृष्यत इति भाष्यदर्शनात्प्रकृत्यांतःपादमितिपाठोऽपि साधुरेव। नेतिपाठे तु सर्वत्रेति सूत्रेण पूर्वरूपमेव विकल्पत इत्यवधेयम्। अवङ् स्फोटायनस्य। अत्रापि एङन्तस्य गोरिति व्याख्येयम्। अचीति सूत्रयितुमुचितम्। विभाषानुवृत्तेः स्फोटायनग्रहणं पूजार्थम्। गवीति। यत्तु शावागवे इति प्रत्युदाहृतं तन्न। सत्यप्यवङि अतो गुण इति पररूपेण रूपसिद्धेः। न च सत्यवङि ङ्यदिशः स्यात् स्त्रियांतु टाप्स्यादिति वाच्यम्। सन्निपातपरिभाषया पादेशटापोः सुसमाधानत्वात्। न च सा अनित्येति वाच्यम्। तावतापि सर्गिकितप्रत्ययेष्टसिद्धेः। गवाक्ष इति। गवामक्षीवेति विग्रहः। अक्ष्णोऽदर्शनादिति समासान्तः। वातायने रूढोऽयम्। पुंस्त्वं लोकात्। इंद्रे च। आरंभसामर्थ्यान्नित्यमिदम्। इंद्रे च नित्यमितिपाठस्तु भाष्यासम्मतत्वादुपेक्षितः। एहि कृष्णेति। दूराद्धूते चेति प्लुतः। यत्तु कृष्णा३ एहीति प्रावोदाहृतं तन्न। दूराद्धूते चेत्यादौ वाक्यस्य टेरित्यधिकारात्। चक्र्यत्रेति। इकोऽसवर्णे इति कलोपो न। यणः कार्यकालपक्षे बहिरंगपरिभाषया असिद्धत्वात्। स्थानिवद्भावाच्च। पूर्वत्रासिद्धीयेनेति तु नास्ति। तस्य दोषः संयोगादिलोपेत्यादिकृतेः। दूराद्धूतेच। हूतमाह्वानं तच्च संबोधनमात्रोपलक्षणमित्यभिप्रेत्याह। दूरात्संबोधन इति। उपल

॥ राम ॥
॥ १५ ॥

(३०)

ह्नण तया व्याख्यानस्य फलमुदाहरति। सक्तून्पिबेत्यादि। गुरोरनृतः। अपि शाक्षो गुरोरगुरोश्चटेः प्लुतार्थः। देवदत्तेति। अ
स्य एहीत्यादि। एवमग्रेऽपि। सर्वः प्लुत इति। तथा च। अग्नीत्प्रेषणे परस्य चेति सूत्रे भाष्यम्। सर्वः प्लुतः साहसमनिच्छता वि
भाषा कर्तव्येति। साहसं शास्त्रत्यागः। तदनिच्छता शास्त्रमर्थं रुं धानेनापीत्यर्थ इति हरदत्तः। वैकल्पिके ष्वनुष्ठाने क्लेशं
धर्माधिक्यफलकमपि अशक्तत्वादनिच्छतेत्यर्थ इत्यन्ये। एतेन द्वैपायनो विरहकातर आजुहाव पुत्रेतीति भागवतव्याख्या
तम्। प्लुतस्य वैकल्पिकत्वात्। किं च। इह पुत्र शब्दस्य वाक्यान्तत्वं नास्तीत्यपि सुवचम्। आख्यातप्राग्वर्त्तिनो ह्यनुकरणासंभ
वात्। अपि च अस्तु प्लुतः। प्रकृतिभावस्तु वैकाल्पिकत्वान्मास्तु। तथा च ईवाक्रुवर्मणस्येति सूत्रे भाष्यम्। ईर्येहेणेन नार्थः। व
शाइयं वज्ञेयमिति। प्लुतप्रकृतिभावः सर्वोपि चाक्रुवर्मणमते नास्तीति भावः। अपि च। इह प्रकृतिभावो दुर्लभ एव। अप्लु
तवदुपस्थिते इति सूत्रात्। उपस्थितं नामावैदिक इति शब्दः। तस्मिन्परे प्लुतोऽप्लुतवत्स्यादिति हि तस्यार्थः। एवं च तु ह्यपि
निर्वाह्य स्पष्टे आर्षः प्रयोग इति श्रीधरोक्तिर्नादर्तव्या। द्विवचनमिति। सुप्तिङन्तमित्यत्र ग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे
तदन्तग्रहणं नास्तीति ज्ञापितत्वादिति भावः। तेनेह न। कुमार्यवि द्योश्च अगारं कुमार्यगारं वध्वगारमिति स्पष्टं चेदं भाष्यादौ।
द्विवचनान्तं प्रगृह्यसंज्ञं स्यादिति तु भावः प्रमाद एव। हरी एताविति। इह शाकल्येन। प्लुतप्रगृह्या इत्यत्र नित्यग्रहणादि

म्रियमाणोऽवतीर्य इन्द्रुमाकस्तत्रेदमब्रवीत्

नो॰ स्फ॰

त्युक्तम्॥ अत्र वृत्तिकारः॥ मणीवादीनां प्रतिषेधो वक्तव्य इति पठित्वा मणीवरोदसीव दंपतीव जंपतीवेत्युदाजहार॥ तत्र मुनित्रयानुक्तत्वादप्रमाणमिति कैयटहरदत्तादयः॥ एवं स्थिते मणीवोष्ट्रस्य लंबेते प्रियौ वत्सतरौ ममेति भारतप्रयोगं समर्थयते॥ इवार्थे इति॥ वशब्द इति॥ वं प्रचेतसि जानीयादिवार्थे च तदव्ययमिति मेदिनी॥ वा यथा तथैवेवं साम्य इत्यमरग्रंथव्याख्यावसरे शाश्वतं व पर्युर्यशाइति कालिदासप्रयोगस्याभियुक्तैरुदाहृतत्वात्॥ कादंबरवत्ति तदलानि वपंकजानीत्यादि दर्शनाच्चेति भावः॥ यत्तु पाणिनीयं वद्वा यथा तथेत्यादि तदयुक्तम्॥ नामलिंगानुशासने प्रक्रमे तद्धितस्य वतेरननुगुणत्वात्॥ अपत्यसम्प्रत्याहादिपर्यायमध्ये पठित्वा इन्द्रादीनामनुक्तेश्च॥ अदसो मात्॥ इह एकारो नानुवर्तते असंभवादित्यभिप्रेत्याह॥ ईदूताविति॥ ननु ऊकारानुवृत्तिर्व्यर्था स्त्रियौ फले वा अमू आसाते इत्यत्र पूर्वेणैव सिद्धेः॥ मुत्वस्यासिद्धत्वेऽप्येकारान्तत्वात् अत आह॥ रामकृष्णाविति॥ पुंसि पूर्वेण न सिध्यति ओकारान्तत्वादिति भावः॥ अदसो मादिति सूत्रं प्रति तु मुत्वमीत्वे नासिद्धे आरंभसामर्थ्यात्॥ एकारोऽपीति॥ तथा च॥ एकारानुवृत्तिर्तात्पर्यग्रहफलकं माङ्ग्रहणमिति भावः॥ अत्रेदं चिंत्यम्॥ ईदूत्सप्तम्यर्थे प्रगृह्यम्॥ अदसः॥ एद्बहुवचनमित्येव कुतो न सूत्रितम्॥ एवं हि पूर्वसूत्रे च्छमीदृग्ग्रहणं प्रकृतसूत्रे माङ्ग्रहणं च मास्तु॥ एकदेशानुवृत्तिक्लेशोऽपि नेति॥ शे॥ त्वां दसमपीदं संदर्भश्रुत्यर्थमुक्तम्॥ वस्तुतस्तु अनुकरणार्थ

॥राम॥

॥१६॥

(३२)

कानुनासिकवकारद्वयोपेतम् एकादशं रूपम्। अनुनासिकस्य द्वित्वे हलो यमामिति लोपस्यैवैकल्पिकत्वादकरणे त्रि
वकारं द्वादशं रूपं। परसवर्णाभावपक्षेऽनुस्वारस्य यय्त्वात्साद्विके द्वित्वे सङ्कलनया चतुर्दश। इतिशब्दे कारस्याप्र
णौ प्रगृह्यस्येत्यनुनासिकविकल्पादष्टाविंशतिरिति॥ ॥इत्यच्सन्धिः॥ ॥स्तोः श्चुना॥ स्तोरिति समाहारद्वन्द्वः। सौत्रं
पुंस्त्वम्। श्चुनेति सहयुक्ते ति सूत्रे विनापि तद्योगं तृतीयेति वक्ष्यते। योगे इति। एतदध्याहारलभ्यम्। अत्र स्थान्यादेश
योर्यथासंख्यम्। निमित्तकार्यिणोस्तु न। शादिति ज्ञापकात्। अल्पाच्तरमित्यादौ तु सौत्रत्वात् श्चुत्वं न। तज्ज्ञानमित्या
दौ तु भवत्येव। स्तोः श्वोः श्चुरिति सुवचम्। नच तस्मिन्निति निर्दिष्टे इति परिभाषोपस्थानेन यज्ञः याञ्चा इत्यादि न सिध्येत्।
शादिति लिंगेन तस्याः इहानुपस्थानाभ्युपगमात्। ष्टुना। इहापि कार्यिनिमित्तयोर्यथासंख्यं न। तोः षीति ज्ञापकात्। ष्टे
ष्टु इत्युचितम्। ईड्ढे ईष्टे इत्यादौ न पदान्तादिति ज्ञापकान्न दोषः। सर्पिष्टममिति। ह्रस्वात्तादाविति षत्वम्। प्रत्यये भा
षायामिति। यत्तु प्राचाम् अयटि नित्यमिति पठितं यच्च हलन्तप्रकरणे षण्णां षण्मामित्युदाहृतं यच्च यरोऽनुनासिके इति
वानुनासिक इति तत्र व्याख्यातं तत्सर्वं भाष्यविरोधादुपेक्ष्यम्। यवादिगण इति। यचि भं तत्सोमतर्घ इति संहितया पा

मनो. स्व.

ष्टेतसाविति तान्त्सर्वं दकारं प्रश्लिष्य भत्वेनाप्येतत्समाधातुं शक्यमिति। केचित्तु न्। मृन्मानिन्यादावतिप्रसंगात्। उदस्था।
अनुस्वारस्य ययीत्यत्र समस्तमपि सवर्णग्रहणं इह निष्कृष्य संबध्यते एकदेशे स्वरितत्वप्रतिज्ञानादित्याशयेनाह।
पूर्वसवर्णः स्यादिति। अघोषस्येत्यादि। एतेन सस्य तकार इति प्राचां ग्रंथाः प्रत्युक्ताः। यदप्याहुस्तयोर्द्वितीयाः शरीत्य
स्यापन्यसनं तदपि रभसात्। तच्छिवरीति। यत्तु प्राचा तत्र शिवइत्यत्र जश्त्वे कृते खरि चेत्युक्तं तन्न। तदोदात्तत्वेन
जश्त्वोपन्यासवैयर्थ्यात्। यत्तु तत्सौत्रेणोक्तं तदोवावसानइति चर्त्वे कृते पश्चाच्छिवइत्यनेन संबंधे सत्यां जश्त्वा ।।राम।।
त्व इति जश्त्वे खरि चेति चर्त्वं निमित्तं दतिरुष्टवीयः। जश्त्वं प्रति अवसाने चर्त्वस्यापवादत्वात्। जश्त्वे शिवशब्देनापल ।।१८।।
णाच्च। भाविन्यवसानभंगे वावसाने इत्यस्य पूर्वमप्रवृत्तेश्च। प्रवृत्तस्य वा निवृत्तेरसंभवात्। तदुक्तम्। अकृतव्यूहाः
पाणिनीया इति। कृतमपि शास्त्रं निवर्तयन्तीति च। अन्यथा हरिरयमित्यत्रापि लघुतरीत्या प्रवृत्तो विसर्गः केन
वार्यताम्। अथ तनोतीति तदिति किं चर्त्वं रूपे एवमपि जश्त्वेन दकारोऽस्तु चर्त्वे कृते तु त्वमिति तन्न्याय्यं तुत्वे
प्रति चर्त्वस्यासिद्धत्वात्। यत्तु नमुनेइत्यत्र नेति योगं विभज्यासिद्धत्वमिह नेत्याहुः तदपि न। असिद्धत्वेऽपि

35

तया लोकार्थमपि संभवत्येव। त्वेरायो मेराय इत्यादौ त्वे इति मे इत्यनुकरणे प्रयोजनलाभात्। अस्मे इति। अस्मभ्यमित्यर्थः। भ्यसः
सुपां सुलुगिति शे आदेशः। शेषे लोपः। निपात। अनाङिति पर्युदासादेवास्य पनिपाते लब्धे निपातग्रहणमुत्तरार्थम् स्पष्टार्थ
मिद्रेव कृतम्। आ एवमिति। पूर्वप्रक्रांतवाक्यार्थस्यान्यथात्वद्योतकोऽयमाकारः। पूर्वमित्थं न मंस्था इदानीं त्वेवं मन्यसे
इत्यर्थः। आ एवं किलेति। स्मरणद्योतकोऽयमाकारः। वाक्येत्यादि। तथा च भाष्यम्। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् इति।।१।। अत्राङिल्लक्षण एव तात्पर्यं लाघवात्। अन्यस्य ङित्वं त्वर्थसिद्धम्।
ईषदर्थ इत्यादिरुक्तः अर्थानुवादः। एवञ्च अत्र आँ अपह्नत्य न सम्भवार्थत्वेन प्रकारस्य ङित्वादाऽनुनासिकश्रु
दसाति प्रवर्त्तत इति भावः। ओत्। निपातः किम्। देवोऽसि। वायवायाहि। संबुद्धौ। ऋषिर्वेदः तदुक्तमृषिणेत्यादौ तथाद
र्शनादित्यभिप्रेत्याह। अवैदिक इति। संबुद्धौ किम्। अले इति। अत्र परत्वाद्विकल्पो मा भूत्। यत्तु चादित्यत्र निपाता
नुवृत्तेः इहत्वसंबुद्धिग्रहणास्य प्रत्युदाहरणं हत्यादावुक्तं गवित्ययमाहेति तन्न। तत्र प्रगृह्यसंज्ञा सत्त्वेऽपि प्रकृति
भावाप्रसक्तेः। इकोसवर्णे इत्यत्र हि पदान्तग्रहणमनुवर्त्तत इत्याकरे स्पष्टम्। एवं च प्लुतप्रगृह्या इति सूत्रेऽपि तत्सं

षयकृत्या
नुवादः ६

मनो॰ क॰

बंध आवश्यकः। गाविति वनपदम्। अनुकार्यानुकरणयोर्भेदविवक्षया ऽर्थवत्त्वाभावेन विभक्तेरनुत्पादात्। उञः। निपात
एकाजिति प्राप्ते विभाषेयम्। ऊँ। अनुनासिक इति। तेनास्मिन्परे यरोऽनुनासिक इति विकल्पः। यदेतन्नँ इति पठसि यदेत
दूँ इति वा तद्दीर्घमित्यादि। एतदर्थमेव तत्रानुनासिकग्रहणम्। अन्यथा यरोऽनमिऽनम्वेत्येवा वक्ष्यत्। मयउञो वो वा। मयः
परस्येति। पराद्दिति तु प्राचः प्रमादः। षष्ठीनिर्दिष्टस्य ह्यादेशा उच्यंत इति भाष्यात्। आदेशविधौ स्थानिनः षष्ठ्या एवव्या
प्यत्वाच्च। असिद्धत्वादिति। अत एव देवत्वं निपाद्यो विधीयते प्रकृतिभावमात्र बाधनार्थत्वे हि इकोयणित्यनन्तरं म
यउञो वेत्येवा वक्ष्यत्। यणं त अन्ववर्तयिष्यत्। इह मयउञ इतौ परे ऽष्टाविंशती रूपाणि। तथाहि। उञ इति प्रगृह्यत्वे
किमु इति। वत्वपक्षे किम्विति। ऊँ आदेशे किमूँ इति। आदेशस्य स्थानिवत्त्वेन मयउञ इति प्रकृतिभावापवादत्वे
आन्तरतम्यादनुनासिके वकारे किम्वँ इति। अनुनासिकाननुनासिकयोर्वकारयोर्मयो यण इति द्वित्वस्य मकार
स्यानीचेति द्वित्वस्य च विकल्पेन वत्वपक्षे रूपाष्टकम्। तदभावे द्वयमिति दशकम्। प्रगृह्यसंज्ञाविरहपक्षे तु मयउ
ञ इति वत्वस्यासिद्धत्वादिको यणचीति यणेव। तस्यासिद्धत्वान्मोऽनुस्वारे वा पदान्तस्येति परसवर्णपक्षे अनुनासि

॥ राम ॥
॥ १७ ॥

रूपसिद्धेर्नि बाधार्यायोगविभागस्य अगतिकगतित्वात् तस्य इहाश्रयणे प्रमाणाभावात्। आर्कं स्यत इति। आङ्। उरूमनइ
तितङ्। स्तुक्रमोरिति नेट्। समसंबंधी विधिरिति। समकर्मकं विधाननिमित्तं नोक्तम्। अनुवाद्ययोरपि यथासंख्य
स्येष्टत्वात्। सम्मूला कृतजीवेषु हन् कृञ् ग्रहः इत्यत्र यथा। क्रोः। कु कू कु को। पूर्वनिरत्वात् प्राङ् क्सायेइत्यत्र सात्
दाद्योरिति षत्वं न। सुगणी णत्। सायेइत्यत्र न पदान्ता द्योरिति ष्टुत्वं न। पुष्करे तीर्थविशेषे सीदतीति पुष्करसत् तस्याप
त्यं पौष्करसादिः आचार्यः। बाह्वादित्वादिञ्। अनुशतिकादित्वादुभयपदवृद्धिः। ङः सि धुट्। उभयनिर्देशे पंच
मीनिर्देशो बलीयान् परत्वादित्यभिप्रेत्याह सस्येति। सीति सप्तमीनिर्देशस्तु लाघवार्थः। षट् त्सन्त इति धुट् श्चत्वे
न तकारः। ष्यत्वाङः। त्रयो द्वितीया इति पक्षे तस्य थ इति तन्न। त्वस्यासिद्धत्वात्। अत एव धुड्भावे षट् सन्त इत्य
त्र टस्य ठो न। टकार नकार विसर्गाणां द्वित्वविकल्पात् षोडश। खयः शर इति सकारद्वित्वे द्वात्रिंशत्। न च तत्र त्वे
स्यासिद्धत्वं शंक्यम् पूर्वत्रासिद्धीयमद्वित्वे इत्युक्तेः। नवशरो वीति निषेधः शंक्यः। तस्य सोत्वद्वित्वमात्रविषय
त्वात्। अत एव शरः खय इति वार्तिकस्य वत्सरः अप्सरा इत्युदाहरणं भाष्ये दत्तम्। धुटः परादित्वं न पदान्ता
दिति ष्टुत्वनिषेधार्थम्। अत एव वक्ष्यमाणस्त्रिगिहैव न कृतः। यत्वाङः। एवमपि प्रक्रियालाघवार्थं त्विवक

प नो॰ शु॰

त्तुमुचितमिति। तन्न। चयोर्द्वितीयाइतिपक्षेथकारापत्तेः। श्चुत्वं धुटिसिद्धं वाच्यम्। अटतीय इ श्चोतातिङ्रुधुण्म।
शितुक्। शीतिसप्तमी पूर्वत्र कृतार्थायाः नइतिपंचम्याः षष्ठीं कल्पयतीत्याह नस्येति। ननु प्रकृतो धुडेवास्तु।
किंतु कामेवं। शश्चोटीत्यस्य हि पदान्ताज्झयः परस्य शस्य छ इत्यर्थ आकरोक्षितः। एवं नधुटः परादित्वात्स
र्वेषु रित्यत्र छो न स्यात्। पूर्वा इपेरोणादिके श प्रत्यये मधुश्चो तत्यभितोविरप्ता मित्यादो यथा। अतः पूर्वो
त्तस्कृकृतः। नन्वेवं कुर्वञ्च्छेते इत्यत्र पदान्तस्येति णत्वनिषेधो न स्यादिति चेन्न। कार्यकालपक्षे बहिरंग ।।राम।।
त्वेन तुकोऽसिद्धत्वात्। यथोद्देशे तु स्तोः श्चुनेति योगो विभज्यते नेति वर्त्तते णइति च। स्तोश्चुना योगे णत्वं न स्यात्। ।। १९ ।।
नकारार्थमिदम्। सकारग्रहणं वर्गग्रहणं चोत्तरार्थम्। ततः श्चुरिति। पूर्वमनुवर्त्तते। एवं च नश्चेतिस्त्रे च कुर्वन्त्सी
दतीत्यत्र पदान्तस्येति णत्वप्रतिषेधो धुटः परादित्वे प्रयोजनमिति शास्त्रोग्रंथोपि यथोद्देशपक्षे बोध्यः। यत्तु व
दन्ति। इदं प्रयोजनं बहिरंगपरिभाषया गतार्थत्वात्प्रयुक्तमिति तत्साह्निकम्। त्रिपादीस्थे त्वंतरंगे परिभाषेयं
न प्रवर्त्तत इति सुद्युपास्य इत्युदाहरणे स्वोक्त्या सह विरुद्धं चेत्यास्तां तावत्। सच्छ्रंभुरिति। इह श्चुत्वं तुकोर
सिद्धतामाश्रित्य नश्छु वीति रूपं नाशंक्यम्। श्चुत्वस्यासिद्धत्वात्। ङमोह्रस्वात्। ङम्प्रत्याहारः। संज्ञायां त

38

२

कृतं टित्त्वं सामर्थ्यात् संज्ञिभिरभिसंबध्यते। तेन यथासंख्यं ङुट् णुट् नुटः प्रवर्तन्ते। नित्यग्रहणं विस्पष्टार्थं। ह
म परे इति। मय उञो वः इति वा विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात्। स्रुगण्णीशा इति। एयङ्लोपौ नस्था
निवत्। पूर्वत्रासिद्धे तन्निषेधात् ङमुटः परादित्वं कुर्वन्नास्त इत्यत्र णत्वप्रतिषेधार्थं। अत एव ङमो ह्रस्वादचि
ढ इति नास्ति कृञि। पौर्णत्वं प्रतिषेधस्य द्वित्वस्य सिद्धतया पात्वापत्तेरिति प्रांचः। यत्वाङः। बहिरंगपरिभाषया ग
तार्थत्वादुभयमप्यसंगतमिति तदपि पाक्षिकम्। राज्ञ इत्यत्रेव यथोद्देशे त्रैपादिके तरंगेपरिभाषाविरहस्योक्त
त्वेन प्रार्वीयं ग्रथस्य सोढत्वात्। कथमन्यथा द्वियं त्रियं त्वस्वयमेवोक्तमिति दिक्। ननु परमदण्डिना विद्यादावं
तर्वर्तिविभक्त्या पदान्तत्वान्नुड्स्यादिति चेत्। न। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात्।
अत एव परमवौ वा परमगोदुहौ परमलिहावित्यादौ कुत्वघत्वढत्वादीनि न। यत्तु प्रावाउञि च पदे इत्यनुवर्त्य
अजादेः पदस्येति व्याख्यानात् ङमुण्नेत्युक्तं तदनेन प्रत्युक्तं इहैव नलोपं वारयितुमुक्तरीतेरवतेनाप्यनुसर्त
व्यत्वात्। समः सुटि। यद्यपि मोऽनुस्वारेण सिद्धं तथाप्यनुनासिकत्वं त्रिसकारकत्वसिद्ध्यर्थमिदम्। अत्रानु
नासिकः॥ अयमधिकारो विधिर्वेति द्वैतम्। आद्ये अत्र ग्रहणमनर्थकं। अधिकारादेव रुप्रकरणलाभा

नो॰सू॰

त। तुशब्दस्तु अधिकारपक्षे परस्मात्कार्यिणो विशेषद्योतनार्थः। परस्य नित्यं रुत्वं पूर्वस्य तु वाऽनुनासिक इति।
विधिपक्षे व्यर्थः। वाग्रहणं स्पष्टार्थम्। अनुनासिकात्परः इति ज्ञापकादेव सिद्धेः। नहि विकल्पं विना अनुनासि
काभावपक्षे इति संभवति। इदमेव ध्वनयितुं तत्रैतु वेति शब्दौ नोक्तौ। अनुनासिकात्। लुप्यते लोपे पञ्चमीत्याह।
अनुनासिकं विहायेति। एवं च संसर्गविधिप्रयोगस्यापि विशेषावगतिः हे तु चादवत्साधेतुरानीयतामित्यत्र वर्ते भाविता
नुनासिकत्वगुणक एव उपस्थितत्वादाकांक्षितत्वाच्चावधित्वेन संबध्यते इत्यभिप्रेत्याह रोः पूर्वस्मादिति। अनुस्वारागम
इति। आगमत्वं च परशब्दे नैव लभ्यते। पूर्वौ तु ताभ्यामैजित्यत्र पूर्वशब्दे न एवोरिवेति भावः। विसर्जनीयस्य सः। खरी
ति। एतच्च खरवसानयोरिति सूत्रान्मण्डूकप्लुत्याऽनुवर्तते। न चानुस्वारस्यानन्तरत्वात् ततः परस्य षत्वं न स्यादेवेत्या
शंक्याह अनुस्वारविसर्गेत्यादि। अकारोपरीति। यदि तु इकारोपरि पठ्येत रंस्तर्हि पयः सुयशः सुरित्यादौ इणः पर
स्येति षत्वं स्यादिति भावः। अत्वादिति। न चैवं हरिः कर्त्ता हरिं स्मरेदित्यादौ यणादिप्रसंगः त्रिपादीस्थत्वेन विसर्गादीना
मसिद्धत्वात्। अनुस्वारस्यापि सिद्धत्वमिति। अपि शब्दात् ककारस्य। व कनांतरे णोति। अवोरहाभ्यामिति कृते पियणो मयइ
ति भवत्येवेति भावः। पुमः खय्यीति। पुंसः संयोगांतलोपे कृते वशिष्टभागस्येदमनुकरणम्। पर्युदासादिति। इदु

॥राम॥

॥२०॥

तणीति संज्ञा सूत्रे दसोर्ग्रहणम्॥ ६

वक्ष्यमा

दुपधस्येति षत्वविधायके सूत्रे इति भावः। अप्रत्ययस्य यो विसर्ग इति वैयधिकरण्येन व्याचक्षाणानां प्राचां मतेनेदम्। आसिद्ध

णारीत्या सामानाधिकरण्येनान्वये तु षत्वप्राप्ताविति बोध्यम्। ख्या आदेश इति। आदेशो हि उपदेशे रवृतादिः। यत्वस्यासिद्धत्वा

प्रकरणे णत्वानन्तरं रषृताभ्यः शस्य यत्वं विकल्प्यते। तेन सुप्रख्येन निर्दिष्टं सौप्रख्यं तत्र भवः सौप्रख्यीयः। यत्वस्यासिद्धत्वा

प्रकरणे णत्वानन्तरं रषृताभ्यः शस्य यत्वं विकल्पते। तेन सुप्रख्येन निर्दिष्टं सौप्रख्यं तत्र भवः सौप्रख्यीयः। यत्वस्यासिद्धतया अम्परत्वाभावात् पुमः खय्यीति

रुत्वं नेत्यर्थः। पुंख्यानमिति। वश्चि ञोल्युट्। ख्याञादेशः। ननु आदेश इह दुर्लभः। वर्जने प्रतिषेधः। असनयोश्च

तिवार्तिकादिति चेत्। सत्यम्। बहुलं तण्येन्न वधक गाञ्चविचक्षणाजिराद्यर्थमिति वार्तिके बहुलग्रहणात्समाधेय

म्। तथा च रषृतादित्व प्रयोजनगणने वार्तिकम्। रु विधिः पुंख्यानमिति। णत्वं पर्याख्यानमिति निष्ठानत्वमाख्यात इति

व। शकारेणाव्यवधानात् हृत्यच इति णत्वं नेत्यर्थः। आख्यात इत्यत्र संयोगादेरातः इति नत्वं न। यत्वस्यासिद्धत्वाद्ध

णूवत्त्वाविरहात्। एवं च नच्याख्येति सूत्रे ख्याग्रहणं न कर्तव्यमिति भावः। न च ख्या प्रकथने इत्येतदर्थं तदिति वाच्यं।

तस्य सार्वधातुकमात्रविषयत्वात्। अत्र च संस्थानत्वं नमः ख्यात्रे इत्युत्तरवार्तिकं प्रमाणम्। सस्थान इति जिह्वामू

लीयस्य प्राचां संज्ञा। सह हन। शर्परि विसर्जनीय इत्यस्य प्रवृत्तेरित्यर्थः। यदि तु स्वतं त्रोपिधातुरार्थधातुके रघ्येतत

नो॰ सु॰

दाजिह्वामूलीयस्य दुर्वारतया इदं वार्तिकमसंगतं स्यात्। यत्तु हरदत्तमाधवादिभिरूक्तं धातुरपि खाद्यादिः यत्वविधिरभुभयसाधारणाइतितच्चिंत्यम्। भाष्ये वर्त्विः एवोप्युक्तमात्सार्वधातुकेपि क्त्रादिप्रयोगापत्तेश्च। न वेष्टापत्तिः। माधवेनार्धधातुके चेवायं खाद्यादिरित्युक्तत्वात्। सार्वधातुके नभिधानस्येव स्वारणीकर्तव्यत्वात्स्यागोरवयस्तत्वाबेत्यास्तांतावत्। स्यादेतत्। बहवः पुमांसो ऽस्मिन्कुले बहुपुंस्काणीत्यत्र रुत्वं स्यात्। डरः प्रभृतिषु पुमः शब्दस्येकवचनान्तस्येव पाठात्तेन रुकः। सार्वधातुकेत्र ख्यातेः प्रयोगेनिर्बाधिए वेतिचेत्। इष्टापत्तेः संहितायामविवक्षायां तुरुत्वं नेतिस्पष्टमेव। यत्तु ग्राख्याधातौ नेति केचिदित्युक्तं तत्र यदि ख्याञादेशस्त्यर्थस्तर्हि केचिदित्यनुचितम्। स्वतंत्रधातौ चेत्तर्हि सार्वधातुकविषयेपि निषेधः स्यात्। न वेष्टापत्तिः निर्मूलत्वात्। न किं स्त्रायस्वेति। यत्तु प्राचा त्राहीत्युक्तं तत्र परस्मैपदमयुक्तम्। त्रायतेर्ङित्वात्। त्रायत इति त्राः सर्वान्तरत्यर्थेकर्तरि क्विब त्राद्यवारकं पिवाबोध्यम्। प्रशानिति। प्रपूर्वाच्छाम्यतेः क्विप्। अनुनासिकस्य क्कीति दीर्घः। मोनो धातोरिति नं स्यात्प्रि द्वत्वान्नलोपो न। नृन्पे। पकारोपर्यकारउच्चारणार्थः। तेन नॄँः पुनातीत्यादि सिद्धम्। उभयथर्क्षु इत्यत उभयथेत्यनुवृत्तेर्विकल्पः फलितस्त्याशयेनाह। रुः स्यादिति। कुप्वोः। स्त्रत्रेखपरत्वाद्विसर्गः। जिह्वामूलीयस्य खत्वात्खपरिशरा इति विसर्गलो

॥ राम ॥

॥ २१ ॥

त

(५१)

पः। जिह्वामूलीयस्य शर्त्वे तु वा शरीति विसर्ग एव वा। आदेशयोः कपावुच्चारणार्थौ। वाद्विसर्ग इति। यत्तु प्राचा वाद्विकल्प इत्यु
क्तं तन्न। ≍कः ≍पाभ्यां मुक्ते विसर्जनीयस्य सत्वप्रसंगात्। कानाम्रेडिते। कान्कानीति वाच्ये आम्रेडितग्रहणाय त्वद्विरु
क्तिस्तत्रैव यथा स्यात् इह मा भूत्। कान् कान् पश्यसीति। अत्र च एकः किंशब्दः प्रश्ने द्वितीयः क्षेपे कान् कुत्सितान्प
श्यसीत्यर्थः। कस्कादिषु च। अत्र प्राचा एषु विसर्जनीयस्य ≍कः ≍पौ नेत्युक्तं नासौ स्वार्थः ≍कः ≍पयोः स्वरितत्वात् न
चाप्रकृतत्वात्। किंतु आर्थिकार्थकथनं तत् इति ध्वनयन्नाह। ≍कः ≍पयोरिति। कौतस्कुत इति। कुतः कुत आगत इ
त्यर्थेऽव्ययात्त्यपि प्राप्तेऽपि गणपाठसामर्थ्यादण्। सर्पिष्कुण्डिकेति। नित्यसमासे इत्येव सिद्धे इह पाठस्य प्रयोजनं तु त
त्रैव वक्ष्यते। सनासुरेति। यदि हि व्रश्चस्य तुक् स्यात् तर्हि व्रश्चस्य वत्वे सति वद्वयं स्यात् सन्निपातपरिभाषया तत्वाप्र
वृत्तौ तु वकारोपरि वकारः श्रूयेतेति भावः॥ ॥इति हल्सन्धिः॥ ॥शर्परे। सत्वादेरयमपवादः। यदि तु शर्परे नेत्येवो
च्येत तर्हि प्रकृते सत्वे निषिद्धेऽपि ≍कः ≍पौ स्यातां। वासः क्षौमं अद्भिः प्सातमिति। विसर्जनीयवचनात्तु विकारमा
त्रं बाध्यत इत्याशयेनाह। नत्वन्यदिति। तदेव स्फुटयति इहेति। सोऽपदादौ। अपदाद्योरिति। सूत्रे तु व्यत्ययेनैकव
चनम्। यदि तु खर्विशेष्यते अपदादौ खरीति तदा पयः श्वेतं साधु किं तु खरीति मंदकस्तुत्या अनुवर्त्यमिति क्लेशः।

43

मनो॰सु॰

नचानुवृत्तेरुत्तरत्रावश्यकता। स्वरं विना विसर्जनीयस्य दुर्लभत्वेन तदनुवृत्तेर्निष्फलत्वात्। पाशकल्पककाम्येष्विति
वृत्तिः। संभवप्रदर्शनमेतत्। नतु परिगणनम्। अन्यस्यासंभवात्। प्रातःकल्पमिति। अधिकरणशक्तिप्रधानस्यापि
प्रातःशब्दस्येह वृत्तिविषये शक्तिमत्परत्वम्। दोषाभूतमहः दिवाभूता रात्रिरितिवत्। गीः काम्यतीति। इह इणः
षः इति षत्वं न। तत्रापि काम्ये रोरेवेत्यस्यानुवृत्तेः। यदि तु तत्रैवेदं पठ्येत तर्हि षत्वमात्रप्रतिषेधेऽपि पूर्वेणासत्वं
स्यात्। इणः षः। पूर्वस्यापवादः। इदं सूत्रं चेंस इति च द्वयमप्युत्तरत्रानुवर्त्तते। तेन यथासंभवं इणः परस्य षः अ
न्यस्य स इति विवेकः। पुरः प्रष्ठव्याः इति। पूः पालनपूरणयोः। भाजभासेत्यादिना क्विप्। तदन्ताज्जसं जसन्त
तां स्फुटीकर्तुं पूः पुरावित्युपन्यस्तम्। इदुदुपधस्य। इदुतौ उपधे यस्य समुदायस्य तस्यावयवो यो विसर्जनीय
इति वैयधिकरण्येन संबंधः। अप्रत्ययस्येति तु अप्रत्यययोर्यो विसर्ग इति संबध्यते। संभवति सामानाधिकरण्ये
वैयधिकरण्यस्यान्याय्यत्वात्। न च विसर्गस्य प्रत्ययत्वमप्रसिद्धमिति वाच्यम्। अग्निः करोतीत्यादौ स्थानिवद्भा
वेन तत्प्रसिद्धेः। न चातिदेशं प्रति त्रिपाद्या असिद्धत्वं शंक्यम्। अप्रत्ययस्येति निषेधेनैव सिद्धत्वज्ञापनात्। अ
न एवाग्निरित्यादौ रोर्विसर्गः सिद्ध्यति। अन्यथा अपदान्तत्वान्न स्यात्। विसर्गविधिस्तु पुनरित्यादौ चरितार्थः।

॥राम॥
॥२२॥

45

ज्ञापकं च विशेषापेक्षम्। तेनायः परस्मिन्निति निपात्यां न प्रवर्त्तते। एवं च पूर्वत्रासिद्धेन स्थानिवदिति सिद्धान्तः। उक्तयुक्तिमू
लकोन तु वाचनिक इति प्रपंचितं शब्दकौस्तुभे ऽस्माभिः। नन्वेवं मातुः कार्यमित्यादौ षत्वं स्यादिति चेत्। न। कस्कादि
षु भ्रातुष्पुत्रशब्दस्य पाठेन ङसिङसोरतउकारात्परस्य षत्वं नेति ज्ञापनात्। एवं च अप्रत्ययस्येत्येतदपि व्यधिकरणामे
वेति हरदत्तोक्तं नातीवादर्त्तव्यम्। मातुरिति। अत्र हि ऋत उदित्येकादेशशास्त्रं विसर्गं प्रति परंपरया प्रयोजकम्। आ
कारे तु एकादेशनिमित्तादिति प्रचुरः पाठः। तत्र एकादेशशास्त्रं निमित्तं यस्य उकारस्य तस्मादित्यर्थः। मुहुः कामेति।
रहकुभ्योः ॥क॥ पाविति प्रवर्त्तते ह्नो मुहुः कामेतिक्किति सकारः पठ्यते तत्रामादिकमिति हरदत्तः। द्विस्त्रिश्चतुरि
ति। इह द्वित्रिभ्यां सुज् न त्वाभ्यां साहचर्याच्चतुः शब्दोपि सुजन्त एव ग्रहीष्यते। कृत्वोर्थग्रहणं तु ज्ञापकम्। साहचर्यं न स
र्वत्र व्यवस्थापकमिति तेन दीधीवेवीटामित्यत्र धातुसाहचर्ये ऽप्यागमस्येटो ग्रहणम्। उभयत्र विभाषेयम्। चतुरित्य
स्य इदुदुपधस्येति प्राप्ते इतरयोरप्राप्ते। न च तयोरपि इसुसोः सामर्थ्य इत्यनेन सिद्धिः शंक्या। इसः प्रत्ययस्य अर्थव
तश्च तत्र ग्रहणात्। चतुष्कपाल इति। इदुदुपधस्येति नित्यं षः। व्यपेक्षाविरहेपीति। तिष्ठतु सर्पिष्कुंडिकामानयेत्याद
वित्यर्थः। व्यपेक्षायामिति। इदं सर्पिष्कुंडिकायाः इत्यत्रेत्यर्थः। पत्नु पारायणिका आह। कस्कादिषु सर्पिष्कुंडि

45

मनो॰ सु॰

कादीनां पाठ उत्तरपदस्थत्वेऽपि षत्वार्थ इति तन्न भाष्यविरोधादुपेक्ष्यम्। अयः सहितेति। नत्वयसो विकारः। जानपदेति ङीष् प्रसंगा
त्। अयस्कर्णीति। अय इव कर्णौ यस्याः नासिकोदरोष्ठेत्यादिना ङीष्। अधःशिरसी। एतयोरिति। सूत्रे तु षष्ठ्या स्थाने प्रथ
मा बोध्या। अधस्पदमिति। मयूरव्यंसकादित्वात्समासः। शिरस्पदमिति। षष्ठीसमासः॥ ॥इति विसर्गसन्धिः॥ ससजुषो
रुः। पदस्येत्यनुवृत्तं ससजुर्भ्यां विशेष्यते। विशेषणेन तदन्तविधिः। न च सजुःशब्दांशे ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नो
स्तीति निषेधः शंक्यः। तस्य प्रत्ययविधिविषयत्वात्। सान्तं सजुष्शब्दान्तं च यत्पदं तस्य रुः स्यात् स चालोन्त्यस्य। एवं स्थिते फलि ॥राम॥
तमाह। पदान्तस्येति। सजुष्शब्दस्येति। तदन्तस्य पदस्येत्यर्थः। तेन सजुषावित्यादौ नातिप्रसंगः। न च सजूरित्यत्राव्याप्तिः। ॥२३॥
व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधादिति वाच्यम्। येन विधिरिति सूत्रे शब्दकौस्तुभेऽस्य प्रत्याख्यातत्वात्। व्य
पदेशिवद्भावोऽप्रातिपदिकेनेति [illegible] ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधि
विषयकमिति दिव उत्सूत्रे कैयटहरदत्ताभ्यामुक्तत्वाच्च। एवं च परसजुर्भ्यामित्याद्यपि निर्बाधम्। एवं स्थिते इह सजुष्
शब्दे न तदन्तविधिर्नेति प्राचामुक्तिरापाततः इत्यवधेयम्। भोभगो। असंधिः सो व इति। भगो अघो शब्दयोरोकारस्याका
रस्य च पूर्वरूपं सोऽत्र त्वान्तेत्यर्थः। यदि तु भोस् भगोस् अघोस् इति सान्तं रान्तं वाऽनुकृत्य भो इत्यादीनां त्रयाणां अलोऽ

न्नसपयः स्यादपूर्वस्य योऽश्चेतिव्याख्यायते तर्हि असंधिर्न्याय्य एव। युक्तं चैतत्। अन्यथा विभो रिदं सुप्रभा गौर्यस्य सुप्रभगुः तस्य सुप्र
भगोरिदम्। रघोरिदं इत्यत्रापि यत्वापत्तेः। भवति ह्ययं भोशब्दादिः पूर्वो रुः। न चात्र भोशब्दे लाक्षणिकत्वाद् ग्रहणम्। विभा
षा भवद्भगवदघवतामोच्चावस्येति वार्त्तिकेन निष्पन्नानां भवदादिप्रकृतिकानां भोशब्दादीनामपि लाक्षणिकत्वाविशेषा
त्। अनर्थकत्वमप्युभयत्र तुल्यम्। रुविशिष्टानामेवार्थवत्वात्। ननु रोरुकारस्यानुबंधत्वाद् फमात्रं विसर्गस्य स्थानितया
न अनल्विधाविति स्थानिवद्भावो न स्यादित्याशंक्याह नह्ययमिति। यथा ग्रहादित्यत्र ग्रहो लिटीति दीर्घस्य स्थानिवद्भा
वेन इड्ग्रहादि टि ईटीति प्रवर्तते। एवमिहापि विसर्गस्य रुत्वाद्यत्वं प्रवर्त्ततेवेति भावः। तथा च स्थानिवत्सूत्रे भाष्यम्। विशिष्टं
ह्येषोऽनल्माश्रयते इष्टं नामेति। इतोपि हेतोर्धा लंगे त्यादिपरिगणनमशुद्धमित्यवधेयम्। निपाता इति। भो भगो इति सूत्रे
निर्दिष्टाश्चादेराकृतिगणत्वान्न च बोध्याः। तथा च विभाषा भवद्भगवदित्यादि वार्त्तिकं नाश्रयणीयम्। अन्यथा उल्लिंगैक
वचनमात्रे भो हरे इत्यादि सिद्धावपि भो हरिहरौ भोविघ्नद्वंद्व भोर्गंगे इत्यादि न सिध्येदिति भावः। एतच्च वृत्तिकारहर
दत्तादिमतेनोक्तम्। भाष्यस्वरसरीत्या तु विभाषेत्यादिवार्त्तिकमारभ्यमेव किंतु निपातोपि भोःशब्दोस्ति। तेन द्विवच
नादौ स्त्रीनपुंसकयोश्च नोक्तदोषः। युक्ततरं चैतत्। हे भवन्निति वत् हे भो इति प्रयोगस्यापीष्टत्वात्। तस्य च वार्त्तिका

मनो. सु.

रंभ एव सिद्धेः ॥ स्युः पाट् प्याट् अंग हे है हे भो इत्यमरोक्तानां तु संबोधनार्थानां निपातानां सह प्रयोगायोगात्। किञ्च। तत्र भवान् ह
रिः अत्र भवान् ततो भवान् इतिवत् तत्र भो इत्याद्यपि वार्त्तिके सत्येव सिध्यति। इतराभ्योपि दृश्यन्त इति सर्वविभक्त्यन्तात् त्र
तसोर्भवदादियोग एवेष्टत्वात्। किञ्च। आमंत्रितस्य पदात्परस्य आष्टमिकनिघातः। आमंत्रितं पूर्वमविद्यमानवद्भा
वः। आम एकान्तरमिति विधिः। वाक्यादेरामंत्रितस्येति द्विर्भावः। सुबामन्त्रिते इति परांगवद्भावश्चेत्यादि सर्वं सिध्यति न
त्वयथेति दिक्। भगो अघो इति तु निपातावपि यदि प्रामाणिकौ तर्हि स्तां नाम। आमंत्रितकार्यसिद्धिस्तु वार्त्तिकायत्तैवेति सु ॥ राम
धीभिराकलनीयम्। यत्तु वदन्ति। सकारान्तानेवैतान्निपातानाश्रित्य रुत्वोत्वे भाष्ये प्रत्याख्याते इति तन्न दतिरभसात्। ख्या ॥ २४
देतत्। निपातानामनभ्युपगमे यत्त्वविधौ तत एव गृह्णीरन्। प्रतिपदोक्तत्वात्। न तु संबुद्ध्यंताः। लाक्षणिकत्वादिति चेत्तामे
वम्। स्वरितेनाधिकारः इत्यत्राधिकः कारो ऽधिकार इति व्याख्यानमाश्रित्य लक्ष्यानुरोधेन स्वरितत्वमाश्रित्य उभयग्र
हणात्। भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृतिग्रहणं लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थं इति ह
रदत्ताद्युक्तेश्च। नैवमपि प्रभोरिदमित्यादावतिव्याप्तिः। परस्परसाहचर्येण निपातानां वार्त्तिकोक्तानां न ग्रहणेऽ
न्येषामग्रहणात्। व्योर्लघु। लघुप्रयत्नतरः लघूच्चारणतरः स वान्तरतम्याद्ध्रस्वस्य यस्य य इत्याहुर्वयाविति। आ

48

तोगार्ग्यस्य। ओकारादिति। यत्तु ओकारांताद्गादिति प्राचा व्याख्यातम्। तन्न। अंगस्याप्रकृतत्वात्। असंभवाच्च। नह्युदाहरणे
षु ओकारान्तमङ्गमस्ति। हलि सर्वेषाम्। यकारस्येति। वकारस्य तु नानुवर्तते भोभगोअघोअपूर्वस्यासंभवात्। अपूर्वस्य
यद्यपि संभवति वृक्षवृक्करोतीति तथापि तत्र लोपाप्रसंगः। अशीत्यनुवर्त्य अशा हलो विशेषणात्। वृक्षवृह सतीत्यादि
तु अनभिधानादसाधु इत्याहुः। गव्यमित्यत्र तु पदान्तत्वं नास्ति। गव्यूतिरित्यत्र तु वकारप्रश्लेषान्न वलोपः। रुत्वं क्रमम्। ननु देवा
नम्या इत्यादौ लोपो व्योरित्येव सिद्धम्। मैवम्। तं प्रति यत्वस्यासिद्धत्वात्। देवायात्रीयत्र वल्र परत्वाभावाच्च। अहोरात्र इति।
रात्राह्नाहाः पुंसीति पुंस्त्वम्। अहरादीनामिति। उभयत्राप्यादिशब्दः प्रकारे। तेन स्वर्वक्षारधिरः सत्यशुष्मः विप्रः कविः
काव्येनास्वर्वनाइत्यादिग्राह्यम्। ढ्रो ढ्रे इति। ऊदित्वेन वेट्कत्वाद्यस्य विभाषेति निष्ठायां नेट्। ढत्वधत्वष्टुत्वढलोपाः।
यत्तु प्राचा प्रत्युदाहृतं दृढ इति तन्न। तत्र ढलोपस्यैवाभावात्। तथाहि। दृढः स्थूलबलयोरिति सूत्रेण दृंहेर्नकारहका
रयोर्लोपः तकारस्य ढत्वं च निपात्यते। न त्वसिद्धकाण्डस्थढत्वस्येह प्रवृत्तिः। दादेर्धातोरिति घत्वेन बाधात्। न चेह इडभावो
ढत्वं च निपात्य तां धत्वष्टुत्वढलोपास्तु भविष्यन्त्येवेति वाच्यम्। तथा सति परिवृढयत्येत्यत्र ल्यपि लघुपूर्वादिति णेरयादे
शो न स्यात्। परिवृढीकृत्येत्यत्र वाणिओरिति षङ् स्यात्। ढलोपस्यासिद्धत्वेन गुरूपोत्तमत्वात् इति भाष्ये स्थितम्। अय

नो·सु·

तुप्राचाव्याख्यातं दृंहेरवेदं निपातनं दृहदृढाविति तुप्रदृत्यत्र तं तस्य निष्ठायां आगमशास्त्रस्यानित्यत्वादिड्भावे वा दृंहेर्यत्र वे
तियोगविभागात् सद्धत्वाभावे ढत्वे ढलोपे नप्रत्युदाहरणमिदं द्रष्टव्यमिति तन्न। उभयोरपि निपातनाभ्युपगमात्। तदाह
वामनः। अथ दृंहिः प्रकृत्यन्तरमस्ति। तस्याप्येतन्निपातनं नलोपवर्जमिति। युक्तं चैतत्। अन्यथा हि अस्माणोरन्त्र नस्याल
पहवस्यात् उत्वमेवेति। सिद्धासिद्धयोरतुल्यबलत्वेन विप्रतिषेधे परमित्यस्याप्रवृत्तेर्निष्प्रतिपक्षत्वादुत्वमेव भवती
त्यर्थः। तदुक्तं पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति। एतेन विभक्तिकार्यं प्राक्पश्चादुत्वमत्वे इत्यादि व्या ।।राम।।
ख्यातम्। सूत्रे सु इति पृथक्पदं लुप्तषष्ठीकमित्याह। एतत्तदोरिति। एतत्तदर्थगतसंख्याभिधायी यः सुस्तस्येत्य ।।२५।।
र्थः। एतत्तदोर्विहित इति व्याख्याने तु परमसद्ददाति परमैष ददातीत्यादौ न स्यात्। अर्थद्वारकसंबन्धाश्रयणे लिंगं तु अ
नञ्समास इति बोध्यम्। अकोः किमिति। साकच्कयोः शब्दान्तरत्वादप्रसंग इति प्रश्नः। एषक इति। अकोरिति प्रतिषे
धएव तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति परिभाषां ज्ञापयतीति भावः। बहुलग्रहणेति। अत एव लोपं विनापादपू
रणेपि क्वचिद्भवति। सास्मा अरम्सः अस्मैरतिच्छेदः।। ।।इति स्वादिसन्धिः।। ।।अर्थवदधातुः। प्रत्ययं प्रत्ययान्तं
चेति। सूत्रेतं चादिना उभयं विवक्षितमिति भावः। तथा हि। प्रत्ययस्यैव पर्युदासे कृत्तद्धितेति सूत्रेण तद्धितान्तस्य

संज्ञाविधानं व्यर्थं स्यात्। न चैतत् ज्ञापितं तत्र न ग्राह्यमिति वाच्यम्। अर्थवदित्यनुवृत्तिसामर्थ्यात्तदनग्रहणात्। प्रशंसायां हि
मतुप्। एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वेन प्रशंसामूलम्। न चार्थवदित्यस्य पूर्वसूत्रे चरितार्थता। धातुप्रत्यय
पर्युदासेनैव तल्लाभात्। तस्मात् प्रत्ययान्तं वर्जयित्वेत्युचितमेव। यदि तु प्रत्यय इति न पर्युदस्येत। तर्हि सात्पदाद्योरिति सूत्रे सा
ति ग्रहणं व्यर्थं स्यात्। अर्थवदिति किम्। धनं वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत्। तस्यां च सत्यां स्वादयः स्युः। ननु संख्या
क्रमादिरभावान्न भविष्यन्तीति चेत्। न। एकवचनमुत्सर्गतः करिष्यत इति सिद्धान्तात्। ऊं फ गादिभ्यश्च वसोर्दुर्वारत्वात्।
न चार्थवद्ग्रहणपरिभाषया अनर्थकेन स्यादिति वाच्यम्। तस्याः विशिष्टरूपोपादानविषयत्वात्। अधातुरित्यादिपर्यु
दासबलेन यद्यप्यर्थवत्त्वं लभ्यते तथाप्युत्तरार्थं तदित्युक्तं। एतच्च सुप्तिङन्तमिति सूत्रे भाष्ये ध्वनितम्। यत्त्वाहुः। पर्यु
दासो नार्थवत्त्वं गमयति। अनर्थकयोरपि धातुप्रत्यययोर्दर्शनात्। अधीते याचक इति। अधिरुव्वस्येवेङः प्रयोगाद्वि
शिष्टएवार्थवान् न तु केवलः। इङ् अध्ययने इत्याद्यर्थनिर्देशस्तु अवयवे समुदायार्थारोपात्। एवं कन्नप्यनर्थकः।।
यावच्छाब्दादर्पितदर्थप्रतीतेः ओषधेश्च विभक्तावप्रथमायां। अकर्तरि च कारके इति विभक्तिकारकग्रहणाभ्यां नञि
वयुक्तन्यायस्यानित्यत्वकल्पनाच्चेति। अत्रेदं वक्तव्यम्। धातुरनर्थक इति तावदयुक्तम्। क्रियावाचकत्वं विनाधा

नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः।। २

(52)

प्र॰ नो॰ सु॰

तुल्यायोगात् । आरोपितं तदिति चेत् । सत्यं । तावतैवेष्टसिद्धेः । प्रकृतिप्रत्ययविभागः तत्तदर्थविभागश्च सर्वः कल्पित एव प
रमार्थतस्तु स्फोट एवार्थवानिति सिद्धान्तात् । उक्तं च हरिणा । उपायाः शिक्ष्यमाणानां बालानामुपलालनाः । असत्ये
वर्त्मनि स्थित्वा ततः सत्यं समीहते इति ॥१॥ कथमन्यथा इङोर्द्विवचनमाङ्दयश्च सुः । तथा च प्रत्याहाराह्निके अर्थव
न्तो वर्णा इति प्रघट्टके अध्येति अधीत इत्यत्रैकारोऽर्थवानिति भाष्ये स्पष्टमेवोक्तम् । एवं कन्प्रत्ययोऽप्यर्थवानेव स्वा
र्थिकानां प्रकृत्यर्थेनैवार्थवत्त्वात् । कल्पनामात्रमिदमिति चेत् । न । उक्तोत्तरत्वात् । नैषा कल्पना शास्त्रकृत्सम्म ॥ राम ॥
तेति चेत् । न । द्वितीयतृतीयचतुर्थतुर्याणीति सूत्रे पूरणार्थात्स्वार्थेऽन्प्रत्ययस्य पूरणार्थताया भाष्यकारैरेवो ॥२६॥
क्तत्वात् । प्रत्यय इति महासंज्ञां कुर्वतः सूत्रकृतोऽपि सम्मतमेवेदम् । यदपि ओषधेश्चेत्यादि तदपि न । अनित्यत्वे
प्यौत्सर्गिकप्रवृत्त्या इष्टसिद्धेः । इष्टस्थलेऽप्यप्रवृत्तौ न्यायस्य निर्विषयत्वापाताच्च । अनित्यत्वज्ञापनस्य कथंचि
दावश्यकत्वेऽर्थवद्ग्रहणस्यैव ज्ञापकत्वसंभवाच्च । उत्तरार्थस्यापि इह किंचित् च पो इति न्यायेन इह करण
स्य सफलत्वोक्तित्वात् । ओषधेश्चेत्यादौ विभक्तिकारकग्रहणयोरेवं सति प्रत्याख्यानसंभवाच्चेति दिक् ।
अधातुरिति किम् । अहन् । नलोपो माभूत् । न च कार्यकालपक्षे प्रत्ययपात्रत्वेन पर्युदासोऽस्त्विति वाच्यम् । प्रत्यय

५२

लरूपेणेनोक्तपर्युदासाप्रवृत्तेर्नोङिसंबुद्ध्योरिति निषेधेन ज्ञापितत्वात्। कथमन्यथा राजेत्यादौ नलोपः स्यात्। अप्रत्ययः किम्। ह
रिषु करोषि। अत्र सुप्सिपोर्मा भूत्। अप्रत्ययान्तः किम्। तत्रैव विभक्तिविशिष्टयोर्मा भूत्। न चात्र कृत्त्वेन काण्डं कुड्यं इत्यादौ प्रा
तिपदिकत्वं स्यादेव। तथा च ह्रस्वो नपुंसक इति ह्रस्वत्वं सोरुत्पत्तिश्च स्यादिति वाच्यम्। कार्यकालपक्षे पौर्वेष्ट सिद्धः। यथोद्देशपक्षे
विशिष्य केकादेशो नान्तवत्। समर्थस्याधिकरणेत्यादिनिर्देशात्। ह्रस्वो नपुंसक इति सूत्रे प्रातिपदिकग्रहणं वाङ्क्ते येसा
मान्यापेक्षं ज्ञापकमस्तु। यत्तु वदन्ति। प्रत्ययपर्युदासो न कर्तव्यः। प्रत्ययान्तपर्युदासेनैव गतार्थत्वात् व्यपदेशिवद्भावेन त
स्यापि प्रत्ययान्तत्वादिति तन्न। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणात् केवलस्य न अतथात्वात्। अन्यथा त्वदुक्त
रीत्या सुप्तिङोरपि तदन्तत्वात्पदत्वं स्यात्। तथा च हरिषु करोषीत्यादौ षत्वं न स्यात्। सात्पदाद्योरिति निषेधात्। अथ तु प्रत्य
यावितिसिद्धे नञ्द्वयोपादानं स्पष्टार्थम्। महासंज्ञाकरणं त्वनुरोधात्। तथा चाथर्वणे पठ्यते कोधातुः किं प्रातिपदि
कं कः प्रत्यय इति। ङ्याबादीनां तु सत्त्वानीहोदाहरणम् अव्युत्पत्तिपक्षस्यैवेदमेव ज्ञापकमिति प्राञ्चः। यत्तु व्युत्पत्तिपक्षे
पि निपातार्थमनुकरणार्थं चेदमिति हरदत्तेनोक्तं तच्चिन्त्यम्। न चापि प्रकृत्यादिकल्पनासंभवात्। वस्तुतस्तु व्युत्पत्तिपक्षे

नि॰२

वैयाकरणमतोन्मज्जनमिति वाच्यम्। मूलके नोपदर्शमित्यादौ कृदन्तत्वेनातिप्रसंगात्।

क्रो॰ सु॰ पि वक्रपट वइत्याद्यर्थे सत्त्वम्। न चैवं वक्रुन्न प्रवेइत्येव सत्त्वम्। गात्। न च समासग्रहणं नियमार्थमिति विस्तारः। अर्थवत्सूत्रं विना समासग्रहणस्य नियमार्थत्वायोगादितिदिक्। कृत्तद्धितसमासाश्च अर्थवदित्यनुवर्तते तस्मात्मध्यात्तदन्तविधिः। नहि जहत्स्वार्थायां वृत्तौ कृत्तद्धितानां सार्थोऽस्ति कृत्तद्धितावित्ति पूर्वगतिल भ्यस्क नप्रशस्तः। अजहत्स्वार्थायामपि न। प्रत्ययमात्रेणार्थपर्यवसानानित्यभिप्रत्याह कृत्तद्धितावित्ति। नियमार्थमिति। न च प्रलिङ्युकु इत्यादावथातुरितिकर्तृत्वाद्वा वप्रत्ययान्तमितिपर्युदासप्राप्ते कृदन्तविधिरयं। नियमार्थमिति। न च प्रत्ययान्तत्वेन पर्युदासप्राप्ते विध्यर्थमस्त्विति शंक्यम्, वाक्यस्याप्रत्ययान्तत्वात् प्रत्ययग्रहणाय समासविहितस्तदा त्ययान्तत्वेन पर्युदासप्राप्ते विध्यर्थमस्त्विति वेत्। मैवम्। अं देवग्रहणात्। ननु स्त्रीप्रत्यये तदादिनियमो निषिद्धः। एवं वराजकुमारीत्यादौ विध्यर्थमस्त्विति वेत्। तत्र वाप्रत्ययान्तत्वेनप्र तरंगस्यापि हलङ्याब्भ्यादिलोपस्य लुग्विषये प्रवृत्त्या श्रयमाण एव सुपि समासप्रवृत्तेः। अत एव गोमत्प्रिय इत्यादौ नुमादयो न। व ताया संज्ञायामेकदेशविकृतन्यायेन विभक्तेर्लुक्यपि सुलभत्वात्। अत एव गोमत्प्रिय इत्यादौ नुमादयो न। लुकः प्राक् अन्तरंग प्रवृत्तौ तु स्युरेव। नन्वेवमप्यसमर्थसमासे दशदाडिमादिवदनर्थकं विध्यर्थमस्त्विति वेत्।

ताँ

॥ राम॥

॥ स्तु॥

(५५)

न। अर्थवदित्यस्याप्युक्तेर्नैरुक्तत्वात्। कथं तर्हि असमर्थसमासे संज्ञेति चेत्। धर्मिग्राहकमानादेवेति गृहाण। असूर्यल
लाटयोरिति हि असूर्यंपश्येत्युपपदे खश् विधीयते। उपोच्चारितं पदं चोपपदं पदं च स्फसिङ्न्तमिति। नियमशरीरमा
हा। यत्र संघात इति। पूर्वो भागस्त्वुपलक्षणं उत्तरस्य प्रत्ययो नेत्यपि बोध्यम्। अन्यथा जन्मवानित्यादौ संज्ञा न स्यात्। त
द्धितग्रहणस्य औपगवादौ चरितार्थत्वात्। पूर्वभागः पदमिति किम्। बहुज्विशिष्टस्य प्रातिपदिकसंज्ञा यथा स्या
त्। तेन बहुपटव इत्यत्र प्रथमजसो लुकि बहुपटुशब्दस्य चित्स्वरे पुनर्जसि उपोत्तमोदात्तत्वं सिध्यति। ङ्या
प्प्रातिप्रत्ययभावानापान्नसंघातविषयको नियमोऽस्तु। न वा छ्यपत्तेराजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञा पद
स्यादिति वाच्यम्। अर्थवत्त्वेनैव वारणात्। प्रत्ययार्थो हि विशिष्ट एवान्वेति न तूत्तरार्धमात्रे येन पुरुषावित्यस्या
र्थवत्त्वं स्यात्। नियमफलमाह तेनेत्यादि। नन्वेवमपि मूलकेनोपदंशमित्यादौ वाक्यस्य संज्ञा दुर्वारा कृद्ग्र
हणे गतिकारकपूर्वस्यापि ग्रहणादिति चेत्। मैवं। समासग्रहणात्कृतनियमेन परत्वाद्बाधात्। एवं च कृत्तद्धिते
ति सूत्रे कृद्ग्रहणपरिभाषा नोपतिष्ठत एव निष्फलत्वादिति तत्त्वम्। यत्तु वदन्ति। समासग्रहणं न नियमार्थं किंतु

सा॰ १

प.रो.सु. विध्यर्थमेव। अर्थवत्त्वं हि वृत्तिमत्त्वं। वृत्तिश्च द्विधा शक्तिर्लक्षणा च। न चैवं समासेऽस्तीति। अत्रेदं वक्तव्यम्। सिद्धान्ते तावदे
कार्थीभावाभ्युपगमाद् वृत्तिर्नास्तीति बाधितमेव। मीमांसकमतेऽपि लक्षणास्त्येव। यदाहुः। सर्वत्रैव हि वाक्यार्थो लक्ष्य
एवेति वक्ष्यते इति। अथ नैय्यायिकरीत्योच्यते तदपि न। बहुपटव इत्याद्यसिद्धेः। तद्धितग्रहणं तद्धितशिष्टपर
मिति चेत्। न। पचतकीत्यादावतिव्याप्तिः। किं चैवं कृद्ग्रहणपरिभाषया मूलकेनोपदंशमित्यादावतिव्याप्तिर्दुर्वारा इ
त्येत्यास्तां तावत्। चकारोऽनुक्तसमुच्चयार्थस्तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति गतार्थं। तेषां द्योत्यो ।।राम।।
ऽर्थो नास्तीति तदर्थमिदम्। अवघाति। अनुकरणेषु तु अनुकार्येण सहाभेदविवक्षायां अर्थवत्त्वाभावादेव न ।।२८।।
प्रातिपदिकत्वं भूसत्तायामिति यथा। भेदविवक्षायां तु संज्ञा स्यादेव गुवोर्गुणिति यथा। लिङ्गविशिष्टस्येति।
लिङ्गबोधकप्रत्ययविशिष्टस्यापीत्यर्थः। परिभाषायाः प्रयोजनं तु अयस्कुम्भी। अतः कृकमीति सत्वं तद्धिकं
साद्युत्तरपदेषु विधीयते। किं च। कुमारीमात्मन इच्छति कुमारयति नाविष्ठवदिति टिलोपः। एवं यामिनयन्त्यहानि
इत्यत्र आचारे क्विबपि फलं। ग्रामण्यां ग्रामणीति। तेन लोहिनिका। आर्यका च सिध्यति। तथा हि। स्वार्थिक

त्वेनान्तरङ्गः परत्वल्लोहितान्मणाविति कन्ङीपं बाधेत तत्र लोहितिके त्येवस्यादिष्यते हल्भयम्ङीश्ग्रहणसामर्थ्यात्तु ध्वंता
त्कनिरूपद्धर्वंसिद्धम्। वर्णादनुदात्तादित्यस्य नैकल्पिकत्वात्। आर्यब्राह्मणकुमारत्व्यत्र आपपिष्यमाणे त्य
न्तस्वार्थिकोपिकन्आबूग्रहणसामर्थ्यात् एवं न प्रवर्तते। तेन उदीचामातः स्थानेयकपूर्वाया इति इत्वविकल्पः सिध्य
ति। स्यादेतत्। एवं सति बहुगोमत्केति न सिध्येत्। बहुगोमत्शब्दात् कपः प्राक् उगिल्लक्षणङीप्प्रसंगादिति चेत्
मैवं। अकृत एव समासे अलौकिकप्रक्रियावाक्येऽवयवोत्तरपदस्यावयवीभूय समासान्तः प्रवर्तत इति वक्ष्यमाण
त्वात्। स च विभक्तेः पुरस्तादित्येके। परस्तादिति पक्षे तु ताद्धितान्तत्वात् सुब्लुकि पुनः सुपि कृते समास इति सिद्धान्तः। तस्मा
दन्तरंगादपि ताद्धितात्प्राक् ङ्याप्पोः प्रवृत्यर्थं ङ्याब्ग्रहणमिति स्थितम्। यत्त्वाहुः आब्ग्रहणं स्पष्टार्थमिति तदनेन प्र
त्युक्तम्। एवं स्थिते तत्र ङ्याप्पोर्ग्रहणं मास्तु सुबन्तात्तद्धितोत्पत्तिरिति हि निष्कर्षः। सुपः प्रागेव ङ्याप्पौ प्रवर्तेते स्वार्थादि
प्रयुक्तकार्याणां क्रमिकत्वस्वीकारादित्यवधेयम्। सुङः स्योरिति। सोरूकारो वर्णत्रिसावित्यत्र विशेषणार्थः। अ
सीत्युक्ते हि त्रसकारादावित्यर्थः स्यात्। तथा च। वाजमर्वत्सु पयउस्त्रियासु इति न सिध्येत्। ङ सेरिकारो युष्मदस्मद्भ्यां

मनो॰सु॰

ङसोऽशित्यत्र अस्य ग्रहणं माभूदिति। यदित्वेकवचनस्यैवेत्यत्रापञ्चम्या इत्यनुवृत्तेः परिशेषाद्भिस्न्यस्य ङसोऽत्र ग्रहणं भवि
ष्यतीत्युच्यते तर्हि टाङसिङसामिन्येतदर्थः। जस्शसोर्जकारशकारौ जसः शी तस्माच्छसो न इत्यनयोर्विषयविभागार्थौ। अ
न्यतरस्य निरनुबंधकत्वमेवास्त्विति चेत् न। जसो जकाराभावे ओइत्यस्यास्स्यात् ततश्च प्रत्ययस्य वकारान्ततापि सं
भाव्येत। एवं शसः शकाराभावे ओटो ङित्वं संभाव्येत। अतोसंदेहार्थं तत्करणोक्तिर्यादौ टष्टकारः सुडिति प्रत्याहारा
र्थः। टाटकारस्तु टाङसीति विशेषणार्थः। ङः प्रष्टतीनां ङकारो घेर्ङितीति विशेषणार्थः। पकारस्तु प्रत्याहारार्थः। एवं ।।राम।।
च सर्वेषां सफलत्वेपि संज्ञार्था इति प्राचो ग्रंथोऽसंगत एव। सम्यक् ज्ञानं संज्ञा तदर्थविशेषणार्था इति यावत्। इतिभं ।। २७।।
त्का व्याख्याने पिक्लिष्टत्वमेवेत्युपेक्षितम्। तिङस्त्रीणि त्रीणि इति सूत्राच्चत्रीणि त्रीणीति पदं। तान्येकवचनेत्यादि
सूत्रं चर्सपूर्णमनुवर्तते इति व्याचष्टे सुपस्त्रीणि त्रीणीत्यादिना। एकशः इति। एकैकमित्यर्थः। संख्यैकवचनाच्चेति वी
प्सायां प्रथमांतात् शस्। यत्तु प्राचा एकैकशः इत्युक्तं तदयुक्तम्। शसैव वीप्सायाउक्तत्वेन द्विर्वचनायोगात्। येन
नाप्राप्तिन्यायेन द्विर्वचनापवादः शस् इति सिद्धान्तात्। यस्याङः। सर्वस्य द्वे इत्यत्र एकैकशो ददातीति

58

भाष्ये प्रयोगात् तान्येकेति सूत्रे एकशेष इति सूत्रकारनिर्देशाच्चोभयं साध्विति तन्न उदाहृतभाष्यस्यान्यविषयत्वा
त्। यत्र तद्धितेनानुक्तावीप्सा भवति तत्र द्विर्वचनमित्युपक्रम्याहितद्यथा एकैकशो ददातीति भाष्ये उदाहृतं।
व्याख्यातं च कैय्यटेन। अल्पार्थात् एकशब्दोऽस्ति तस्य वीप्सायां द्विर्वचने न कृतेऽल्पार्थादिति शस्प्रत्यय इ
ति। न चैषोऽर्थः प्रकृते संभवतीत्यास्तां तावत्। राम इति। संज्ञाशब्दोऽयमव्युत्पन्न इति पक्षे अर्थवत्सूत्रेण प्रातिप
दिकसंज्ञा। करणाधिकरणयोश्चेत्यधिकारे घापवादे न हलश्चेति घञा रमन्तेऽस्मिन्निति व्युत्पादने तु कृत्त
द्धितेनेति सूत्रेणेति विवेकः। सरूपाणामेकशेष एकविभक्तौ। एकविभक्तौ यानीति विभक्तिः सारूप्ये
उपलक्षणं न त्वेकशेषनिमित्तं एवं च अनैमित्तिकत्वेनांतरंगोऽयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्त्तते। यद्येत
न्नारभ्यते तर्हि प्रत्येकं विभक्तिः स्यात्। द्वंद्वश्च प्रवर्तेत। आरब्धे त्वेकशेषे अनेकसुबंतविरहात् द्वंद्वस्याप्रा
प्तिरेव फलिता भवतीति भावः। सरूपाण्येवेति। एतच्च उत्तरसूत्रस्थस्य एवकारस्येहानुकर्षणाल्लभ्यते नैते
न मातृशब्दयोर्जननीवाचिपरिच्छेतृवाचिनोर्नैकशेषः मातृ मातॄ मित्यादौ सारूप्ये प्यौ जस्यादिषु वैरू

सि॰ कौ॰

ण्यात्। एक एवेति। एतच्च सहविवक्षायामेव प्रवर्तते इतरेतरयोगद्वंद्वस्य विषय इति यावत्। यत्र त्वनेकस्यार्थस्य मिलित
स्येतरान्वयः स तथाभूतो विषयः। इदं च इद्दितोनुवृत्त्या तोरिति लिंगात् लभ्यते। न्यायाच्च। तथाहि। यः शिष्यते स लुप्य
मानार्थाभिधायीति स्थिते श्रूयमाणैकशब्दोपस्थितं सर्वमविशेषादेकरूप्येण वाचेतुमर्हति। यद्वा पूर्वसूत्रात्
द्वंद्व इत्यनुवर्त्य द्वंद्वे प्रसक्ते सतीति व्याख्येयम्। स्यादेतत्। द्वंद्वे कृते सतीत्यर्थोऽस्त्वेवम्। पन्थानौ पन्थान इत्या
दौ समासान्तापत्तेः। करौ करा इत्यादौ एकवद्भावापत्तेः। सर्वे सर्वेषामित्यादौ द्वंद्वे च विभाषा जसीत्यनयोरापत्ते ॥राम॥
श्चेति दिक्। यत्तु प्राचा रामरामश्चौ इति स्थिते इत्युक्तम्। एक एव शिष्यते एकविभक्तौ परत इति वदतेत्थमुक्तिस ॥३०॥
म्भवः। रामराम इत्यत्रावयवयोरिव समुदायस्यापि प्रातिपदिकसंज्ञाऽस्ति। मिलितेनार्थवत्त्वात्। न चार्थवत्त्वे
पि समासग्रहणस्य नियमार्थत्वान्नैवमिति वाच्यम्। यत्र समुदाये पूर्वो भागः पदं तद्विषयको नियम इत्युक्तत्वा
त्। बहुपटव इत्यादौ तु रोधेन नियमस्य सजातीयविषयतायाश्चौचित्याच्च। तथा चैकार्थे द्विर्वचनन्यायेन समु
दायप्रातिपदिकाद्देवद्विवचनाद्युत्पत्तिस्तावताऽप्यवयवार्थानां संख्यान्वयेनानुग्रहसंभवात्। नन्वेवं रामकृ

60

ह्मावित्यादिष्वपि द्वंद्वविनैव समुदायाद्विभक्तिः स्यादिति चेत्। मैवम्। द्वंद्वविधावनेकं सुबन्तमित्यस्यानुवृत्त्याएकाज
द्विर्वचनन्यायस्य बाधादिति दिक्। एवमुक्तिसंभवे सत्यपि समुदायादेकविभक्तौ परत इति पक्षः किमर्थमुपेक्षि
त इति चेत्। शृणु अस्मिन्पक्षे मातृमातारौ इत्यादावप्येकशेषः स्यात्। नन्वेकविभक्तावित्यावश्यएवकारं वानुकृष्य
एकविभक्तौ यानि सरूपाण्येवेति व्याख्येयमिति चेत्। न। आवृत्तौ मानाभावात् विभक्तेरेकशेषविशेषणत्वे फलाभा
वाच्च। न च पयः पयोजरयतीत्यादिव्यावृत्तिः फलम्। सहविवक्षायामित्यस्यावश्यकत्वादन्यथा पयः पयोनय
तीत्यत्र गौणमुख्यकर्मणोरेकशेषापत्तेः। देवदेवरत्यादावतिप्रसंगाच्च। प्रत्युत आवृत्त्या उभयविशेषणत्वे
भिक्षाणां समूहो भैक्षमिति न सिध्येत्। तथाहि। भिक्षा ३ आम् इति स्थिते अन्तरंगानपि विधीन्बहिरंगोऽ
पीति लुकि कृते विभक्तिपरत्वाभावादेकशेषो न स्यात्। लुक्कालुप्रत्ययलक्षणाभावात्। किंच रामादि
त्यादौ परत्वान्नित्यत्वाच्च हलिदिरवीत्येकादेशे कृते विभक्तिपरत्वाभावादेकशेषो न स्यात्। उभयत आश्रयणेऽ
न्तादिवद्भावाभावादिति दिक्। यत्तु प्राचा व्याख्यात्रा पक्षान्तरमुपन्यस्तं सविभक्तिकानामेकशेष इति। तन्न।

एकस्मिन्नेव काले सर्वैः पदैर्द्वित्वं वा बहुत्वं वा उच्यते इत्यर्थः।१

ए४

द्विनोरमा

निवर्तमानानां विभक्त्या सहैव निवृत्तावपि शिष्यमाणे एकवचनश्रवणप्रसंगात्। अथोच्येत। युगपदधिकरणवच
नतायां द्विवचनबहुवचनान्तानामेकशेषः। द्वंद्वोऽप्येव वा। तथाहि। अजहत्स्वार्थायां वृत्तौ एकैकमनेकार्थाभि
धायि परस्परसमभिव्याहारात्। तथा च अलौकिके द्वंद्वैकशेषयोः प्रक्रियावाक्ये द्विवचनबहुवचनयोरेव प्रवे
शात् विभक्त्यंतानामेकशेष इति पक्षो निर्बाधो भवति। तदपि न। जहत्स्वार्थायां वृत्तौ तदयोगात्। पक्षान्तरेऽपि प्र
थमप्रवृत्तस्य एकवचनस्य त्यागायोगात्। अन्यथा षष्ठीतत्पुरुषाद्युक्तदोषापत्तेः। तत्रापि हि पूर्वपदार्थस्य उत्तरप
दार्थे उपसंक्रमेण षष्ठ्याद्ययोगात्। तथा च भाष्यम्। सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति। य
दपि व्याचख्युः। व्यक्तिपक्षे यावद्व्यक्ति तावच्छब्दप्रयोगे प्राप्ते एकस्यैव प्रयोगो यथा स्यादिति सूत्रम्। आकृ
तिपक्षे तु एकेनैवाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमिति। तन्न। व्यक्तिपक्षेऽपि न ब्राह्मणं हन्या
दित्यत्र ब्राह्मणशब्देनैवैकेनाप्यनेकस्य तंत्रेण सुवचत्वात्। अन्यथा जातिपक्षेऽपि। वासेन सम्यक् क्षमयोश्च
तस्मिन्नित्यादिना नार्थानुरोधेन सूत्रं विनाऽनिर्वाहात्। तस्माज्जातिव्यक्तिपक्षयोर्द्वयोरपि तंत्रेण प्रयोगानिवा

यदि तंत्रं नाश्रीयते चेत्।२

॥राम।
॥३१।

शान्त्य।
शांतिह
वीहयोः
चेदना।
दिसार्थ।

हेपि सर्वत्र तंत्रेणैव बोधनीयमिति नियामकाभावात्साक्षिको द्वंद्वः सूत्रं विनादुर्वारः। घटोयं घटोयमिति नानाशब्द
प्रयोगदर्शनात्। तद्वद्घटघटाविति द्वंद्वस्य न्यायप्राप्तत्वात्। नैवमपि घटकलशाविति द्वंद्वापत्तिः। विरूपा
णामपि समानार्थानामिति वार्त्तिकात्। रूप्यते बोध्यते इति व्युत्पत्त्या रूपशब्दस्यार्थपरत्वमाश्रित्य वार्त्तिका
र्थस्यापि सूत्रेणैव क्रोडीकारात्। तस्माद्घटघटौ घटकलशावित्यादिप्राप्तिकानिष्टवारणाय एकशेषेपि सू
त्रमावश्यकमित्यवधेयम्। एवं सिद्धे तेसूत्रं वैयर्थ्यमिव हृदि निधाय यदिह व्याचख्युः। नानेनैकशेषो विधीय
ते इत्यादि। यत्र समुदायादेकस्यां विभक्ताविति पदं प्रत्याख्याय पुनराहुः रामरामश्चेति सिद्धे इति। अ
लौकिकमेतत्प्रक्रियावाक्यम्। तेन तु लौकिकम्। अलौकिके च विभक्त्येकादेशादिकार्यं न प्रवर्त्तते प्र
युक्तानामेवान्वाख्यानादित्यादि। तत्सर्वं संदर्भविरुद्धं न्यायविरुद्धं च प्रयुक्तानामेवान्वाख्याने न लौ
किकमुत्प्रेक्ष्यते। शास्त्रीयकार्यं च सर्वमलौकिके एव प्रवर्त्तते न तु परिनिष्ठिते। अमि पूर्वः प्रथमयोः पू
र्वसवर्णः इत्यादीनां प्रवृत्तिं विना परिनिष्ठितरूपालाभात्। परिनिष्ठिते तत्प्रवृत्ते दुरुपपादत्वाच्च व्यास्तां ता

म॰ सु॰

वत्। अमिपूर्वः। अम्यवीति। अमियोऽचू तस्मिन्नमोऽवयवेऽवीतियावत्। तेन मकारसहितस्य पूर्वरूपं न। एवं
भस्माहू हिन्यामिमित्यादावपि ऊहिन्यांयोऽचू तस्मिन्नित्यादि बोध्यम्। रकोयणावीत्यत्र ग्रहणस्यानुवृ
त्तेर्निर्विवादत्वात्। पदास्यैरिवाह्येत्यादिनिर्देशाश्चेहलिंगम्। तस्माच्छसः। तच्छब्देन सन्निहितः पूर्व
सवर्णदीर्घः परामृश्यते। शस इत्यवयवषष्ठीसवावयवः परत्वेन विशिष्यते। पूर्वसवर्णदीर्घात्परस्य
शसोऽवयवस्येति। तदाह परो यः शसः सकार इति। परो यः शस् इति तु नोक्तम्। असंभवात्। नहि
हृते पूर्वसवर्णदीर्घे ततः परः शसस्संभवति। अट्कुप्वाङ्नुम्व्यवायेऽपि। रषाभ्यामिति पंचमीनिर्देशा
च्चवहितस्याप्राप्तौ वचनमिदम्। तत्र सर्वैर्व्यवायोऽसंभवीति एकैकमात्रव्यवाय इत्यपि नार्थः। कृभ्यादि
षु कृत्स्नशब्दपाठसामर्थ्यात्मरूपाणामित्यादिनिर्देशाच्चेत्यभिप्रेत्याह व्यस्तैर्यथासंभवं मिलि
तैश्चेति। नन्वेवमादर्शेनेत्यादावपि प्रसंगः। न च अडादिभिरेव व्यवधाने इति नियमः। अप्राप्तेवि
धिरयमित्युक्तत्वात्। सत्यम्। योगविभागोऽत्र बोध्यः। व्यवायेऽपीत्येको योगः विध्यर्थः। अट्कुप्वाङ्नु

॥ राम ॥ ३२ ॥

मृद्धत्यन्योनियमार्थः। छांदसो भिसो लुक्। निषेधं बाधितुमिति। तेन पर्याणद्धमित्यत्र उपसर्गादसमासेपीति णत्वं
सिध्यतीति भावः। नुम्ग्रहणमिति। तत्स्थानिकस्य स्वाभाविकस्य वा। अनुस्वारमात्रोपलक्षणमित्यर्थः।
तेन बृंहि वृद्धौ इदित्वान्नुम्। तस्यानुस्वारः। तृंहू हिंसायां स्वाभाविकोत्रानुस्वारः। बृंहणं तृंहणं उभय
त्रापि णत्वं सिद्धम्। इवि प्रीणने। प्रेन्वनम्। इह हल्त्यवर्जादेशः स नुम इति णत्वं न। यथा नक्षत्रं दृष्ट्वा वाचं वि
सृजेदिति विधौ न नक्षत्रदर्शनस्य कालविशेषोपलक्षणत्वात् सत्यपि दिवा नक्षत्रदर्शने वाङ् न विसृज्य
ते। उपलक्षितस्य कालविशेषस्याभावात्। रात्रौ तु असत्यपि नक्षत्रदर्शने विसृज्यते तस्य सत्वात्। तथे
हापि बोध्यम्। नन्वेवं नुम्ग्रहणं व्यर्थं अनुस्वारस्यापि नैव संग्रहात्। उरः केणेत्यादौ विसर्गजिह्वामू
लीयादिव्यवधाने ह्येषैव गतिरिति चेत्। सत्यमित्याह तत्रैवेति। स्यादेतत्। ऊर्जः करीत्यानुमत्र विसर्जनीये
ति सूत्रेऽपि नुम्ग्रहणं त्याज्यं स्यात्। तत्राप्यनुस्वारस्य लक्षणीयत्वात्। अन्यथासंभवात्। नहि षत्व
प्रवृत्तिवेलायां सर्पींषीत्यादौ नुम् लभ्यते। षत्वस्यासिद्धत्वेन ततः प्रागेवानुस्वारप्रवृत्तेः। यद्यपि सुहिंसु

म~

म॰ दु॰

इत्यत्र संभवत्येव। तथापि तत्रैवातिव्याप्तिं वारयितुं लक्ष्यानुरोधान्नुम्स्थानिकेऽनुस्वारे लक्षणाश्रयणीयैव
व्याख्यानात्। तस्य च शास्त्रेन तु घ्नायेषत्वस्य सिद्धत्वादिति चेत्। मैवम्। उक्तरीत्या तत्रत्यविसर्गग्रहणस्याप्र
त्याख्यानसंभवेपि नियमार्थं नुम्ग्रहणम्। तथाहि। अनुस्वारेण व्यवधाने चेत्षत्वं तर्हि नुम्स्थानिके नैवे
ति नियम्यते तेन पुंस्त्रियादौ षत्वं नेति दिक्। यस्मात्प्रत्ययविधिः। अत्र प्राचोक्तं यस्माद्धातोः प्रातिपदिकाद्वे
ति तन्न। तिङन्तादीनामपि तरबादिकं प्रत्ययं गतो संकोचस्यानिर्मूलत्वात्। आमुष्यायण इत्यादौ च भावापत्तेश्च। ॥राम॥
नहि प्रातिपदिकाद्यं तद्धितः किन्तु सुबन्तादिति दिक्। अतो भिस ऐस्। नन्वैस् इत्येवास्तु। न चातो गुण इति ॥२३॥
पररूपापत्तिः एकारोच्चारणवैयर्थ्यापत्तेः। अन्यथा इसमेव विदध्यादिति चेत्। सत्यं। एदैतोर्द्विमात्रत्वावि
शेषेण गौरवाभावादैस् कृतः। एवं च पररूपशंकैव नास्तीति महल्लाघवम्। यत्वाङ्कः। तास्य करणं निर्जरसै
रित्येकारश्रवणार्थमिति तन्न भाष्यविरुद्धम्। सन्निपातपरिभाषया जरसादेशाप्रवृत्तेः निर्जरैरित्येव भाष्ये
सिद्धांतितत्वात्। नामि। परिभाषाविरोधादिति। एतच्च रूथादिभ्यः भ्यामिति सूत्रे भाष्ये न लोप इति सूत्रे च भा

ष्यकैयटयोः स्पष्टम्। आरंभसामर्थ्यादिति। सुसुपि वेत्यस्य तु न सामर्थ्यं रामाभ्यामित्यादौ सावकाशत्वादिति

भावः। एवं वरामशब्दे नामीत्यस्योपन्यासो लेखकप्रमादादिति यद्दूषितं तत्स्थितम्। आदेशप्रत्यययोः ए

कापि षष्ठी विषयभेदाद्भिद्यते। इत्याशयेन व्याचष्टे आदेशः प्रत्ययावयवश्चेति। यदि तु आदेशावयवोऽपेक्षे

त तर्हि तिसृणामित्यादौ दोषः। यदि च प्रत्ययो यः सकार इति तर्हि रामेष्वित्यादौ न स्यात्। यद्यप्येवं वैरूप्ये

ण व्याख्याने सहविवक्षाविरहात् द्वंद्वो न प्रयुज्यते तथापि सौत्रत्वाद्द्वोध्यः। विवृताघोषस्येति। यत्तु वद

न्ति सकारस्य सोष्मणोऽघोषस्य तादृशएव षकार इति तन्न। नङ्कारेति प्रसंगात्। तथा च प्रातिशा

ख्यम्। वर्गे वर्गे च प्रथमावघोषौ युग्मौ सोष्माणावेतु नासिकौ न्त्य इति। ननु दधि से वौ दधि से व इत्यादौ प्रा

क् सुबुत्पत्तेः समासे षत्वं वारयितुं पदादादि: पदादेरिति पंचमी समासो भाष्ये ऽङ्कः। ततश्चेहापि सात

दौ योरितिनिषेधः स्यादिति चेत्। मैवम्। स्वादिष्विति पापदसंज्ञाना मास्त्रित्योक्तनिषेधो न प्रवर्तत इति

सातिग्रहणेन ज्ञापितत्वात्। यस्त्वाऽऽङ्कः। प्रत्ययविषयेनापि निषेध इति ज्ञाप्यत इति तन्न। व्यतिसे इत्यादौ षत्वा

म॰ सु॰

पत्तेः। ननु पदस्यादिरिति पक्षे व्याप्तिसत्त्वेऽपि तत्त्वं दुर्वारम्। न च व्यपदेशिवद्भावेन सेरित्यस्यापि तिङः तत्त्वात् सदर्वं शं
क्यम्। प्रत्ययग्रहणे यस्मात् विहितस्तदादेरेव ग्रहणात्। अन्यथा रामेष्वित्यादावपि षत्वनिषेधापत्तिरिति चेत्। स
त्यं। न वयं प्रत्ययमात्रस्य तदन्ततां ब्रूमः। किंतु प्रकृतिप्रत्ययसमुदाये प्रवृत्तायाः पदसंज्ञाया एकदेशविकृतन्यायेन लु
प्तप्रकृतिके प्रत्यये ध्यानयामः। रामैः रामाः इत्यादावपि हि एकदेशविकृतन्यायेनैव पदत्वम्। एकादेशात् प्रागे
व पदसंज्ञाप्रवृत्तेः। न त्वेकादेशे कृते सुप्तिङन्तमित्यस्य प्राप्तिरस्ति उभयत आश्रयणे नान्तादिवदिति सिद्धा ॥ राम
न्तात्। यत्तु वदन्ति। प्रकृतिसन्निधाने प्रत्ययस्य पदत्वं नास्ति मंत्रेषु सर्वेषामित्यादिनिर्देशादिति तन्मन्दम्। ॥ २४॥
उक्तरीत्या पदत्वाभावेऽप्यसिद्धेः षत्वापन्नस्यासंभवात्। अनुपयोगाच्च। सर्वादीनि सर्वनामानि। सर्वादीनि
इति तद्गुणसंविज्ञानो बहुव्रीहिः हलि सर्वेषामिति निर्देशात्। द्वंद्वे चेति। स हि समुदायस्य निषेधो न त्ववयवा
नामिति वक्ष्यते। नहि तदन्तविधिं विना समुदाये संज्ञाप्रसक्तिरस्तीति भावः। ननु तदन्तसंज्ञायाः किं फलम्।
न च परमसर्वस्मा इत्यादौ स्मायादयः फलम्। अंगाधिकारे तदन्तविधिनैव तत्सिद्धेरित्यत आह तेनेति। न

बहुपि प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्नस्तद्विशेषणे तदन्तविधिर्भविष्यतीति वाच्यम्। समासप्रत्ययविधौ प्रति
षेध इत्युक्तेरिति भावः। अकच्चेति। चकारात् परमसर्वत इत्यत्र तसिल्। जसः शी। अनेकाल्त्वादिति। न तु शित्वा
दिति भावः। अवर्णान्तादिति। अवर्णान्तादङ्गात्परस्येत्यर्थः। अपतो येषां तेषां केषामित्यादौ नाव्याप्तिः। सर्वना
म्नो विहितस्यामिति। सर्वनाम्नः परस्येति तु नोक्तम्। दक्षिणोत्तरपूर्वाणामित्यत्र सुट्प्रसंगात्। द्वंद्वे चेति नि
षेधो हि समुदायस्य न त्ववयवस्य। न च तस्मादयमाम्विहितः किं तु समुदायादेवेति न सुट्। विहितविशेष

पूर्वा

णत्वस्याश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एव। पंचत्रिंशदिति। पंच त्रिंशच्चेति द्वंद्वः। पं
चाधिका त्रिंशदिति तत्पुरुषो वा। यत्तु प्रत्याहाराएकचत्वारिंशदिति प्राचो ग्रंथव्याख्याने रूक्तं नायं मध्यमप
दलोपी तत्पुरुषः तथा सति राजन्यबहुवचनद्वंद्वेऽन्धकवृष्णिषु। संख्येति विधीयमानः पूर्वपदप्रकृति
स्वरो न स्यात्। तस्मात्समाहारद्वंद्व एवायम्। एकविंशतिरित्यादौ नपुंसकत्वं तु न भवति लोकाश्रयत्वाल्लिं
गस्येति तच्चिंत्यम्। समासभेदे न स्वरभेद इष्टापत्तेः। तथा च बहुव्रीहौ संख्येय इति सूत्रे संख्यायास्तत्पुरु

म. स.

षस्योपसंख्यानंनिस्त्रिंशाद्यर्थमन्यत्राधिकलोपादितिवार्त्तिकंव्याचक्षाणोभाष्यकारआहएकाधिकाविंश
तिरेकविंशतिःद्व्यधिकाविंशतिर्द्वाविंशतिरिति। अतएवेति। द्वयोर्द्विवचनस्यैवन्याय्यत्वादितिभावः। नन्वे
वंसर्वादिषुपाठोव्यर्थःसर्वनामकार्याणांस्मायादीनांद्विवचनेऽभावात्। नचउभाभ्यांहेतुभ्यांउभयोर्हे
त्वोरित्यत्रसर्वनाम्नस्तृतीयाचेतिपाक्षिकतृतीयातत्फलमितिवाच्यम्। निमित्तकारणहेतुषुसर्वासां
प्रायदर्शनमितिवार्त्तिकेनगतार्थत्वात्। नचहेत्तिकृतासर्वनाम्नस्तृतीयाचेतिसूत्रेपठितत्वादिदं ॥राम॥
वार्त्तिकंसर्वनामसंज्ञासापेक्षमितिवाच्यम्। भाष्येहेतावितिसूत्रेतस्यपठितत्वात्। अतएवान्नेनका ॥३५॥
रणेनवसत्यन्नस्यकारणस्येत्युदाहृतंहरदत्तेनेत्याशंक्याहतस्येहपाठस्त्विति। अयच्प्रसंगादिति।
अयंभावः। उभादुदात्तोनित्यमित्यत्रोभादुदात्तइतियोगोविभज्यते। अवयववृत्तेःसंख्यावाचिनउभ
शब्दादवयविन्यर्थेऽयच्स्यात्। उभयोमणिः। ततःनित्यम्। उभशब्दाद्वृत्तिविषयेनित्यमयच्स्यात्स्वा
र्थे। तेनउभयपदार्थविनीतनिद्राइत्यादौअयच्यथानित्यःएवंकप्रत्ययेपिस्यादिति। नन्वेवमकवि

कृतेऽप्ययच्‌द्रुचुर्वार इतिचेत् मैवम्। योगविभागस्येष्टसिद्ध्यर्थतया उभौ साभ्यासस्येति निर्देशेन वयच्‌ द्विवचनं
नस्त्रयते तन्नैवायजिति व्याख्यानात्। तथा च वार्त्तिकम्। अन्याभावो द्विवचनटाब्विषयत्वादिति। अकचि हि सि
तित न भवपति तत्र तद्ग्रहणेन गृह्यत इति न्यायेन उभशब्दस्य द्विवचनविषयत्वं न विहन्यते। कप्रत्यये तु वि
हन्यैतैव। तदुक्तमिति। वार्त्तिककृतेति शेषः। यद्यपि पूर्ववार्त्तिके टाबप्युक्तस्तथापि नासौ विवक्षितः टाब्वि
षयत्वमपि द्विवचनपरत्वएव बोद्धव्यमिति कैयटादिभिर्व्याख्यातत्वादित्याशयेन व्याचष्टे द्विवचनपरत्वा
भाव इति। टाबेकादेशस्यापि पूर्वान्तत्वेन ग्रहणात् द्विवचनपरत्वमस्तीति भावः। यद्यप्युभाविति त्यादौ द्विवचन
परत्वं दुरुपपादं उभयत आश्रयणेऽन्तादिवद्भावविरहात् तथापि उभशब्दादुत्पन्नं द्विवचनं लुकानापहृ
तं यत्र ततोऽन्यत्राय च् इतीह विवक्षितोऽर्थः। यद्यपि भाष्ये कप्रत्ययस्यापि स्वार्थिकत्वेनोभशब्दात्परस्य
त्व द्विवचनमस्तीत्याश्रित्योभशब्दपाठः प्रत्याख्यातस्तथापि प्रौढिवादमात्रं तत्। कृत्रिमस्यैव द्विवचनस्येह
ग्रहीतुमुचितत्वात्। अन्यथा तसिलादावतिप्रसक्तत्वात्। ननु कारकविभक्त्यन्ताद्विहितो तसिलो

·स्त·

स्वार्थिकत्वेपि द्वित्वमात्रं नाभिधत्त इति चेत्। न। कप्रत्ययस्याप्यज्ञाताद्यर्थबोधकत्वात्। पंचकपक्षे स्वार्थिकबोधक
त्वद्यौव्याद्वेति दिक्। नास्तीति। अनभिधानादिति भावः। तथा चोभयशब्दस्य द्विवचनानुत्पादात् सर्वविभक्तित्वेना
व्ययत्वे प्राप्ते तद्धितश्चासर्वविभक्तिरिति सूत्रे कृत्तद्धितानां ग्रहणं च पाठ इति भाष्ये कैयटेनावतारितम्। अ
स्त्वाति। पचतिकल्पं पचतिरूपमित्यादिवारणेन पाठस्योपक्षीणत्वादनभिधाने प्रमाणं नास्तीति भावः।
तयप्प्रत्ययान्ततयेति। उभयशब्दस्येति भावः। नित्येवेति। परेऽवरेउभया अमित्रा इति तु छान्दसत्वाद्वा ॥ राम ॥
ध्यम्। अव्युत्पन्नाविति। एतच्च पस्पशायां कैयटे स्पष्टम्। एके काशिकाकाराः। एतं त्वं मन्ये रत्युदात्तस्य ॥ २६ ॥
उतत्वः पश्यन्न् इत्यनुदात्तस्य च दर्शनादिति भावः। एकः प्रथमः। संहितयापाठे तात्रत्वस्यास्फुटत्वेपिता
त्रश्चेत्त्वोऽन्यथा एकश्रुत्या सहदेव पठेत्। न चतात्रैव विप्रतिपन्नव्यं त्वत्वसमसिमेत्यनुशानीति फिट्
सूत्रात्। तथा च कृष्णं नः। स्तरीरुत्वङ्क्वतिसूत्रउत्वदिति। वदभाष्यकाराश्चैवं व्याचख्युः। त्वदिति सर्वं
नामस्कपठितोऽनुदात्तोऽयमन्यपर्याय इति जयदेवोऽपि प्रायुङ्क्त। त्वदधरमधुरमधूनि पिबन्तमिति। त्वेतोऽ

न्यस्याः अधर इति विग्रहः। न तु न वा धर इति विग्रहः। पश्यति दिशि दिशि रहसि भवन्तमिति पूर्ववाक्येन सहानन्वयापत्तेः।
नेमइति। श्रूयते च प्रनेमस्मिन्ददृशे सोम इति। समइति। तथा च श्रूयते। न भन्त्रामन्यके समे। मानो वृकाय वृक्ये स
मस्मै। उरुष्याणो अघायतः समस्मात्। उतो समस्मिन्नाइत्यादि। सिमः कृत्स्ने वशाके च स्यान्मर्यादावचनयोः। श्रू
यते च। आ ज्ञात्रीवा सस्तनुते सिमस्मै उक्षु क्ते मन्के मज्ञते सिमस्मात्। उभयत्रापि सिमशब्दः सर्वपर्याय इति वेदभा
ष्यम्। गणसूत्र इति। यद्यपि भाष्ये ह्याख्यायीसूत्रे अपुरीति वक्तव्यमिति वार्त्तिकं पठितं तथापि तद्गणसूत्र
स्य शेषोनत्तु न सिद्धि भाषाविधायकस्य। अत इत्यधिकृत्य ज्ञसः शी विधानाद्भावत्तत्प्राप्त्यभावात्। अन्तराया
मिति। प्राकाराद्वा ह्यायां तदन्तर्वर्तिन्यां वेत्यर्थः। लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा प्रा
प्तिर्बोध्या। त्यदूतदूएतौ उक्त परामर्शकौ। नत्वा घश्छांदस इति गणरत्नकारः। तन्न। स्यश्छंदसि बहुलमिति सूत्रे
च्छन्दोग्रहणवैयर्थ्यापत्तेः। एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायां च प्रयुज्य
ते॥१॥ स्वांमिधेयेति। स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियम इत्यर्थः। दिशः सपत्नी भवद

॰स्क॰

क्षिणस्या इत्यादावपि व्यवस्थास्त्येव। प्रसिद्धत्वान्नावधिवाचीशब्दः प्रयुज्यते। न च संज्ञात्वान्निषेधः। आधुनिकसंकेतो
हि संज्ञा न च दिक्षु साऽस्तीति अस्तीति प्रकरणे कैयटहरदत्तादयः। अत्र दिक्षु चिरन्तनः कुरुषु त्वाधुनिकः।
संकेत इत्यिच्च व्याख्यातृवचनमेव प्रमाणम्। एतेन विश्वेषां देवानामिति व्याख्यातम्। वेदप्रसिद्धत्वात् देवगण-
विशेषे विश्वशब्दस्याऽधुनिकसंकेताभावात्। दक्षिणागाथका इति। इह अमुकस्मात्कुशला इत्यवध्यन्वयसं-
भवेऽपि तन्नियमो नास्तीति भावः। एवं अधरे ताम्बूलरागः उत्तरे प्रत्युत्तरे च शाकः इत्यपि प्रत्युदाहर्तव्यम्। कथं त- ॥राम॥
र्हि तथापरेषां युधि चेति कालिदासः। अपरे प्रत्यवतिष्ठन्ते इत्यादि च। अत्राहुः। दशावाचितया व्यवस्थाविषय- ॥२७॥
योरेव परापरशब्दयोरुपचाराच्चौ प्रतिवादिन्नि प्रयोगः। न चैवमुपसर्जनता। न हि लाक्षणिकत्वमुपसर्ज-
नत्वम्। किं तु स्वार्थविशिष्टार्थान्तरसंक्रमः स च समासादिवृत्तावेव। अत एव पूर्वादिसूत्रेण नान्यपीति एतत्प्र-
तिपाद्यान्निव स्थलानि त्यर्थ इति कैयटोक्तिः संगच्छते। वस्तुतस्तु परापरशब्दयोर्देशान्तरनिष्ठत्वादिकमेवार्थः।
शतुत्वादिकं तु आर्थिकोऽर्थः। असंज्ञायां किम्। उत्तराः कुरवः। सुमेरुमवधिमपेक्ष्य कुरुषूत्तरशब्दो वर्तते

इत्यस्तीह व्यवस्था किंतु आधुनिकसंकेतोऽयमित्याहुः। स्वमज्ञातिधनाख्यायाम्। आत्मीयज्ञातिधनवाची स्वशब्दः
।तत्र ज्ञातिधनयोः पर्युदासादात्मात्मीयोपरि शिष्टावित्याशयेन व्याचष्टे। आत्मीयार्थ इत्यर्थः। आत्मान इति वेति। यत्त्वा
हुः। आत्मनि स्वशब्दो नपुंसकः तेन स्वे स्वा इत्युदाहरणं तत्र न संभवतीति तच्चिन्त्यम्। आत्मन्यपि स्वशब्दस्य पुंस्त्वा
त्। विभाषा जसीति प्रकरणे स्वमात्मीये इत्येव वक्तव्ये गुरुनिर्देशं कुर्वतः सूत्रकारस्यैवात्र प्रमाणत्वात्। यदपि स्वो

उ

ऽन्तर्थेषु पृष्टं भाष्ये स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने इत्यमरसिंहोक्तिमाहुः तदपि चिन्त्यम्। क्रोशो
हि आत्मनीति पूर्वान्वयि। स्वमिति उत्तरान्वयि। तथा च हेमचन्द्रः। द्यौः स्वर्गनभसोः स्वो ज्ञात्यात्मनोः स्वं निजे धने इ
ति। मेदिनीकारोऽपि। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धने इति। तस्मात्स्वे स्वा इत्यस्य आत्मान इति विव
रणं सम्यगेवेति स्थितम्। ज्ञातिधनवाचिनस्त्विति। ताच्छील्ये णिनिना ज्ञातिधनयोरप्यात्मीयत्वं पुरस्कृत्य प्रवृत्तेऽसौ
र्वनामता स्यादेवेति ध्वनयति। एतदर्थमेवेह सूत्रे आख्याग्रहणं कृतम्। अन्तरं बहिर्योगोपसंव्यानयोः। बहि
रित्यनात्र तोदृशो वा ह्यं वोच्यते। तत्रायमर्थं गृहीत्वा ह बाह्या इत्यर्थ इति। द्वितीये तु आभ्यन्तरा इत्यर्थो बो

75

ध्यः। बाह्येन हि आभ्यन्तरस्य योगोऽस्ति। अर्थद्वयमप्याकरे स्थितम्। उपसंख्यानशब्दोऽपि करणव्युत्पत्त्यान्तरीयपरः। कर्मव्युत्पत्त्या तु अन्तरीयपरः। पूर्वादिभ्यो नवभ्यो वा। अत्रेदमवधेयम्। एतत्सूत्रं जसः शी इत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयम्। वा छन्दसीत्येतदपि पूर्वे इत्यत्र यथा। एवं चाष्टाध्याय्यां पूर्वपरेत्यादि त्रिसूत्री गतार्थेति महल्लाघवम्। एकशब्दस्याष्टावर्थाः उक्ताः तत्र विशेषमाह संख्यायामिति। अन्येषु सप्रसुतुवचनान्तरमपि स्यादेव एकेए केषामिति यथेति भावः। न बहुव्रीहौ। कृते बहुव्रीहौ निषेधो व्यर्थः उपसर्जनीभूतानां सर्वादय इति वक्ष्यमाणत्वादत आह विकीर्षितेति। समासात्प्रागेवेति च। प्रक्रियेति। अलौकिके विग्रहवाक्ये इत्यर्थः। नन्वस्तु तत्राकश् अत आह सवेति। न च निमित्तस्यानुपसर्जनत्वस्य विनाशोन्मुखत्वात् प्रागेव संज्ञा न भविष्यतीति वाच्यम्। अकृतव्यूह परिभाषाया अनित्यत्वात्। तच्चैतत्सूत्रस्यैव ज्ञापकत्वात्। अतिभवकानिति। एतदेव ज्ञापनफलमिति भावः। इष्टापत्तिं कृत्वेति। ष्ठुः ष्टुडिति स तु धकूग्रहणं प्रकृतिप्रत्यापत्तिवचनं वा अनित्यत्वे ज्ञापकं लक्ष्यानुरोधाच्च व्यवस्थेति भावः। यथोत्तरमिति। तथा वाधत्वे भाष्यकारोक्त्यैव व्यवस्थेति भावः। यत्तु प्राचोक्तं बहुव्रीहौ

सर्वादेः सर्वनामता न स्यात् प्रियसर्वाय। सूत्रकारमते बहुव्रीहौ न सर्वनामता। भाष्यकारमते गौणत्वमात्रे त्वकपि
त्वकोमत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनंगकार्यत्वेनाकच्स्यात् समासान्तकप्रत्यय एव
स्यादित्येतदर्थमिदं सूत्रमिति न्यासकृन्मतं इति। तत्रेदं वक्तव्यम्। किं बहुव्रीहेः संज्ञानेति विवक्षितं उत तत
द्वयवानां सर्वादीनामिति। नाद्यः। समासावयवयोर्युष्मदस्मदोरित्युत्तरग्रंथविरोधात्। समुदाये प्राप्तिविरहा
च्च। न च तदन्तविधिना प्राप्तिः। बहुव्रीह्यवयवानामुपसर्जनतया सर्वादिबहिर्भावेन तदन्ते प्राप्तेरसम्भवात्। अ
त एव न द्वितीयोपि। न चोपसर्जनानां पाठात् पर्युदासो वार्त्तिककृतोक्तो न तु सूत्रात् सूद इति वाच्यम्। अनर्थसं
ज्ञाबलेन सूत्रात्सरैरेव तल्लाभात्। एतेन सूत्रकारमते बहुव्रीहौ न सर्वनामतेत्यपि परास्तम्। बहुव्रीहा
वेवेति तस्यार्थः। भाष्यकारमते इत्याद्यपि च। विशेषोपादानेन हि सूत्रकारवार्त्तिककारयोः सतमन्यादृ
शमिति प्रतीयते। देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीतिवत्। तच्चन। सूत्रवार्त्तिकम
तपि गौणपर्युदासस्येष्टत्वात्। यत्तु त्वत्कपितृक इत्यादि। तदिष्टं प्राचाव्याख्यातम्। त्वं पिता यस्याहं पिता

सर्वादीनि सर्वादीनि सर्वनामानि सर्वनामानीति पदद्वयावृत्त्या। ४

म॰ खु॰ यस्येति विग्रहे बहुव्रीहिसमासे कृते समासावयवयोः समासान्तःपातिनो युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामसंज्ञक
त्वादज्ञाताद्यर्थविवक्षायां अव्ययसर्वनाम्नामिति अकच्प्रसज्येत। तस्य स्मैप्रभृतीनामिवांगाधिकारविहितत्वा
भावेनांगसंज्ञाऽनपेक्षत्वात्। ततश्च त्वकत्पितृक इत्याद्यनिष्टं प्रसज्येतेति न्यासकृतापि अन्वर्थसंज्ञाबलादेव
संज्ञानिरासे कृतेऽकच् न भविष्यतीत्याशंक्य समुदायो हि विशेषे वर्तते पूर्वपदं तु सर्वार्थताया अनपेतमेवेत्युक्तं।
तदेतत्सर्वं प्रामादिकमेव। तथाहि। जहत्स्वार्थायां वृत्तौ समासावयवयोरर्थ एव नास्ति। अजहत्स्वार्थायामपि स्वा ॥२॥
र्थविशिष्टान्यपदार्थवृत्तित्वेनोपसर्जनत्वं स्पष्टमेव। एवं च समासान्तःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेनेत्या ॥३
दि ग्रंथः समुदायो हीत्यादि न्यासग्रंथश्च पक्षद्वयेपि व्याहतः। किं च। एवमतिसर्वायेत्यत्र स्मायादेशो दुर्वारः।
अंगाधिकारे तदन्तग्रहणात् त्वदुक्तरीत्या सर्वशब्दस्य सर्वार्थतानपायात्। नहि पूर्वपदे सर्वार्थता उत्तरपदे तु
नेति युक्तिमत्। अपि च। एवं गौणत्वे सर्वादीनां सर्वार्थवाचकत्वं नास्तीति स्वोक्त्या सह विरोधः स्यादिति य
त्किंचिदेतत्। पदविध्याचख्युः। त्वं पिता यस्येत्यादौ विग्रहवाक्ये प्राप्तासंज्ञा निषिध्यते इति तदपि न। विग्रह

वाक्यं हि लौकिकमलौकिकं वा विवक्षितम्। नाद्यः। प्रक्रियावाक्येऽयं निषेधः न तु लौकिक इति कैयट ग्रंथविरोधात्। प्रकृतसंदर्भगतपूर्वापरस्वग्रंथविरोधाच्च। न द्वितीयः। तस्य युष्मद् सुपि टसु इत्याकारकत्वे नर्त्वं पितेत्याकारकत्वायोगात्। यदपि व्याचख्युः। नन्वतिसर्वादौ संज्ञा न प्रवर्तते त्वत्कपितृका दौ तु प्रवर्तत इत्यत्र किं विनिगमकं तत्राह। अनंगकार्यत्वेनेति। अंगशब्दः समुदायपरः तेनातिसर्व इत्यत्र अंगस्य संज्ञा अपेक्षिता सर्वनाम्नोऽस्मायादिविधानादवयवमात्रस्य सत्यपि सर्वनामत्वे दोषाभावात्। समुदाये च समुदायार्थत्वातिसर्वादे रूपसर्जनत्वात्तदंतस्य संज्ञा न भवतीति युक्तम्। इह त्ववयवमात्रस्य सा विकीर्षिता न समुदायस्य अवयवश्च स्वार्थमात्रप्रधान इति स्यात्सैं संगच्छतिवैषम्यमस्तीत्याशय इति। तदपि न। अंगाधिकारे तदंतविधेः सर्वसम्मतत्वेनावयवमात्रे सत्यपि सर्वनामत्वे दोषो नास्तीत्युक्ते व्याहतत्वात्। अंगाधिकार परिभाषया स्मैस्यादिति स्वग्रंथविरोधाच्च। अथायमाशयः। प्राक् प्रवृत्तापि संज्ञा अर्थांतरोपसंक्रमे सति गतेति। तर्हि अकच्यपि गच्छतु। ननु कार्यकालपक्षे स्मायाद्यर्थं पुनः संज्ञाऽपेक्षिता सा च दुर्लभेत्याशय इति चेत्। अस्त्वेवम्। न त्वसौ प्रकृत

अकचः

न·सु

ग्रंथार्थः न्यासग्रंथविसंवादेन इति न्यासकृन्मतमिति वाक्यशेषविरोधात्। न्यासग्रंथस्त्वनुपदमेवोदाहरिष्यते। य
दपि व्याचख्युः अंगमप्रधानं वाध्यं तद्विरुद्धमनंगं बाधकमित्यर्थः। तथा च कप्रत्ययापवादत्वादकच् स्याद्विय
र्थ इति। तदपि क्लिष्टं व्यर्थं न्यासग्रंथासम्मतं च। तथाहि। त्वत्कपितृको मत्कपितृक इति दृष्टान्तिग्रंथं व्याख्याय न्या
सकार उक्तवान्। ननु वान्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृते ऽकच् न भविष्यति। न ह्यत्र सर्वार्थता संभव
ति। विशेषविषयत्वात्। नैतदस्ति। समुदायो हि विशेषवर्तते पूर्वपदं तु सर्वार्थतया अनपेतमेव। भवतु नाहि ।।राम।।
अनयोरन्तरयोरेतत्सूत्रविषयता। प्रियविश्वायेत्यादस्तु नोपपद्यते। नहि प्रियविश्वादयः शब्दाः सर्वेषां ना ।। ४० ।।
मानि नापि तदवयवभूतानां विश्वादिशब्दानां किंचित्सर्वनामकार्यमुपपद्यते। स्मैप्रभृतीनामंगकार्यत्वात्। वि
श्वादिशब्दानामनंगत्वात्। एवं मन्यते त्वत्कपितृको मत्कपितृक इत्यत्राकज्मा भूदित्येतदर्थता वदेतदा
रब्धव्यम्। प्रियविश्वायेत्यादावपि विस्पष्टार्थं भविष्यतीति। अनेन हि न्यासग्रंथे नांगसंज्ञा ऽनपेक्षत्वमेवा
षो लिप्यते सर्वस्यो तदित व्याख्यया दूरोत्सारितएव। यदपि व्याचख्युः यद्यपि सूत्रवार्त्तिककृतोरप्येतन्म

(४८)

नंतथापिन्यासकृताविहृतत्वात् न्यासकृन्मतमित्युक्तमितितदपिस्खवीयः। वार्त्तिककृताऽस्यार्थस्यास्पृष्टत्वात्। न्यास
कृतासमासेकृतेसतीत्यादि वदतात्व डक्कार्थस्यदूरत्यक्तत्वेनतद्दिहृ तत्त्वाभावाच्च। यदथाऽऽः। न्यासकृच्छुद्दे नसू
त्रकारएवविवक्षितइत्यादितदपिन। सूत्रकारमतेबहुव्रीहावित्यादिपूर्वग्रंथेनसहविरोधात्। भाष्यकारमतेतुवि
तिग्रंथेनतस्यविच्छिन्नत्वाच्च। तस्मादिहप्राचः प्रक्रियाग्रंथः तद्व्याख्यातृग्रंथाश्चापातरमणीयाएवेत्यास्तांतावत्।
यदितुप्रक्रियाग्रंथोपिकथंचिद्भाष्याविरोधेनव्याख्येयइत्याग्रहः तर्हिइत्थंव्याख्यायताम्। ननुप्रियविश्वायेतिगो
पातयागतार्थतोनिष्कर्षमाहसूत्रकारमतइति। बहुव्रीहाविति। चिकीर्षितेसतीतिशेषः। गौणत्वमात्रइति।
मात्रशब्दोऽवधारणे। गौणत्वेएवनतुततःप्राक्। तथाचसूत्रंप्रत्याख्यातमितिभावः। न्यासकृन्मतस्यत्वातिफल्गु
त्वात्स्वरूपव्याक्रियैवपराक्रियेत्याशयेनाहत्वकपितृकइत्यादि। एतच्चप्राचीनग्रंथपरिशीलनशालिभि
र्विभावनीयम्। प्रकृतमनुसरामः। संज्ञाकार्यमिति। सर्वनामसंज्ञाप्रयुक्तस्मायादिकमित्यर्थः। अन्तर्गणकार्य
मिति। अद्डुतरादिभ्यः। त्यदादीनामः। तदोः सः सावित्यादिकमित्यर्थः। तृतीयासमासार्थेति। इहपूर्वसदृशे
तिविहितः समासोगृह्यते प्रतिपदोक्तत्वात्। ननुकर्तृकरणेकृतेति। तेनत्वयकाकृतमित्यत्रनिषेधोन। समुदा

त्वकपितृकोमकपितृकइत्यत्राकच्छब्दीकुर्वतः गौणत्वमात्रेसंज्ञानिषेधमि
च्छतः भाष्यकारस्यमते। ५

म॰ स्त॰ यस्येति। तत्रैव द्वंद्वशब्दस्य मुख्यत्वान्न द्वंद्वे द्वयानि सर्वादीनि इति संबंधः। कारकाणां क्रिययैवान्वयात्। न द्वंद्वे विद्यमानानि यानीति संबंधः। विद्यतिक्रियाऽध्याहारे गौरवात्। निषेध्याया भवतिक्रियाया एव प्राधान्येन तदन्वयस्यैव न्याय्यत्वाच्च। किं च। त्यदादीनां द्वंद्वो नास्त्येकशेषेण बाधितत्वात्। ततः प्राचीनास्त्वदन्ताः। तत्र काकदन्तयोर्न विशेषः। न च दक्षिणोत्तरपूर्वाणामित्यत्रेष्टमपि पुंवद्भावं निषेद्धुमिदं किं न स्यादिति वाच्यम्। सर्वनाम्नो वृत्तिमात्र इति मात्रग्रहणाद्धि क्वचित्सर्वनामत्वेन दृष्टानां संप्रति संज्ञाभावेऽपि पुंवद्भावार्थम्। अत एव दक्षिणापूर्वस्यै इत्यत्र संज्ञाभावेऽपि पुंवद्भावः। तस्मान्न्यायबलात् फलबलाच्च समुदायग्रहणमेवोचितम्। यद्यपि त्वच्च स्वस्तान्त्र इति पक्षेऽवयवनिषेधेऽपि फलं सुवचं तथापि शास्त्रस्यात्यल्पविषयता स्यात्। न्यायश्च विरुध्येतेति भावः। सुप्रसंग इति। वर्णाश्रमेतराणामित्यादाविति भावः। न च निषेधसामर्थ्यमनांगस्य त्रतसिलादेर्व्याहत्या चरितार्थत्वात्। जसाधारमिति। यद्यपि शीभावेन जसः श्रूयते तथापि स्थानिवद्भावाज्जसाधारत्वं बोध्यम्। यद्वा। जसइः जसिः तस्मिन्नुत्सौ नाः सप्तम्यालुक् इत्यर्थतो व्याचष्टे जसाधारमिति। जरायाजरसन्यतरस्याम्। विभक्ताविति। एतच्चाष्टनआ विभक्तावित्यतोऽनुवर्त्तते तेन जरायारद्वंजारमित्यादौ नातिव्याप्तिरिति भावः। पदेति। पदमंगं वा विशेष्यं विशेष ॥राम॥ ॥५१॥

(४२)

णेन वत दन्तविधिरिति भावः। तदनुसारिभिरिति। इना तो: पूर्वविप्रतिषेधेएकसूत्रोपात्तत्वात्स्यादेशोपि ग्रहीतुमुचि
तइति तेषामाशयः। अतएव वीतजन्मजरसः परेस्तुविब्रह्मणः पदमुपेतुमिच्छतामिति भारविप्रयोगं असमंजसं
मत्वा वीतजन्मजरैरसइति पठनीयमिति तैरुक्तं। एतच्चेति। भाष्यकृता हि टाङसीतिसूत्रे इना तौ प्रत्याख्यायना
देशामत्वादेशं च विधायनादेशेपरे एत्वं योगविभागेन साधितम्। बहुवचने झल्येत्। आसि च। ततः आङि च। आ
ङि च परे अतएत्वं स्यात्। सामेण। ततः आपः संबुद्धौ च। आप एकारः स्यात्संबुद्धौ आङि आसि च। नचैवमनेनेत्य
त्र हलि लोपः स्यादिति वाच्यम्। अनादेशस्य नकारे परे विशिष्यविधानात्। तथाहि। अनापि। नकारे आ
पि च परे अन्स्यादित्यर्थः। सूत्रे अ इति नान्तस्य नपुंसकनिर्देशः। न च ङसेरदादेशे कृते पररूपं स्यादिति
वाच्यम्। अकारोच्चारणसामर्थ्याद्दीर्घसंभवादिति। तथा जराया जरसन्यतरस्यामितिसूत्रे उक्तं। णोनदी
य आह। अतिजरैरिति भवितव्यं सन्निपातपरिभाषयेति। एवं च पूर्वविप्रतिषेधेनेत्यादि सर्वं भाष्यविरु
द्धमित्यर्थः। पद्दन्नो। अत्र शास्प्रभृतयो निमित्ततया प्राप्ताः। ते च पदाद्यादेशानुरूपान् प्रकृतिविशेषाना
क्षिपन्तीत्याह पादइत्यादि। यद्यपि शीर्षंश्छंदसीत्यतश्छंदसीत्यनुवर्तते तथापि भाषायामपि क्वचिद्भवति।

म॰ सु॰

मासश्छंदसीति वार्त्तिके छंदोग्रहणाड्डापकादिति वक्ष्यते। प्रामादिकमिति। तथाहि। आरन्नोहकस्य वर्त्तिकामभी
केइतिमंत्रे मुखादिस्यर्थः। औविस्यात्। हकस्य विद्धर्त्तिकाम न्नरास्यादिति मंत्रा न्नरसंवादाच्च। एवं हव्याजुह्वान
आसनि। आसन्यं प्राणमूतुरिस्यादावपि व्याख्यातं वतथैव वेदभाष्येषु। अत एव हरदत्तेनापि काशिकायाः प्रा
मादिकत्वमाविष्कृतमिति ध्येयम्। अल्लोपोऽनः। अत्र पूर्वः। अनन्तस्य भस्यांगस्याकारस्य लोपः स्यादिति।
तथासति तक्ष्णोत्यादौ तकाराकारस्यापि लोपः स्यात्। भस्यांगस्यानोऽकारस्येति व्याख्याने तु अनसामनस्या
दौ स्यात्। तं त्राँ ह्वस्यादिनान्न न्तस्य भस्यानोऽकारस्येति व्याख्यानेपि अनन्तक्ष्णोत्यादावतिव्याप्तिरेव। अतो व्याव
र्त्यऽन्नावयववइत्यादि। भस्येत्यनेनाऽऽक्षिप्तः प्रत्ययविशेषः अंगं वेति द्वयमनो विशेषणम्। अन् तु अकारस्या अ
तोनोक्तदोष इति भावः। एतच्च ष्यङः संप्रसारणमिति सूत्रे भाष्ये स्पष्टम्। रषाभ्यां नो णः समानपदे। पदे इती
यतेन सामर्थ्यादेकपदत्वे लब्धेपि समानग्रहणं यत् समानमेव अखंडमिति यावत् तत्र यथा स्यात्। तेन समासे
न भवति। रामनाम। सूर्पणखाइति। एषां मंऽः मुख्यामलकसूपस्कं भेदादीपनपावन इति दर्शनात्। इतिपद्ले
च्चेति। एतेन पंचमीसमासस्य पाक्षिकतां द्योतयति। तथाहि। भाष्ये वैभिदितामाथितिकः अपीपवन्निति प्रयो

॥राम॥ ॥४२॥

ज्ञनत्रयमुक्तम्। तच्चान्यथासिद्धम्। एकावउपदेश इत्यत्र विहितविशेषणाश्रयणादेव वेभिदितेत्यत्रेण्निषेधोन।
मथितंपण्यमस्येतिविग्रहे ठकि ठस्येकादेशो यस्येतिवेत्यल्लोपे इसुसुक्तान्तादितिकादेशस्तु न भविष्यति।
ठस्याभावात्। न च स्थानिवद्भावेन ठत्वं मेल्विधित्वात्। ठस्येक इत्यत्र हि स्थान्यादेशयो रकारउच्चारणार्थः। अ
पीपचन्नित्य पिणिलोपस्य चङन्यकारयोरेकादेशस्य च स्थानिवद्भावं विनापि सिद्धम्। विदिसाहचर्याद्यस्मा
दपि लङएवमेर्जुस्विधानात्। न च सिवासाहचर्यात् लुङएव किन्न स्यादिति वाच्यम्। पूर्वसाहचर्यात्परसा
हचर्यस्य बलीयस्त्वादितिदिक्। पूर्वत्रासिद्धेनेति। एतच्च न्यायसिद्धमित्यवोचाम। त्रिपाद्यामसिद्धत्वेन तत्र
स्येकार्यं प्रवतः परस्मिन्निर्युतिदेशस्याप्रवृत्तेः। तस्येति। तस्य पूर्वत्रासिद्धेनेत्यस्य। तथा च स्थलत्रये स्थानिव
द्भावो वक्तव्य इत्यर्थः। संयोगादिलोपे च स्यत्र। लत्वे निगाल्यते। णत्वे माषवपनी। इह यस्येतिअल्लोपस्य
स्थानिवत्त्वेन नकारस्य प्रातिपदिकान्तत्वाभावात् णत्वेन। यत्वाऽऽकः। कथं वितस्थानिवत्त्वाभावेऽपि पूर्वत्व इत्यादौ रषा
भ्यामित्यस्य नोपयोगः ष्टुत्वेन सिद्धः। तथा च षग्रहणमुत्तरार्थमित्याकरे स्थितम्। ततश्च रभसवादेनैत
दुपन्यस्तमितिसएवायं रभसवादः। तथाहि। उत्तरार्थतयापीह षग्रहणं स्थितं। ततश्च पूर्व्णः पुष्णातीत्यादौ

कात्र

८

85

म. सु.

रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यताम् । क्षुभ्नादित्वेन इति चेत् । न । तस्यासिद्धत्वात् । न च वचनप्रामाण्यात्सिद्धत्वम् । पुष्टः
पुष्णिरित्यादौ चरितार्थत्वात् । नस्य षयोगे णत्वं शास्त्रं चरितार्थ इति चेत् । न । तस्य पृथगनुक्तेः । इह षात्परस्येत्युक्ति
रचरितार्थत्वस्यापि तुल्यत्वाच्च । आकारे हि इह षग्रहणं विना लक्ष्यासिद्धिर्नास्तीत्यवाभिप्रेतं न तु पुष्णातीत्यादौ
रषाभ्यामित्यस्याप्रवृत्तिरितिदिक् । नन्वेवं प्रातिपदिकान्तस्य । लुप्तषष्ठीके इति । सौत्रत्वात् । ननु षष्ठीतत्पुरु
षयोः पूर्वपदे सापेक्षत्वेन समासासंभवात् । प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः । तदन्तस्येति । षष्ठी
तत्पुरुषः तस्यान्तो यो नकारस्तस्येत्यर्थः । उक्तं च हरदत्तेन । विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकम् । तथैव ॥राम॥
प्रातिपदिकेत्येतत्सदविशेषणमिति । यत्तु प्राचोक्तं प्रातिपदिकान्तस्य पदान्तस्य नस्येति । यच्च व्याख्यातं च ॥४३॥
तस्येत्युभाभ्यां संबध्यत इति तद्गौरवग्रस्तम् । अन्तस्येत्यस्यावृत्तिप्रसंगात् । व्यधिकरणषष्ठीद्वयापत्तेश्च ।
यदि त्वभेदेनैव संबंधेन प्रातिपदिकेन वनेत्यनेनापि पदं विशेष्यते तदा विशेषणेन तदन्तविधौ सोऽयमन्त
ग्रहणं शक्यमकर्तुम् । विभाषौषधिवनस्पत्योः । शीति नपुंसकाच्चेति विहितः । ननु जस्शसोः शिस्तस्मिन्नभत्वात्संभ
वात् । भस्येत्यनेनासर्वनामस्थानस्येव यजादेरित्यपान्तदेतदाह — असर्वनामस्थाने इति । अत एवेति । दोषणीश्चेति

प्रयोगात्। यद्यपि समाहारद्वंद्वस्य एकशेषे कृतेपि भाष्यं सुयोजम्। तथापि ककुदिपस्य प्रध्वन्यदत्वं न्याय्यं अन्य
थाककुद एकत्वं वा कोर्द्वित्वं च न लभ्येतेति भावः। तमुपाद्रवदुद्यम्यदक्षिणं दोर्निशाचर इति रघुः। तत्र दक्षि
णं दोरिति उद्यम्येत्यनेन कर्मतया संबध्यते। दोषंतस्येति। दोषंतस्य तथाविधस्य भजतश्चापस्य गरुहन्नूगुणमि
ति श्रीहर्षप्रयोगः। तत्र दोर्ष्णहस्तं दूषणं च भजतश्चापस्य गुणं मौर्वी अतिशयं चकृन्निति संबंधः। अमर
व्याख्यातारस्तु दोषशब्दं स्त्रियामपि स्त्री कृत्य भागुरिमतेन टापि दोषेत्युक्ता दोर्दोषा च भुजो बाहुः पाणिर्हस्तः कर
स्तथेति धनंजये निघंटुमुदाहरंतु। द्वयोरेकोर्भवइति। तद्धितार्थेति समासः। कालाहृस्त्र। द्विगोर्लुगन
पत्यइतिलुक्। राजाहः सखिभ्यश्चेति टच्। अह्नो। ह्नएतेभ्य इति अह्नादेशः। अह्नः सायइति। स्यतेर्घञि
अवसानवचनः सायशब्दः संख्याविसायपतिज्ञापकादेकदेशिसमासः। इत्यदन्ताः। हाहानिति। गंधर्वविशेष
वाचकं अव्युत्पन्नं प्रातिपदिकमिदम्। कौमारास्तु जहातीति हाहा इति क्विपा शब्दं वदन्तो विश्वपावद्रूपमाहुः।
तन्मतेप्युदाहरणं तु। अकारो वासुदेवः स्यात् तेन सह वर्तते इति साः तान् सा इति बोध्यम्॥ ॥इत्यादन्ताः॥
॥आङो नास्त्रियाम्। पुंसीति तुं नो रूपम्। अमुना कुले नेत्यत्र यथा स्यात्। न च तु मारूपसिद्धिः। मुत्वस्यासिद्धत्वा
तु-

स्व ५

प्र॰ स्थु॰

दिकोऽचीतिनुमोऽप्राप्तेः। नाऽदेशे तु नासिद्धं नमुने इति निषेधात्। न च नमुने इति निषेधोऽनुपपन्नः। ने इत्यकारस्य उ
च्चारणत्वादिति वाच्यम्। अमुष्मै कुलाय त्याद्यसिद्ध्यापत्तेः। अत्र घेः। इदुद्भ्यामिति। ङेरिति। औदिति वर्पदत्र
यमनुवर्तते। इत्याशयेन व्याचष्टे इदुद्भ्यामुत्तरस्येत्यादिना। घेरुत्तरस्येति तु नोक्तम्। सूत्रे घेरित्यस्य षष्ठ्यंत
त्वात्। तत्रान्वयादौ च प्रमाणाभावात्। औदिति पूर्वसूत्रे इदुद्भ्यामुत्तरस्य ङेरिति लब्ध्वा त्रसंबंधस्यत्यागापत्ते
श्च। औत्स्यादिति। अत्र व्याचख्युः। औतः इति त्वं स्वरितार्थं न विभक्त्याविती तं निषेधस्तु न भवति अनित्यत्वादनि
त्यत्वं च इदमस्तु सुरिति धमोमकारस्य इत्संज्ञापरित्राणार्थादुदित्करणाल्लभ्यत इति तत्रैवोक्तमिति। तर्हि यं ॥ राम ॥
। न विभक्तौ विनिसूत्रे चेऽरोतस्तु तकार उच्चारणार्थः। न संज्ञत इति स्वयमेवोक्तत्वेन पूर्वापरविरोधात्। युक्तं ॥ ४४ ॥
चोच्चारणार्थत्वं न तु स्वरितार्थत्वं। स्तीर्णे बर्हिषि समिधाने अग्नौ इत्यादौ स्वरितत्वादर्शनात्। अदितिन परत्वं
तु उद्भावित्यादौ अत्वे कृते स्त्रियां टाप् मा भूदित्येतदर्थमित्याहुः। तदपि चिंत्यम्। तपरग्रहणाद्धि टापाऽस
ह दीर्घो मा भूद्वा हुस्यादेव। लक्षणद्वय बाधे मानाभावात्। अत एव वृद्धिरेजि इति सूत्रे भाष्यवार्तिकयोर्वि
वरणे च सन्निपातपरिभाषया टाम्ने च युक्तम्। टापा व्यवधाने हि आनन्तर्यविघातः स्यादिति। तस्मादौतश्च

अतोपि तपरकरणमुच्चारणार्थमेवेत्यवधेयम्। अनड्सौ। सोऽत्येवसिद्धे अनङ्विधानमन्यतोपि स्यादिति ज्ञापनार्थं तेनो
शनसः संबुद्धौ अनङ् सिध्यतीति प्राचः। तच्चिंत्यम्। सोऽत्युक्ते हि ऋदुशनेत्युत्तरसूत्रेणापि ङ स्यात्। ततश्चोश
नेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात्। पुरूदंसेत्यत्र सान्तमहत इति स्यात्। यद्वा संज्ञापूर्वको विधिरनित्य
इति वा अंगवृत्तपरिभाषया वा समाधानं बोध्यम्। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। दीर्घादित्येतत् ङ्यापोरेव
विशेषणं न तु हलोऽसंभवादित्याह दीर्घौ याविति। परमिति। न त्विदं विहितविशेषणं यासाका इत्यादावव्या
२९त
प्तेः। न चात्र हल्त्वादिविशिष्टत्वेन निर्वाहः। यः सइत्यादावतिव्याप्तेः कन्त्यादावव्याप्तेश्चेति भावः। हलितितस्यव
सुतिसीत्येवं रूपत्वं एकदेशविकृतन्यायेन बोध्यम्। लुप्यत इति। यद्यपि हल्लोपाव्यर्वलोपेत्यतो लोप इत्यनु
वर्तते तथापि तत्र भावसाधनं। तथापीह कर्मसाधनं। हलिति प्रथमोत नसामानाधिकरण्यादिति भावः। दीर्घग्र
हणं किं। अतिखट्वः। निष्कौशांबिः। ननु इह समस्तस्य ङ्याबंतत्वं नास्ति। न च स्त्रीप्रत्यये तदादिनियमो
नास्तीति वाच्यम्। अनुपसर्जने हि तथा। इह तूपसर्जनत्वात्तदादिनियमोऽस्त्येव। सत्यम्। तथापि उत्तरपद
स्य ङ्याबंतत्वेन सोस्ततः परत्वानपायात्। न ह्यदं विहितविशेषणमित्यवोचाम। अत एव बहुश्रेयसीत्यत्र सु

४७

म॰ सु॰

लोपः। स्यादेतत्। गांगीयतेः क्विप्। गांगीः। इह हकारस्य स्थानिवद्भावेनाच्त्वात् दीर्घत्वाद्व्याप्तिरिति चेत् सत्यम्। ङीई आत्रा
प्रश्लिष्य दीर्घग्रहणं अस्य प्रत्याख्यानान्न कश्चिद्दोषः। सुतिसीति किम्। भेत्ता। तासेस्तकारस्य लोपो माभूत्। नैवे
वमपि भेत्सीदित्यादौ सिवो लोपापत्तिः। सुतिभ्यां साहचर्येण विभक्तेरेव ग्रहणात्। अपृक्ते किम्। भिनत्ति भिन
त्तीति प्रत्युदाहरन्ति। तच्चिन्त्यम्। विशिष्टस्याहल्त्वात्। सुतिसीनां हलिति क्लिष्टव्याख्यायामतिप्रसंगाऽपादानस्या
नुचितत्वात्। यदप्याहुः। सुरां सुनोतीति सुरासुत्। तमाचष्टे सुरासयति। ततः क्विप्। सुराः। सुरासौ सुरासः। इह सु ॥राम॥
नोतेरवयवस्य सस्य लोपं व्यावर्त्तयितुं अपृक्तग्रहणमिति। तदपि न। परस्परसाहचर्येण सुतिसीनां विभक्तीनामेव ॥४५॥
ग्रहणात्। अन्यथा सिवो लोपापत्तेरुक्तत्वात्। प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणाच्च। हल्ङ्किम्। विभेद। ननु प्र
थमं हल्ग्रहणं व्यर्थम्। हलन्तानां सर्वेषां संयोगान्तलोपसंभवात्। अत्राहुः। संयोगान्तस्य लोपेऽपि नलोपादिर्नासि
द्ध्यति। राजन्नुते नैव लोपः स्याद्धलस्तस्माद्विधीयते। तथाहि। सखेत्यत्र नलोपो न स्यात् संयोगान्तलोपस्यासिद्ध
त्वात्। स्यादेतत्। संयोगान्तलोपो नासिद्धो नङिसंबुद्ध्योरिति सूत्रे संबुद्धिग्रहणाज्ज्ञापकात्। नचैवं गोमानित्या
दावपि नलोपापत्तिः। ज्ञापकस्य विशेषविषयत्वात्। यत्र हि नकारविभक्त्योरानन्तर्यं तत्रैव सिद्धत्वमिति व्या

ख्यानात्। यत्त्वाकृः। हे ब्रह्मन्निति नपुंसकार्थत्वान्नैतत्ज्ञापकमिति। तन्न। लुका लुप्ते प्रत्ययलक्षणाभावे न संबुद्धौ वा नपुंसका
नामित्यस्यावश्यकतया च संबुद्धिग्रहणस्य नपुंसकविषयत्वासंभवेनउक्तज्ञापकस्य दुष्टत्वात्। तस्मान्नलोपेन प्रयोजन
मिति चेत्। इह तर्हि अभिनोऽत्र त्यत्र रोरुत्वं न स्यात्। तदिदमुक्तं नलोपादिरिति। तथा अबिभर्भवान्। अजागर्भवान्। इत्यत्र ति
लोपेन स्यात्। राल्लस्येति नियमात्। अत्रेदमवधेयम्। ङ्याब्ग्रहणं सोरेव विशेषणं न तु तिस्योः। व्याख्यानात्। अस्मिन्नेव
सूत्रे हि हल्ङ्याप्भ्यो ग्रहणं तिस्योश्च ग्रहणं न कर्तव्यं भवतीति भाष्य एव प्रमाणम्। यदि हि ङ्याब्ग्रहणं तिस्योरपि विशे
षणं स्यात् तर्हि कथं तिस्योर्ग्रहणस्याकर्तव्यतां ब्रूयात्। यत्तु ङ्याबन्तात् तिस्योरसंभव एवेति। तन्न। ग्रंथनादसंभवइतिस
त्यम्। आवं ना तु आसारक्षिवंतात्। ङः तिश्रसि पौस्त एव। अगंगात्। अगंगा इति यथा। नवशपान्यवधानं। एकादे
शस्य पूर्वान्तत्वेन ग्रहणात्। न च स्थानिवद्भावः। अपूर्वविधित्वात्। अत्रायं निष्कर्षः। ङ्यापः सोरित्येव सूत्रयितु
मुचितम्। न च सुराः स्फुरासैः इत्यादौ धातोः सकारे प्रसंगः। ङ्याब्भ्यां साहचर्यात्। प्रत्ययाप्रत्यययोरिति परिभाष
या च प्रत्ययस्यैव सो ग्रहणात्। राजेत्यादौ नलोपस्तु न ङि संबुद्ध्योरिति ज्ञापकत्वेन साधित एव। किंच। अभिनो
त्रेति उत्वमपि सूपपादम्। संयोगान्तलोपो रोरुत्वे इति सिद्धकाण्डपाठात्। हरिवो मेदिनं त्वेति यथा। अबिभर्भवा

न॰ सु॰

नित्यत्वापि न दोषः। रात्सस्येत्यत्र तकारस्यापि प्रश्लेषेणात्सस्येति च्छेदात्। ननु उखास्रदित्यादौ संयोगादिलोपः स्यादिति
चेत्। न। दत्वे कृते तदप्राप्तेः। असिद्धं दत्वमिति चेत्। न। सिद्धकाण्डे वस्वादिषु दत्वं इति पाठात्। नन्वेवं पदान्तत्वाद्दत्वं न
स्यादिति चेत्। न। सावपि पदं भवतीति पक्षाश्रयणात्। तद्बीजं तु अ सर्वनामस्थाने यचीति च्छित्वा यजादौ सर्वनामस्था
नेपदं नेति व्याख्यानम्। न वैवं राजेत्यादौ नलोपे कृते सोरुत्वविसर्गौ स्यातामिति वाच्यम्। इतोऽदिति सिद्धे पथिम
थीत्याकारविधाने न प्रथमं सुलोपस्य ज्ञापनात्। ननु नैतज्ज्ञापकम्। संबुद्धौ चरितार्थत्वात्। हे पन्थाः मन्थाः ऋ ॥राम॥
भुक्षाः। न च तर्हि दीर्घः स्यात् असंबुद्धाविति पर्युदस्तः। नलोपश्च निषिद्ध इति चेत्। एवं तर्हि नलोपात्प्राक् संयोगान्तलोपे ॥४६॥
त्यर्थे न ङि संबुद्ध्योरिति सूत्रमेव ज्ञापकमस्तु। तथा हि। ङिसंबुद्ध्योरिति षष्ठी न तु सप्तमी। ङेर्लुका लुप्तत्वात्प्रत्य
यलक्षणत्वाभावात्। ङ्यन्तस्य संबुद्ध्यन्तस्य च प्रातिपदिकस्येति सामानाधिकरण्येनान्वयः। न च प्रथमं संयोगान्त
लोपं विना संबुद्ध्यन्तं प्रातिपदिकं लभ्यते। तस्मात् ङ्यापःसोरिति न्यासेनैव किंचिज्ज्ञापकम्। यदि तु वस्वादिषु दत्वमि
ति वार्त्तिकं प्रत्याख्यायते अधातुग्रहणेनैव उखास्रदित्यादौ दीर्घाभावसिद्धेः। तर्हि हल्ङ्यापःसोरिति सूत्रम
स्तु। यत्तु यथाश्रुतं सूत्रं प्रा(?)वा(?) व्याख्यातं ङ्यन्तादाबन्ताद्दीर्घाच्चेति। तन्न। ङ्यापोर्हि दीर्घौ न तु तदन्तमिति। न च दी

घान् घन्तादित्यादेदीर्घयोऽन्तादन्तादित्यादिरर्थो लभ्यते। दीर्घादिति पंचम्या अनन्वयात्। समासे उपसर्जनयोश्चापि विशेषणायोगात्। उक्तं हि भाष्ये। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति। एतेन अनदीसंज्ञं ह्रस्वं इउवर्णान्तं इत्यपि प्राचां वृत्तिः प्रत्युक्ता। सख्युरसंबुद्धौ। इतोऽत्सर्वनामस्थान इत्यतः सर्वनामस्थाने इत्यनुवर्त्तते। तदसंबुद्धावित्यनेन विशेष्यते। गोतो णिदिति सूत्राणिदित्यनुवृत्तम्। तत्सामानाधिकरण्येन सप्तम्याः प्रथमा कल्प्यते इत्याशयेनाह संबुद्धिवर्जं सर्वनामस्थानं णिदिति। सख्युरसंबुद्धिरित्येव सूत्रयितुमुचितं। ख्यत्यात्परस्य। कृतयणादेशयोः खिखीशब्दयोरनुकरणं ख्यत्येवंतिनी शब्दयोस्त्यति। उभयत्रापि थकार उच्चारणार्थः। ननु सुख्याप त्यादिशब्दैकदेशानुकरणमिदम्। सख्युर्यः पत्युर्नः संख्यायाः संवत्सरसंख्यस्य च। आपत्यस्य च तद्धितेइत्यादि निर्देशादित्यभिप्रेत्याह खितिशब्दाभ्यामित्यादि। परस्येति ग्रहणं एकः पूर्वपरयोरित्यधिकारनिवृत्त्यर्थं। औत्। एतच्च नदीसंज्ञकेषु इदुद्भ्यामिति पूर्वसूत्रेण बाध्यते। घिसंज्ञकेषु अच्च घेरित्युत्तरसूत्रेण। तस्मात्संज्ञाद्वयशून्योऽस्य विषयः। न चैतादृश उकारोऽस्ति अत आह उकार इति। यत्तु प्राचा घिनदीसंज्ञावर्जिताभ्यामिदुद्भ्यां परस्येत्युक्तं तन्न। तादृशस्य उकारस्याप्रसिद्धेः समुदायस्येति। न च पर्युदासेपि पर्युदस्यमानसमर्पके सखिशब्दे तदन्त

म॰ सु॰

ग्राहकत्वं शंक्यम्। विशेष्यासन्निधानात्। यत्तु इह ग्रहणकत्वे त्याद्युपन्यस्तं हरदत्तेन। पद्यरव्यत्यात्सूत्रेकैपरेन। तन्न। तस्य प्रत्ययविधिविषयत्वात्। गौणत्वेपीति। अस्थ्याद्यनङ्वदिति भावः। तथा च। येन विधिरिति सूत्रे परमसखायाविति बहुव्रीहिः। तत्पुरुषे हि टचा भाव्यमिति कैयटः। तथा द्वितीयाश्रितेति सूत्रे सोमसखेति प्रतीकमुपादाय बहुव्रीहिर्नान्न समासान्तर इति कैयटः। भिदरोन्याद् इति सूत्रे तत्त्वक्रोष्टुः स्त्रियां वेति सूत्रे च भाष्यकैयटयोः रव्याधातो माधवग्रंथे ॥ ९

स्फुटमेतत्। अनुद्यक्षो वरुणइंद्रसखा आग्नेयाहि मरुत्सखा। तीव्रं सोमं पिबति गोसखायं इत्यादि प्रयोगाश्चैवमे ॥ ४

वसंगच्छन्ते। तच्च बहुव्रीहि प्रयुक्तस्य पूर्वपदप्रकृतिस्वरस्य दर्शनेन गौणत्वात्। एतेन घिसंज्ञासूत्रे शोभनः सखाऽस्य सुसखिरित्युदाहरन्तौ हरदत्तन्यासकारौ तदनुगामिनश्चान्ये ऽपास्ताः। पतिः समास एव। एवकार इष्टतोऽवधारणार्थः। अन्यथा हि समासे पतिरेवेति संभाव्येत। यात्वादेरित्यादिज्ञापकानुसरणेन प्रतिपत्तिगौरवं स्यात्। पतिरित्याख्याघ्यघ कथं सीतायाः पतये नमः। पराशरश्च। नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ विति। उच्यते। पतिरित्याख्यातः पतिः। पौटिलोपश्च वइरित्येणादिकः। अयं पतिशब्दः पतिः समास एवेत्यत्र न गृह्यते लाक्षणिकत्वात्। सखिना वानरेंद्रेणेति रामायणे व्याख्यानम्। बहुगणवतुडति एतेन कृच्छ्रस्य सखिरर्जुन इति भारते।

संख्या॰ बहुगणौ प्रातिपदिके संख्यावाचके गृह्येते। न तु संघवैपुल्यवाचके अपि संख्यायते। न येह्यन्वर्थसंज्ञा
विज्ञानात्। अत एवऽतिरपि न। डति एव गृह्येते व तु नासाहचर्यात्रि न तु पातेर्डतिः। षड्भ्यो लुक्। षड्भ्यः परयोरिति।
बहुवचननिर्देशोऽर्थप्राधान्यसूचनार्थः। षडर्थगतं संख्याभिधायिनोरिति फलितोऽर्थः। प्रत्ययलोपे प्रत्यय
लक्षणं। स्थानिवत्सूत्रेण सिद्धे नियमार्थमिदम्। प्रत्ययस्यासाधारणं रूपं यत्र प्रयोजकं तदेव कार्यं प्रत्यय
लोपे सति भवति न तु प्रत्ययाप्रत्ययसाधारणमिति। तेन शोभनादृषदोऽस्य सुदृषत् प्रासाद इत्यत्रात्वस
न्तस्येति दीर्घो न। यद्वा। यत्र प्रत्ययः प्राधान्येनाऽऽश्रीयते तत्रान्यविधावपि विध्यर्थमिदम्। तेनाट्‌णेडित्यत्र हृ
लादौ पिति सार्वधातुके विहितः इट् लुप्तेपि तस्मिन् भवति। वर्णाश्रये नास्ति प्रत्ययलक्षणमिति तु वर्णप्राधा
न्यविषयकम्। तेन गवे हितं गोहितमित्यत्र अव्। अस्मदिति। अत्र प्राचा अव्ययेत्यपि पठितम्। तत्तु अव्यया
नां प्रायेण निर्लिंगत्वादव्ययीभावस्य तु बत्वेपि लिंगान्तराभावाच्चोपेक्षितम्। वस्तुतस्त्विति। अर्थप्राधा
न्यबोधकस्य बहुवचनस्याभावात् गौणत्वेपि त्यदादेशो न्याय्यः। अस्मभ्यान्नड्वदिति भावः। द्विपर्यन्ता
नामेवेति। तेनेह न। भवान् भवन्तौ। अकारो वक्तव्य इति। तथा च बहुत्वाभावे औडुलोमिशब्दस्य रकुत्रैः

·स्त्र·

बहुत्वे तु अकारान्त उडुलोमशब्दोऽन्य एव। तस्य च इकारान्तेषु व्युत्पादनं प्रासंगिकमिति भावः। तथा च औडुलोमिश
ब्दस्य इदन्तस्य बहुत्वेऽदन्तत्वमिति तन्न्यमितव्यम्॥ ॥इति इदन्ताः॥ ॥किदिति। तेन आतो लोप इटि चेत्यालोप
इति भावः। ययीपयादय इति। यत्तु प्राचा क्कसु एवं देवयज्यातिलब्ध्यादय इति। तन्न। देवान् यजत इति विग्रहे
इन्त्रित्यौणादिकसूत्रेण कृत्वान्तस्यैव देवयजिशब्दस्योज्ज्वलदत्तादिभिः साधितत्वात्। च मोद्विजान् देवयजीन्नि
हन्म इति भट्टिप्रयोगस्य कृत्वविषयकतयैव व्याख्याततत्वात्। न च यजेर्दीर्घ ई प्रत्ययः प्रतिपदोक्तोऽस्ति बहुलग्र
हणात् कल्प्यत इति चेत्। न वेदेवम्। यद्यनन्यथासिद्धं कल्पकमुपलभ्येत। वेदे हि कृत्व एव प्रयुज्यते। आप
जित्वा मनवे जातवेदसं ईरति। अतिलक्ष्मीशब्दस्य तु नदीत्वात् कृत्वे आगमे नुटि आमि च हृते महदेव वेल
क्षण्यमिति न वा तत्र मीमांस्यम्। एतच्च मूल एव स्पष्टीभविष्यति। किंचेतेति। एतच्च माङ्माने शब्दे च इतिधा
तोर्माय च ग्रन्थे स्पष्टम्। बहुश्रेयसीति। ईयसश्चेति न कप्। नाप्युपसर्जनकृत्वः। ईयसो बहुव्रीहौ नेति निषेधात्।
यू स्त्र्याख्यौ नदी। ईदूदन्तावेति। इह वर्णावेर वर्णसंज्ञेत्यपि पठ्यतेऽस्ति। आङ्गीनयोरिति सूत्रे च स्वरसात्। नयो
स्त्र्याख्यत्वं तु ङ्यादिष्वस्त्वतः। कथं तु स्त्रीवाचकवर्णसमुदाये घटकत्वेन प्रवेशात्। शक्तिपर्याप्त्यधिकरण

॥राम॥
॥४८॥

त्वस्याविवक्षितत्वात्। तेन नद्यंतादित्यादि व्यवहारो न विरुध्यते। एवं घिसंज्ञायामपि इदुद्वर्णौ तदंतं वा संज्ञि इति पक्षद्वयं
बोध्यम्। वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नस्यावयव इत्यर्थः। न तु सखिशब्दावयवं वर्जयित्वेति। तेनाति
सखिनेत्यादि निर्बाधमित्यवधेयम्। पूर्वमिति। सूत्रेः प्रागित्यर्थः। वक्ष्यमिति। संज्ञापायपोद्देशं प्रवृत्तेनोन्यायसि
द्धमिदं। कार्यकालावेतु वाचनिकम्। अचि श्नु। इह धातोरिति धातोरेव विशेषणं न तु श्नुभ्रुवोरव्यभिचारात्। इत्याह
इवर्णोवर्णांतधातोरिति। श्नुप्रभृतीनामिवर्णोवर्णयोरिति व्याख्याने तु इयङुवङोर्द्वित्वं व्यर्थम्। वैयधिकरण्यं
च दोषः। क्षिपति अध्यक ततृदिदिवतुः। ऊपतुः इत्यादौ वातिव्याप्तिः। तद्वारणाय इवर्णोवर्णयोरचूपरत्वेन वि
शेषणे तु क्लिष्टतेति भावः। आन्तरतम्यादिति। स्थानत इति भावः। एरनेकाचः। अचि श्नुधात्विति सूत्रे इदं द्विनि
र्दशेऽपि धातुरेवेह संबध्यते न तु श्नुभ्रुवौ तयोरिवर्णासंभवात्। धातुग्रहणं चावृत्त्या उभयोर्विशेषणं संयोग
स्यांगस्येति व्याचष्टे धात्ववयवसंयोगेत्यादि। तत्र धातुना संयोगस्य विशेषणात्। इह यण्। उन्न्यौ उन्न्यः। अंग
विशेषणं तु हरिं हरी हरीन्। इत्यादिसिद्ध्यै। यदि हि धातुनांगं न विशेष्येत तर्हि इहापि प्रध्यं प्रध्य इत्यादावि
व पूर्वरूपं पूर्वसवर्णदीर्घं च बाधित्वा यण् स्यात्। धात्ववयवसंयोगपूर्वको न भवति य इवर्णस्तदन्तत्वादंगस्य।

(97)

न·सु·

वृश्चिकशब्दस्येति। भाष्यकृता हि बुद्धिपरिकल्पितमपायमुपाश्रित्य भीत्रार्थानामिति सूत्रं प्रत्याख्यातम्। ततश्च सं
बंधमात्रविवक्षायां षष्ठ्येवेति भावः। सूत्रमते त्वाह। वृश्चिकसंबंधिनीति। अल्लोपयलोपाविति। नवपरत्वाद्देरेकृ
स्येति स्यादिति वाच्यम्। वरं कृत्ते लोपा द्वलि लोपः पूर्वविप्रतिषेधेनेति वार्त्तिककारोक्तेः। क्रोष्टुप्रमितिः नपुंसके
भावे क्तः। क्रोष्टो लोपः इत्यर्थः। इदं सर्वं कुमारीमिच्छन् कुमारीत्यत्रापि बोध्यम्। अनन्यतयेति। गौणत्वेऽप्यनङ्गुणित्व
योः प्रवृत्तेरुक्तत्वाच्चेति बोध्यम्। दीर्घस्यापीति। एतदर्थं कृतयणानिर्देश इति भावः। ननु अतिसखेः पतेः इ
ति गुणविषये व्यावर्त्तयितुं यणानिर्देश इति चेत्। अस्त्वेवम्। तथापि दीर्घे प्रवृत्ते दुर्वारत्वात्। नहि क्त्वस्तु भाष्ये
न दीर्घो घित्यत्र प्रमाणमस्ति। सौत्रस्य विकृतनिर्देशस्याव्याप्त्यतिव्याप्त्युभयवारकत्वेन सार्थकत्वलाभेन तथैव
वक्तोचितत्वात्। भाष्यारूढत्वाच्च। यत्तु प्राचा वेति केचिदित्युक्त्वा सख्युः सुख्य इत्याद्युक्तम्। यच्च तद्व्याख्यातृभि
रुभयमप्येतद्भाष्यविरुद्धमित्युक्तम्। यच्चात्रोपष्टंभार्थं प्रसादकृतोक्तं सख्युः पत्युः प्रातिज्ञोयत्सख्यत्यादित्या
हृ पाणिनिः। साधारणं तन्मन्वानाः सख्युः पत्युः सुखीः सुतीः सुखीयति सुतीयत्योर्यौ क्विबन्तौ तयोर्विदुः।
निष्ठादेशस्य पूर्वत्रासिद्धत्वाच्छून्युरादिकम्॥१॥ सुख्य इत्यादि साधितदुभयं भाष्यगौरवादिति विचारविं

॥राम॥
॥५९॥

तामणिरत्नश्लोकोपन्यसनं कृतं तदेतत्सर्वं भाष्यकैयटापर्यालोचनमूलकमिति कृतं बहुपल्लवविदां कुर्वन्तु। अक्षि
पश्यति। यत्तु अक्ष्युः पक्ष्युः अक्ष्णः पक्ष्णः इत्युदाजहुः भाष्ये स्थितमिति चोपसंजहुः तदतिरभसात्॥ ॥इति
ईदन्ताः॥ ॥तृज्वत्क्रोष्टुः। क्रुश आह्वाने। अस्मात्सितनीतितुन्प्रत्यये क्रोष्टुशब्दः। तृचि तु क्रोष्टृशब्दः। द्वा
वपि सृगालवचनौ। तत्राविशेषेण द्वयोः प्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां तृजन्त एवेति तृतीयादावुभयम्। अ
न्यत्र तु तुन्नन्त एवेति नियमार्थं त्रिसूत्री आरभ्यते। क्रोष्टुरिति तुन्नन्तात्प्रथमा। तृज्वदिति तृतीयान्ताद्वतिः।
निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपविषयकत्वेनातिदेशस्य षड्विधत्वेऽपि भाष्यान्यादिह रूपमेवातिदिश्यते।
तच्चानपवादे यस्य कस्यचित्। किंतु क्रुशेस्तृच उपात्तत्वात्तदर्थतया नयनम्। इत्यभिप्रेत्य फलितमाह क्रोष्टुश
ब्दस्थाने इति। नियमार्थमिति। अन्येषां संज्ञाशब्दानां मा भूदित्येतदर्थमित्यर्थः। क्रोष्टेति। अनङ्। हल्ङ्या
दिलोपात्परत्वादुपधादीर्घः। सवसर्वनामस्थाने चेत्यनेन यद्यपि लभ्यते तथापि परत्वादप्तृन्नित्येव न्याय्यः।
कृतेऽप्यनङि एकदेशविकृतस्यानन्यत्वेन तृन्नन्तत्वात्। अन्यथा गुणे कृतेऽपि दीर्घो न स्यादिति भावः। रास्
स्य। इह तकारोऽपि प्रश्लिष्यत इति पक्षान्तरं ते न हल्ङ्यादिसूत्रे स्यस्थाने ङ्यापः सौरिति निष्कर्षे। विसर्गयानि

प्रयोजकप्राप्त्यभावे २

म॰ सु॰

त्यादि सिध्यति। अजर्घर्तेरित्यत्र तु यत्वस्यासिद्धत्वान्न लोपो न। ननु कीर्त्तयतेः क्विपि कीर्त्तेरिह स्यादिति चेत्। यथालक्षणमप्रयुक्ते इति भाष्यम्। एतेनावर्वर्तेरिति व्याख्यातम्। परत्वादिति। न च नुण्णित्य इति वाच्यम्। टञ्चक्राचे कृते सन्निपातपरिभाषया नुटो दुर्लभत्वादिति भावः। नुमविरेति। न नुटः णस्य विषये प्राप्तं सर्वं बाध्यम्। बाध्यसामान्यचिन्ताश्रयणात्। तथा च वक्ष्यते। गुणदीर्घत्वानामपवाद इति। एवं चाविशेषात् नुडप्यनेन बाध्यः। तत्कथं विप्रतिषेधः। उत्सर्गापवादयोस्तदयोगादिति चेत्। सत्यम्। अत एव तदंशे विप्रतिषेधं दूषयित्वा नतिस्त्वतस्त्वं इति ज्ञापकात् नुडिति भाष्यकृतोक्तमिति ॥ राम ॥ सन्तोष्टव्यम्॥ ॥इत्युदन्ताः॥ ॥हूहूरिति॥ अप्युत्पन्नसंज्ञेयम्। अतिचमूशब्दे त्विति। प्रथमलिंगग्रहणं चेत्यु ॥ ५० ॥ क्तेः। तथा च। एवमतिचम्वाप्यश इति प्राचो ग्रंथो भाष्यविरुद्ध इति भावः। वर्षाभ्वश्च। वर्षाभूशब्दस्य नित्यस्त्रीलिंगत्वात् स्त्रीलिंगप्रकरण एव एतत्सूत्रं च कर्तुं युक्तम्। पुल्लिंगे तु क्रियाशब्दाभिप्रायेण कथंचिद्योज्यमिति व्याचख्युः तदभसात्। दर्दुरे हि पुल्लिंगो यम्। भेके मंडूकवर्षाभूशालूरप्लवदर्दुरा इत्यमरोक्तेः। भिन्नलिंगानां न द्वंद्व इति तेन परिभाषितत्वात्। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति यादवकोशाच्च। दर्दुरे षण्णीति पाठान्तरम्। षण् इति पुल्लिंगस्य प्राचां संज्ञा। दृभतीति। दृभी ग्रंथे तुदादिः। त्युत्वादित[illegible]। यद्यपि उज्ज्वलदत्तेन दृंफू इति पवर्गद्वितीय

यंपठित्वाद्दंफेर्नलोपाभावोनिपात्यतइतिव्याख्यातम्। तथापिहृत्स्यन्तरे षुद्दभीयंथइत्यस्मात्ऊप्रत्ययेनुमागमोनिपात्यतइत्यु
क्तम्। एतच्चमाधवग्रंथेस्पष्टम्। दशपादीवृत्तौतुदर्भणंदृंभूः नुमागमोऽनुस्वारश्चनिपात्यतेइत्युक्तम्। अयमृकारोनथा
तोरित्युवङोऽप्रसंगात् इकोयणचीतियण्। सवामिपूर्वः प्रथमयोः पूर्वसवर्णइत्याभ्यांबाध्यतेइत्याशयेनोदाहरतिदंभू
मित्यादि। नवदृदंन्करेतियणूर्शंक्यः तत्र अर्थवतएवग्रहणात। अस्यतुदृंन्शब्दस्यदृशब्दस्यचानर्थकत्वादितिभा
वः। एवंचार्यंहू हूवदितिफलितम्। श्रीपतिमतेनाह। दृन्नितीति। माधवस्तु ग्रंइदृंभू इत्यादिसूत्रेणदृंदशब्दे उपपदे
कूप्रत्ययः उपपदस्यदृन्नादेशश्चनिपात्यतेइत्याह दृन्भूरिति। तरुसर्पजातिभेदइतिकेचित्। कपिरित्यन्ये। दृन्करेति।
अत्र दृन्नितिनात्नपाठोमुख्यः। मात्नपाठोऽपिकेषांचित्। वक्ष्यरति। वर्षाभ्वश्चेतिचकारोऽनुक्तसमुच्चयार्थः। अनुक्तं
भाष्यवार्तिकबलान्निर्णेयमितिभावः। तथाचवर्षाभ्वःपुनर्भ्वश्चेतिवार्तिकंव्याख्यायभाष्यकारआह। अत्यल्पमिद
मुच्यते। वर्षादृन्कारपुनःपूर्वस्यभुवरतिवक्तव्यमिति। वामनेनतुदृन्शब्दोनपठितएव। एवंस्थितेयत्स्वावादृन्कौरे
तिपठितंयच्चतत्सौत्रेणमहाभाष्यकारवचनमर्थतोऽनुवदतीत्युक्तं यच्चान्येवार्तिकेनपूरितमर्थमुदाहरतीत्यवता
रितंतत्सर्वंविस्रब्धसकृतमेव। नचभाष्येपिदृंगित्येवपाठइतिभ्रमितव्यम्। ग्रंदृंदंभूरितिनिपातितइतिमाधवग्रंथेनके

क २

म॰ कु॰

यदादि ग्रंथैश्च विरोधापत्तेरिति यत्किंचिदेतत्। दीर्घपाठ इति। अयं च भाष्यवृत्त्यादि बहुग्रंथसम्मतः पाठः। ऋतु स्मृतौ तु
ह्रस्वः पठ्यते, यत्तु तद्धितवृत्तावुक्तं एकदेशविकृतस्यानन्यत्वात् ऌकारपूर्वस्यापि सिद्धमिति, तन्न। तथापि अण्प्रत्ययविशिष्ट
स्य अन्यत्वात्। न ह्यण्प्रत्ययोपि विकारः। तस्माद्ध्रस्वपाठे कारपूर्वस्य उवङ् वा। तथा दीर्घपाठे कारपूर्वस्योवङिति विवेकः।
स्वयंभूवदिति। ग्रावा तु दृन्भूकाराभ्रंशश्च वर्षाभ्वदुदाहृतौ तन्निषेद्धलिलाडुपेक्ष्यमिति भावः॥ ॥इत्यूदन्ताः॥ ॥दृस
दृन्भूं दस्युभयपथेति सूत्राद्दुभयपथेत्यनुवर्तते। छंदसीति तु निवृत्तम्। तेन चित्ता जर्जरयेतसां व तदृणांकानामशास्त्रे ॥राम॥
कथा। दृणामेको गम्यस्त्वमसीत्यादिप्रयोगाः संगच्छन्ते। केचित्तु छंदसीत्यनुवर्तयन्ति तदयुक्तम्। पूर्वसूत्रेणैव सिद्धे ॥५१॥
न्नैवेति सूत्रस्य वैयर्थ्यापत्तेः। यदपि पूर्वसूत्रे तिसृ चतसृ इत्यनुवर्तयन्ति तदप्ययुक्तम्। अविशेषेण विकल्पदर्श
नात्। तथा च याता धातॄणामिति मंत्रे तैत्तिरीयैर्ह्रस्वः पठ्यते बह्वृचैस्तु दीर्घ इति दिक्॥ ॥इत्यृदन्ताः॥ ॥ओतो
णिदिति वाच्यमिति। गोत इत्यपहाय ओत इति वाच्यमित्यर्थः। तथा च गामित्यत्र परत्वाद्वृद्धौ सत्यां आत्वं नस्यादि
त्याशंक्य निरवकाशतया आत्वेन वृद्धिर्बाध्यत इत्योतोऽम्शसोरिति सूत्रे भाष्यकृतोक्तम्। कैयटोपि तत्रेत्थमा
ह। ओत इति सूत्रं पाठ्यम्। गोत इत्योकारोपलक्षणतया वा व्याख्येयमिति। वृत्त्यादि ग्रंथेष्वप्येवमेव स्थितम्। स्मृतो

रिति। यत्त्वाहुः। गोशब्देन औणादिकेन साहचर्याद्द्योशब्दस्यैव लक्ष्यते तेन त्वोकारान्तमात्रस्य। तेन स्मृतोः स्मृतवौ स्मृतव इत्येव भवतीति तत् भाष्यविरुद्धम्। गोद्योर्न्यायेन परस्यापि त्वाभ्युपगमे हि ओतोम्शसोरित्यात्वस्य स्मृतामित्यादिरवकाशः स्यात्। तथा च गामित्यत्र परत्वाद्वृद्धेर्दुर्वारतया ऽदाहृतभाष्योक्तमात्वस्य बाधकत्वं निरवकाशत्वेन न संगच्छेतेति दिक्। इत्योदन्ताः॥ ॥रायो हलि। अर्थे रैर्विभवा अपीत्यमरः। सुं स्त्वम्। संरायाभूय सास्त्रजेत्यादि प्रयोगाच्च। रायि श्रौदस इति भाष्यम्। तत्र क्वच जन्तस्य रैशब्दस्य च्छान्दसत्वपरं न तु केवलस्यापीति वान्तो यीति सूत्रे कैयटः। केवलोऽपि च्छान्दस इति पक्षान्तरं सरवाह॥ ॥इत्यैदन्ताः॥ ॥ग्लौर्मृगाङ्कः कलानिधिरित्यमरः। एवं जनानवतीति जनौः। ज्वरत्वरेत्यूठ् वृद्धि इत्येधतीति ह वृद्धिः। जनावौ। जनाव इत्यादि॥ ॥इत्यजन्ताः पुल्लिंगाः॥ ॥रमेति। लिंगविशिष्टपरिभाषया प्रातिपदिकत्वात्स्वादयः। यत्तु आबन्तत्वादिति यच्च व्याचख्युः प्रत्ययान्तत्वादप्रातिपदिकत्वेऽपि टाप इङ्याप्ग्रहणात् इत्यर्थ इति तन्न। ङ्याब्ग्रहणस्यान्यार्थतायाः प्रागेवोक्तत्वात्। एङ्ह्रस्वादिति। परत्वात्प्रातिपदोक्तत्वाच्च संबुद्धेरेत्वे कृते हल्ङ्याब्भ्यो दीर्घादिति लोपो न प्राप्नोति। स्थानिवद्भावादाप्त्वेऽपि आकाररूपत्वाभावात्। आ आबिति आकारं प्रश्लिष्य दीर्घग्रहणप्रत्याख्यानात्। यथाश्रुतेऽपि एङ्ह्रस्वादिति लोपस्यैव परत्वेन न्याय्यत्वादिति भावः। याडापः। यद्यपि याडित्येवाचितम्। न चातो गुण इति पररूपोपपत्तिः। अकारोच्चारणसामर्थ्यान्नैव तद्बाधात्। तथापि ङच्चारणार्थोऽकार इति

अदसः सकारस्य केवलस्य आदेशाभावात् षत्वेन स्यात्।४

म॰ सु॰

संभाव्येत। अतः स्पष्टार्थयाड् कृतः। वृद्धिरेचीति वृद्धिः। यत्तु प्राचा आटश्चेत्युदाहृतं तन्न। याड् स्याटोर्ष्टकारस्य समुदाया
नुबंधत्वेन इह आटोऽभावात्। सर्वनाम्नः स्याड्ढ्रस्वश्च। दीर्घोच्चारणं प्रावत्। अत्रवदन्ति सर्वनाम्नः सुडे त्येव सूत्र्य
ताम्। एवं च याटि परे ङित्वादेत्यादेशे सुडि सर्वस्यायित्यादि। सिध्यति। स्याड् करणेऽह्रस्वविधानेन प्रयोजनं नैर्गि
त्यमिति। अत्रेयं चिन्ता अ सुडे त्युक्ते मुष्यैइत्यादि न सिध्येदिति। वस्तुतस्तु आमि सर्वनाम्नः सुड् याटोऽह्रस्वश्चेति
सूत्रयितुं युक्तम्। न चैवं याट एव ह्रस्वापत्तिः दीर्घोच्चारणसामर्थ्यात्। ह्रस्वोच्चारणे यकारसामर्थ्यादेवातो गुणस्य ।।राम।।
वारयितुं शक्यत्वादित्यवधेयम्। विभाषा। गोणत्वाद प्राप्ते विभाषेयम्। यस्त्वाङः। न बहुव्रीहाविति निषेधप्राप्तमिति ।। ५२।।
तदापाततः। तस्या लौकिकप्रक्रियावाक्यान्तर्गतसर्वादिविषयत्वात्। अस्य च समासविषयत्वात्। यत्तरेति। य
त्वाङः। या पूर्वा सोत्तरा ऽस्या उत्तरपूर्वेति। तद्भ्रमसात्। पूर्वनिपातवैपरीत्यापत्तेः। तीयस्येति। इदं हि पुन्नपुंसक
योरावश्यकं अनेनैव सिद्धे विभाषा द्वितीयातृतीयाभ्यामिति सूत्रं न कर्तव्यमिति भावः। अंबार्थनद्योः। अत्र वा
र्तिकम्। मातुर्मातच् पुत्रार्थमर्हते इति। मातृशब्दस्य संबुद्धौ मातजादेशो भवति। मात्रा पुत्रस्य श्लाघ्यत्वे द्योत्ये।
गार्गिमाता अस्य गार्गीमातृकः। तस्य संबोधनं हे गार्गीमात। न द्य तश्चेति समासान्तस्यापवादोऽयम्। यत्र तु श्लाघ्य
त्वं न द्योत्यं किं तु स्वरूपकथनमात्रं तत्र कबेव। गार्गीमातृक।। आबन्तं यदङ्गमिति। यत्तु याडापइति सूत्रं व्याचख्यौ

णेरुक्तं अतिखट्वायेत्यत्र लाक्षणिकत्वान्नयाडिति । एवमतिसर्व्वायेत्यत्र न स्याडिति तद्भसात् । न ह्यतिदेशस्य विषये लक्ष
णप्रतिपदोक्तपरिभाषा प्रवर्त्तते । अतिदेशवैयर्थ्यापत्तेः ॥ तेन याड् दुर्वारः स्याटस्क प्रसंग एव नास्ति । संज्ञोपसर्जनयोः
पाठात्पर्युदासात् । क्वचित्त्विति । परिशिष्टकारादयः ॥ ङिति ह्रस्वश्च । अप्राप्तविभाषेयम् । ह्रस्वयोरप्राप्तेरितरयोस्तु
नेयङुवङ्स्थानाविति निषेधे प्राप्ते आरंभात् । इह इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगाविति त्रीणि इदू
तोर्विशेषणानि । ह्रस्वयोस्तु स्त्रियामित्येव न तु नित्यस्त्रीत्वपर्यन्तम् । अन्यथा इष्वशनिप्रभृतीनामुभयलिंगानां पटु
मृदुप्रभृतीनां सर्वलिंगानां च स्त्रीत्वेपि नदीत्वं न स्यात् । कैयटरीत्या नित्यस्त्रीत्वाभावात् । हरदत्तमतेपि ह्रस्वांशेनि
त्यग्रहणव्यावर्त्यालाभाच्च । अत एव व्याख्याग्रहणमपहाय स्त्रीशब्दमात्रं निष्कृष्य संबध्यते । तदेतदाह । ह्रस्वौ च इदु
वर्णौ स्त्रियामिति । आत्वे प्राप्त इति । परत्वादिति भावः ॥ यत्तु प्राचा औदिति सूत्रे घिनदीसंज्ञावर्जिताभ्यामिति व्याख्या
तं नासावक्षरार्थः किंतुष्टवोत्तरसूत्रद्वयबलल्लभ्यः । एवं च इदुद्भ्यामिति सूत्रानुपन्यसनं प्राचः प्रामादिकमेव ।
अचिर ऋतः । गुणदीर्घत्वानामिति । तिसृ इः । तिस्रः तिष्ठन्तीत्यत्र ऋतो ङीति गुणस्य । तिस्रः पश्येत्यत्र प्रथमयोरिति पूर्वस
वर्णदीर्घस्य । प्रियतिसृ आगतः प्रियतिस्रः स्वमित्यत्र ऋत उदित्युत्वस्य परत्वमपवाद इत्यर्थः ॥ बाध्यसामान्य
चिन्तायां स्वविषये प्राप्तस्य सर्वस्य बाधादिति भावः ॥ विशेषचिन्तायां तु मध्ये ऽपवादा इति न्यायेन दीर्घत्वयोरेव

105

म॰ सु॰

बाधः स्यात्। न तु गुणस्य। सामान्यविशेषपक्षौ च जातिव्यक्तिपक्षवत् लक्ष्यानुरोधाद्व्यवस्थितौ इति कैयटादौ स्पष्टम्। यत्तु व्या
ख्यातृभिः। अपवादशब्दो बाधकत्वोपलक्षकः। पूर्वविप्रतिषेधेन गुणमपि बाधत इत्याशय इति तन्निर्मूलं क्लिष्टं च। यदपि
प्रसादकृतोक्तं गुणस्य पूर्वविप्रतिषेधेन इतरयोः परविप्रतिषेधेन बाधक इत्यर्थ इति तन्न। एवं विधेरेव चरितार्थत्वात्। नच
दोषोऽचरितार्थता यणागतार्थत्वात्। त्रिचतुरोर्विशेषणादिति। श्रुतत्वाद्धित्रिचतुरोरित्यस्यैव स्त्रियामिति विशेषणं
नाङ्गस्येति भावः। प्रियत्रिरिति। अत्र व्याचक्षते। स्त्रिया अन्यपदार्थत्वेन बहुव्रीहिरूपमङ्गं तत्र वर्तते त्रिशब्दस्तु पु
न्नपुंसकयोरेवेति तिस्रादेशो नेत्यादि। अत्रेदं वक्तव्यम्। जहत्स्वार्थायां त्रिशब्दोऽनर्थकः। अजहत्स्वार्थायां तु
स्त्रियां वर्तत एव तत्कथं पुन्नपुंसकवृत्तितासंगच्छतामिति। अत्रेदं तत्त्वम्। जहत्स्वार्थैव वृत्तिरिहाभिमता लक्ष्य
नुरोधात्। तेनाङ्गं स्त्रियामिति सम्यगेव। त्रिशब्दस्य पुन्नपुंसकवाचितातु भूतपूर्वगत्या। उत्तरपदार्थप्रधानस्त
त्पुरुष इत्यादिसिद्धान्तप्रवादस्यैवमेव निर्वाह्यत्वात्। एवं प्रियतिसा पुमानित्यत्र स्त्रियां वृत्तिरपि भूतपूर्वगत्यैव।
अजहत्स्वार्थापक्षे तु। स्त्रीनिष्ठसंख्यासमर्पकयोस्त्रिचतुरोरिति विवक्षितोऽर्थः। प्रत्ययान्तरपदयोश्चेत्येतस्य
त्रगतभाष्यग्रंथसंदर्भश्चैव प्रमाणम्। अनित्यत्वादिति। इकोऽचीत्यत्र ग्रहणमिह लिङ्गम्। तद्धि संबुद्धौ नुमं वारयि
तुं कृतम्। श्यामादिषु सत्स्वपि नुमितच्छोपसंभवात्। संबुद्धिश्च नु ... नु प्रेति प्रत्ययलक्षणेन नुमः प्राप्तिर्वाच्या।

॥ राम ॥
॥ ५३ ॥

(106)

प्रत्ययलक्षणं च न लुमतेति निषेधस्यानित्यतां विना दुर्लभमित्याकरे स्पष्टम्। न चैवमनित्यत्वं संकुचितगुणमात्रविषयक
मित्यभिनिवेष्टव्यम्। लक्ष्यानुरोधेनान्यत्रापि क्वचित् तदभ्युपगमे बाधकाभावात्। तथा च प्रियतिसृ प्रियत्रि इति रूप
द्वयमपि उक्तरीत्यैव कैयटेन समर्थितम्। एवं विप्रतिषेधेनेति। न चात्र प्रमाणाभावः। प्रियतिसृणी प्रियतिसृणि इत्या
दिभाष्योदाहरणस्यैव तत्र प्रमाणत्वात्। द्विरत्वे सत्याविति। विभक्तिसन्निपातमपि त्यदाद्यत्वं टापो निमित्तम्। सन्निपात
परिभाषाया अनित्यत्वात्। नयासयोरित्यादि ज्ञापकाश्चेति भावः। इयादेशा इति। अजादौ य इयादेशो विहितः स उपसर्ज
नत्वे पुंसि विद्यमानस्य स्त्रीशब्दस्य अमशसादिषु च तुष्ट्वेन त्वयत्र। गुणनाभावादिभिः पूर्वोक्तैर्बाधितत्वादित्यर्थः।
नेयङुवङ्स्थानावस्त्री। तिष्ठतो ययोरिति स्थानौ अधिकरणे ल्युट्। इयङुवङोः स्थानाविति षष्ठीसमासः। फलितार्थ
माह इयङुवङोः स्थितिर्ययोरिति। यत्र इयङुवङौ निष्पद्येते तत्रैवायं निषेधः। यत्र त्वपवादेन बाध्येते न तत्र निषेध इत्ये
तदर्थं स्थानग्रहणम्। वामि। यद्यपि प्रकृतो निषेधोऽनेन विकल्प्यते इति प्राञ्चस्तथापि निषेधविकल्पे विधिविकल्प
एव फलतीति। तथा च लाघवात् स एव सूत्रार्थ उचित इत्याशयेनाह वा नदीसंज्ञौ स्त इति। ङिति ह्रस्वश्चेति सूत्रेऽप्येव
मेव। कथं तर्हि ङिति। उवङ्स्थानत्वेन नदीत्वाभावात् ह्रस्वो नुपपन्न इत्याक्षेपः। बहुवशीति। केचित्तु वामीत्यतो वाग्र

म· सु·

स्थानिवत्त्वापत्त्या व्यवस्थितविभाषां वाश्रित्य समादधुः। तन्मन्दम्। तथा सति इह नञ्ग्रहणस्य वामीत्युत्तरसूत्रस्यैवैय
र्थ्यापत्तेः। अन्ये तु सामान्येन नपुंसकमिति कथंचित्समादधुः। नषट्स्व। स्त्रियां यदुक्तं तन्न भवतीति व्याख्यानादनन्तो
ङीबिव व्यवहितष्टाबपि निषिध्यत इत्याशयेनाह। ङीप्टापौ नेति। राः पुंवदिति। रै शब्दस्य स्त्रीलिङ्गतायामपि स्मरणादि
ति भावः। तथा च क्षीरस्वामी। रात्येनं राः स्त्री त्येके इति। स्त्रियां नौस्तरणिस्तरिरित्यमरः।। ॥इत्यजन्ताः स्त्रीलिङ्गाः॥ ॥

अतोऽम्। स्वमोरिति। अमोऽम्विधानं तु ग्बाधनार्थम्। अम्स्यादिति। एतच्च प्राचामनुरोधाद्व्याख्यातम्। संयोगान्त ।।राम
लोपोऽसल्ल इत्यभिप्रायेण वा। वस्तुतस्तु मुइत्येव पदच्छेदो लाघवात्। तत्र सामर्थ्ये कृते ज्ञानमिति सिद्धम्। द्वितीयैकव ।।५४
चने तु आदेः परस्येत्यकारस्य मकारे कृते स्य स्य मस्य संयोगान्तलोपे सिद्धमिष्टम्। यत्तु वदन्ति एवं सति सुपि चे
ति दीर्घत्वं स्यादिति तन्न। सन्निपातपरिभाषाविरोधात्। यदपि दीर्घविधौ सा न प्रवर्तत इति तदपि न। रुधादिभ्यः
श्नम् श्नान्नलोप इति सूत्रयोः सुपि चेति दीर्घत्वे सन्निपातपरिभाषाप्रवृत्तेर्भाष्यकृता ध्वनितत्वात्। कैयटेनो
पपादितत्वाच्च। यदप्याहुः। अतिजरसमिति न सिद्ध्येदिति। तदपि न। द्वितीयैकवचने हि। अतोऽमिति बाधि
त्वा परत्वात् जरसि कृते सन्निपातपरिभाषया लुकोऽप्रवृत्तौ रूपसिद्धिः स्यादेव। प्रथमैकवचने तु अतिजर

(108)

मित्येवेष्यते। सन्निपातपरिभाषया जरसादेशस्याप्रवृत्तेः। अत इति। तकार उच्चारणार्थः। भसंज्ञायामिति। सुडनपुंसकस्येति पर्यु
दासेनासर्वनामस्थानत्वादिति भावः। यस्येति ईश्चाश्च यं तस्य तदाह इवर्णावर्णयोरिति। ओङः श्यामिति। विभक्तित्वापेक्ष
या श्यामिति स्त्रीलिंगनिर्देशः। जश्शसोः। जसा साहचर्यात् शसपि सुबेव गृह्यते। तेनेह न। कुंडशो ददाति। शि इत्य
विभक्तिको निर्देशः। महासंज्ञाकरणं पूर्वाचार्यानुरोधात्। अन्यतमस्येति। एवं च सामान्यादिष्वन्यतमं तमं इत्या
दिप्रयोगाः प्रामादिका एवेति भावः। सोरमादेश इति। यत्तु प्राचोक्तम्। स्वमोरमादेशो वा जरसिति तद्भाष्यविरुद्धम्। ए
वं च अजरसं वर्तत इति हे जरसमिति चापशब्द एव। अजरसं पश्येति तु प्रयोगः साधुः। किंतु अमादेशे कृते जरसिति
प्राच उक्तिरेवासाध्वी। परत्वाज्जरसो न्याय्यत्वात्। पूर्वविप्रतिषेधे प्रमाणाभावात्। फलाभावाच्च। सान्तमहतः
संयोगस्य। सान्तेति पृथक्पदम्। लुप्तषष्ठीकं संयोगस्येत्यनेन समानाधिकरणमिति व्याचष्टे सान्तसंयोगस्येति। उप
धाया इति। उपधाग्रहणं पूर्वत्वमात्रोपलक्षणम्। पारिभाषिककार्यस्यासंभवात्। मासश्छंदसीति। मासित्यस्य तका
रः स्यात् क्लादौ प्रत्यये छंदसीति वाक्यार्थः। माङ्क्षिः शौरङ्गि दुरावरं तव इत्युदाहरणम्। ह्रस्वो नपुंसके। इह ह्रस्व
श्रुत्या अच इत्युपस्थितम्। तेन प्रातिपदिकस्य विशेषणात् तदन्तविधिरित्याह अजन्तस्येति। प्रातिपदिकस्याव इ

न॰ सु॰

तितु न व्याख्यातम्। संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वाच्च। सुवाग्ब्राह्मणकुलमित्यादावतिव्याप्तेश्च। स
न्निपातेति। अवर्णमाश्रित्य कृतो यादेशः कथं तल्लोपे निमित्तं स्यात्। एतच्च एङ्ह्रस्वात् सूत्रे इको गुणवृद्धी इति सूत्रे च भा
ष्ये ध्वनितं कैयटेन प्रतिपादितं शब्दकौस्तुभे निष्कर्षं प्रापितमिति तत एवावधार्यम्। एवं च यथा यातौ शुभंयाः शब्दस्य क्ली
बत्वे शुभंयं इति यन्माधवेनोदाहृतं तत्त्याज्यमिति भावः। स्वमोर्नपुंसकात्। अयं लुक् पूर्वविप्रतिषेधेन त्यदा
द्यत्वस्य किमः कादेशस्य च बाधकः। परत्वादित्यदाद्यत्वे सुभावेन तं कुलमिति स्यात्। ह्रस्वो नेति। अतिसखीनि ।।राम
कुलानि इत्यत्र सख्युरसंबुद्धाविति णित्त्वाद् वृद्धिः प्राप्ता वारिणीत्यत्र तु अच्च घेरित्यौत्वम्। प्रियक्रोष्टूनीत्या ।।५५
दौ तृज्वद्भावः प्राप्तः। ननु नुम्नुटोः को विशेषः। तत्राह नामीति। नुमस्तु अङ्गभक्तत्वात्तस्मिन्सति दीर्घः स्यादिति
भावः। तृतीयादिषु वेति। अर्थान्नुम्नुट्त्वयोः प्रतिषेधोऽयम्। प्रवृत्तिनिमित्तभेदादिति। पीलुशब्दस्य हि वृ
क्षत्वव्याप्यजातिः वृक्षे प्रवृत्तिनिमित्तम्। फले तु फलत्वव्याप्यजातिः। वृक्षविशेषप्रभवत्वं वा उभयथापि पुन्नपुं
सकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः। अस्थि दधि अतिदध्नेति दधि अतिक्रान्तेनेत्यर्थः। यत्तु प्रियदध्नेति उरः
प्रभृतिषु दधिमधुशालीति पाठात् नित्यः कप् प्राप्तः भाष्यकारप्रयोगाद्वा प्रियदधिशब्देन भवतीत्याहुः।

तच्चिंत्यम्। भाष्ये तादृशपाठस्य बहुषु पुस्तकेष्वनुपलंभात्। स्त्रियां तु प्रियदध्ना प्रियदध्ने इति केचित् तन्न। सन्निपातपरिभा
षया बहिरंगपरिभाषया वाऽल्लोपोऽप्रवृत्तेः। तस्मात् पुंसीव स्त्रियामपि अतिदध्नेत्यादिकमेव बोध्यम्। सुधिनी इति। परत्वान्नुमाड्
यङ् बाध्यते। सुधियेति। पुंवत्वपक्षे नुमोऽभावादियङ्। बह्व्यः श्रेयस्यो यस्य तद्बहुश्रेयसी कुलम्। अत्र नपुंसकह्रस्व
त्वं न। ईयसो बहुव्रीहेर्नेति ह्रस्वमात्रस्य प्रतिषेधादिति श्रीपतिपुरुषोत्तमविश्वरूपादयः। अन्ये तु उपसर्जनह्रस्व एव
निषिध्यते। नपुंसकह्रस्वत्वं तु स्यादेव। बहुश्रेयसि। बहुश्रेयसिनी इत्याद्याहुः। स्नुः प्रस्नुः सानुरस्त्रियामिति उभय
लिंगः सानुशब्दः। तस्य नपुंसकत्वे रूपमाह। स्नूनि सानूनीति। पुंसि शंभुवत्। प्रियक्रोष्टूनीति। यत्तु प्राचा प्रियक्रो
ष्टूणीत्युक्तं तत्पूर्वविप्रतिषेधपरभाष्यवार्तिकविरुद्धम्। यत्तु व्याचख्युः। विभाषा तृतीयादिष्वचीत्येतद्विषयकोऽवि
प्रतिषेधः भाष्ये प्रियक्रोष्टुने अरण्यायेति तथैवोदाहृतत्वादिति। तन्न। उदाहरणस्य संकोचकत्वे मानाभावात्। यदा
हुः। न चोदाहरणमादरणीयमिति। किंच। पूर्वविप्रतिषेधस्य वैकल्पिकतृज्वद्भावमात्रविषयकत्वे तत्र तृज्वद्भा
वग्रहणं व्यर्थमेव स्यात्। प्रियक्रोष्टुनेत्यादेर्विप्रतिषेधं विनापि पक्षे सुसाधत्वात्। न च प्रियक्रोष्ट्रेत्यादिनिवृत्तिस्त
स्फलम्। पुंवद्भावपक्षे तस्य दुर्वारत्वात्। स्वयमपि तथोदाहृतत्वाच्च। न च समाहारद्विगौ पंचक्रोष्टुनेत्यादौ पुंवद्भा

न. सु.

वाभावात्तत्र दृढ्वद्भावनिवृत्तिः फलमिति वाच्यम्। एवमपि भाष्योदाहरणासामंजस्यात्। उपलक्षणं तदिति चेत्। हैतै
वं प्रियक्रोष्टुनीत्येवोपलक्ष्यताम्। भाष्योदाहृतप्रातिपदिकांशानुपहायेति दिक्। सुत्वेति। उं वत्त्वपक्षे नुमभावा
द्यण्। सुत्वु नेति। ओः सुपीति यणं बाधित्वा परत्वान्नुम्। यदिगन्तमिति। एतच्च रा दाने इति धातोः अतिरि ब्राह्मणकुलमि
ति प्रक्रम्य माधवेन स्पष्टीकृतम्। अन्ये तु सुद्योशब्दो भाषितपुंस्कः स एवेदानीमिगन्तः एकदेशविकृतस्यानन्यत्वात्।
अतः पुंवद्भावो भवतीत्याहुः। तथा च रूपमालादौ पुंवद्भाव उदाहृतः। तस्मादजन्तेषु क्लीबेषु पुंवद्भावो माधवमतेना ।।
स्ति मतान्तरे त्वस्ति। अतः प्रद्यवा प्रायासु नाबेत्यादि प्राचोदाहृतमपि नातीव दुष्यति।। ।।इत्यजन्तनपुंसकलिंगाः ।।
।।लिडिति। लिह आस्वादने क्विप्। ढस्य जश्त्वेन डः। तस्य खरि चेति चर्त्वेन टः। तस्यासिद्धत्वाड्डः सीति पक्षे धुट्। चर्त्वे
तकारः। न पदान्ताट्टोरिति ष्टुत्वनिषेधः। रयो द्वितीया इति तु नेह प्रवर्तते। चर्त्वस्यासिद्धत्वात्। एतेन तेच प्रत्याहारा
एकवचनाच्छि शादिति प्राचोयं ग्रंथं व्याचक्षाणैर्यदुक्तं लिट्सु लिड्सु इति टठाभ्यां रूपद्वयमिति तत्प्रत्युक्तम्। तथा च
प्रातिशाख्येपि। ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजम्। इति श्लोके ऽपदान्तेत्यादि विशेषणं सं
गच्छते। दादेर्धातोर्घः। धातोरित्यावर्तते। तत्रैकमतिरिच्यमानमुपदेशकालं लक्षयतीत्याशयेनाह उपदेश इ

ति। आवृत्तिफलं एवाह इति। उपदेशे किमिति। अव्याप्त्यतिव्याप्तिपरिहारः फलमित्याह। अधोगित्यादिना। एकाचो बशो भष्।
झलीति निवृत्तमिति। यत्तु प्राचोक्तं प्रातिपदिकसंज्ञस्य तु झलि परतः पदान्ते वेति तत्प्रामादिकमेव। अधोक्। अधक्।
अजघाः इत्याद्यसिद्ध्यापत्तेः। प्रातिपदिकग्रहणस्याप्रकृतत्वाच्च। तत्र झलो निमित्तत्वानुपयोगाच्च। धुग्भ्यां धुक्षु इत्या
दौ पदान्तत्वादेव सिद्धेः। यदपि तत्सौत्रेण व्याख्यातं झलि तु परे प्रातिपदिकसंज्ञस्यैवेत्यादि तदपि निर्मूलं निष्फलं चेत्यु
पेक्ष्यम्। भष्भावः इति। जश्त्वचर्त्वयोरसिद्धत्वात्ताभ्यां प्रागेवेति भावः। घत्वचर्त्वे इति। चर्त्वस्यासिद्धत्वात् पूर्वं घत्वं तत
श्चर्त्वमिति भावः। वा द्रुह। द्रुहेर्दादित्वान्नित्यं प्राप्ते ऽन्येषाम् अप्राप्ते उभयत्र विभाषेयम्। ननु द्रुहादयो दिवादिषु अ
नेनैव क्रमेण पठ्यन्ते। तत्र वा द्रुहादीनामित्येवास्तु। दिवाद्यन्तर्गणस्य पुषादेरन्तर्गणो रधादिस्तदन्तर्गणो द्रुहादि
रस्तु। मैवम्। तथा हि सति यङ्लुकि न स्यात्। निर्दिष्टं यद्गणेन चेति निषेधात्। दोधुक्। दोधुट्। इग्यणः। यणः स्था
ने इति। विधिप्रदेशेषु सूत्रशाकटवत् ज्ञाविसंज्ञाश्रयणं इति भावः। वाह ऊठ्। वसोः संप्रसारणमित्यतोऽनुवृत्तं संप्रसा
रणं ऊठो विशेषणम्। तेनाल्लोऽन्त्यस्येति न। यत्तु प्राचा वाशब्दस्येत्युक्तम्। नासौ सूत्रार्थः किं तु कथंचित्फलितार्थ
कथनपरतया नेयम्। छन्दस्येवेति। छंदसि सहः। वहश्चेति सूत्रे छंदसीत्यनुवृत्तेरिति भावः। यत्तु ऊठि कृते स

म·सु·

वर्णदीर्घः ऊहः ऊह इत्यादि प्राचोक्तं तद्भाष्यविरुद्धम्। तथाहि। ऊठ्ग्रहणं मास्तु संप्रसारणमेव विधीयताम्। तस्य लघूपध
गुणे कृते वृद्धिरेचीति वृद्धौ सिद्धं विश्वौहः इत्यादि। एवं स्थिते क्रियमाणं बहिरंगपरिभाषां ज्ञापयति सत्यां हि तस्यां बहिरंग
स्य संप्रसारणस्यासिद्धत्वादन्तरङ्गो गुणो न स्यादिति भाष्ये स्थितम्। न च नकारान्ते ऽकारान्तोपसर्गे वा पपदे रूपे विशेषः
स्यादिति वेत् एमेवम्। भाष्यकारोक्तज्ञापकबलेनैव तादृशस्थले ण्विप्रत्ययाभावस्यानुमानादिति कैयटहरदत्तादयः।
एतेन वार्यूहः प्रोहः इत्यादि प्रयोगा अपि परास्ताः। अथ वा ऊहतेः क्विप् इत्यवधेयम्। वसुस्त्रंसु। वस्त्रप्रत्ययः। तेन न तदन्त ॥
ग्रहणम्। ससजुषोरुरिति स्त्रात्संस्येत्यनुवर्तते। तच्च वसोरेव विशेषणं न तु स्त्रंसुध्वंस्वोः। अव्यभिचारात्। नाथनडुहः अ ॥
संभवादित्यभिप्रेत्याह सान्तवस्वन्तस्येति। पदान्त इति। झलीति तु प्राचः प्रमादः स्वस्तमित्यादावतिव्याप्तेः। सहेः साडः।
सहेरितिकिम्। सहडेन वर्तत इति सडः। यस्य नान्त्रि ऽशब्दोऽस्ति। यथा मृड इति। सडस्यापत्यं साडिः॥ ॥हात्राः॥ ॥
दिव औत्। प्रातिपदिकस्येति। अव्युत्पन्नस्य दिवेडिविरिति न्यासो हि तत्सूत्रेण व्युत्पन्नस्य वा। न तु दिवु क्रीडादावि
ति धातोः। निरनुबंधकग्रहणे न सानुबंधकस्येति परिभाषया। तेनाक्षद्यूरित्यादौ न भवति। औत्त्व तकारउच्चारणा
र्थः। सुद्युभ्यामिति। उकारस्य संप्रसारणत्वाद्धलि इति दीर्घः प्राप्तः उदिति तपरसामर्थ्यान्न भवति। यत्तु प्राचोक्तम् इदिवो

वाऽस्मात्वमनमीतितस्तुदुपेक्ष्यम्। मुनित्रयानुक्तेः। निष्फलत्वाच्च। द्याभिति रूपं तु द्यौशब्दस्यैवेति बोध्यम्। ॥वान्ताः॥ ॥यद्वतुभ्यं
च। बहुवचननिर्देशादर्थस्य प्राधान्यं विवक्षितम्। अर्थाश्रीमः परत्वं शब्दद्वारकम्। तेन तदन्तविधौ सत्यपि परमवतुर्णामित्या
दावेवं भवति न तु बहुव्रीहौ। तदेतद्ध्वनयति गौणत्वे तु नुड् नेष्यते इत्यादिना। द्वित्व इति। अचोरहाभ्यामित्यनेन॥ ॥रान्ताः॥ ॥क
मलाल्लक्ष्मीः॥ ल्लान्ताः॥ ॥मोनो धातोः॥ पदान्त इति। प्रशान्तीति तु पद्यपि प्राचानुवर्तितं तथापि काशिकादावभावात् निष्फलत्वा
च्चोपेक्ष्यम्। किमः कः। ननु इम इत्येव सूत्र्यताम्। त्यदादीनां इमोऽस्यादिति व्याख्यास्यते किंशब्दश्च द्वेः प्राक् पठिष्यते। नानर्थ
क इति। निषेधारंभसामर्थ्याद्यातो त्वविधिर्न भविष्यति तत्किं कादेशेनेत्याशंक्याह। अकच्सहितस्यापीति। टेरत्वे कक इति स्या
त्। कुतिहारित्याद्यर्थं वा किम इत्यवश्यं वक्तव्यमिति भावः। नन्वेवं गणकार्यत्वाभावादुपसर्जनेऽपि स्यात्। मैवम्। त्यदादीनामि
त्यनुवर्त्य विवचनविपरिणामेन त्यदादेः किम इति व्याख्यानात्। अनुवृत्तिसामर्थ्याद्वेह सूत्रे द्विपर्यन्ता इति नियमस्य त्यागात्।
उत्सर्ग इति। तेन तदोः सः साविति सूत्रेऽनन्त्ययोरिति किमु हे स इति भाष्यप्रयोगः च्युत इति वन विरुध्यत इति भावः। नास्ती
त्यत्र मूलं तु प्रचुरप्रयोगादर्शनमेव। पत्वाकुः। इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम्। अदसस्तु विप्रकृ
ष्टं तदिति परोक्षे विजानीयादिति वचनादेवंविधस्यार्थस्याभिमुखीकरणान्न दुष्टत्वादिति। तथापि ततः सन्निकृष्टा
दिशब्दानामिव इदमादीनामपि संबोध्यसमर्पकत्वे बाधकाभावात्। विप्रकृष्टस्यापि बुद्ध्या सन्निधापितस्य बहु

दूरवचनस्यापि–

115

म. सु.

शः संबोधनदर्शनाच्च। तथा च भट्टिः। हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप स इति। अनाप्यकः। प्रत्याहार इति। न तु टा इ विभ-
क्ताविति विशेषणादिति भावः। अनभ्यासविकार इति। तेन ष्टुआमित्र आर्त्ति पिपर्त्त्योश्चेतीत्वे अलोन्त्यविधिरस्त्येव। बिभर्त्ति
पिपर्त्ति। ननु समायादेशानां सरलत्वादनादेशः स्यादित्याशंक्याह। नित्यत्वान्नुडः स्मै इति। कार्यं विधातुमिति। अपूर्वं बोधयि-
तुमित्यर्थः। ~~ईषदर्थे क्रियायोगे इति श्लोके तु~~ ईषदर्थे क्रियायोगे इति श्लोके तु ईषदर्थादियोगे विधीयते किं त्वनन्ते तेन
एनादेशो न। एतेन नन्त्वं भीरुरयं त्वमेव तदिमं राधेगृहं प्रापयेत्यपि व्याख्यातम्। भीरुत्वस्यानुवादत्वेन विवक्षितत्वात्।
मात्राः॥ ॥सुगाणिति। अनुनासिकस्य क्विझलोः क्ङितीति दीर्घः। न च तस्मिन्कर्त्तव्ये ऽल्लोपणिलोपयोः स्थानिवद्भावः शं- ।।राम।
क्यः। दीर्घविधौ तन्निषेधात्। क्वौ विधिं प्रति निषेधाच्चेति भावः। एतेन सुगण्णीश इति प्राचो ग्रंथं गणयतेः क्विबिति व्याख्- ॥५८॥
लाणाउपेक्ष्या इति ध्वनयति। तदीयग्रंथोपि समर्थनीय इत्याग्रहे तु इत्थं समर्थ्यताम्। सर्वलोपित्वेन क्विबिवाचरतीति
क्विप्। क्विपश्च क्वादावाचरक्विबन्तात् कर्त्तरि क्विप्। तेन विजित्यर्थः॥ णात्राः॥ ॥उपधादीर्घ इति। सर्वनामस्थाने चासंबुद्धा-
वित्यनेन नौ संबुद्धौ चेति प्राचामनुरोधेनेत्थं व्याख्यातम्। अत्र स्य संबुद्ध्यंतस्य च पदस्येति षष्ठ्यंततया व्याख्यानं
तु चितम्। एवं हि प्रत्ययलक्षणं सुलभमिति तदर्थं निषेधसामर्थ्यानुसरणक्लेशो न कर्त्तव्यः। पूर्वस्मादपि विधौ स्था-
निवत्त्वमाशंक्याह। न चेति। षाष्ठीमिति। वाहऊठिस्य च ज्ञापितत्वेन तदाश्रयत्वादिति भावः। इत्यसिद्धत्वादिति। नियम

116

सूत्राणां विधिरूपेण प्रवृत्तिः सामान्यशास्त्रता सर्वसंकोचकता वेतिपक्षस्य घञ्चोऽनुञ्जोतिसूत्रे भाष्यकृताध्वनितत्वादिति
भावः ॥ निषेधरूपेण प्रवृत्तिरितिपक्षे तु पूर्वत्रासिद्धमित्यनेनेतिबोध्यम् । सुब्विधिमुदाहरति । आत्वमित्यादिना । स्वरविधौ
तु । पंचार्मम् । द्विकसंख्यसंज्ञायामितिसमासेन लोपे कृते अवर्णान्तं पूर्वपदं जातमिति । अमे चावर्णं द्व्यच्त्र्यच् इति पूर्वपदाद्युदा
त्तत्वं प्राप्तम् । नलोपस्यासिद्धत्वान्न भवति । संज्ञाविधौ पंचेत्यत्र नलोपे कृतेपि ष्णान्ता षडित्यादिना स्त्रीप्रत्यये लुग्वक्ष्यति । कृतितुग्विधौ
वृत्रहभ्याम् । कृत्स्वस्य पितीति तुक् । कृतिकिम् । वृत्रहच्छत्रम् । छे चेति तुक्स्यादेव । प्रतिदिवेति । कनिन्युवृषितक्षिराजिध
न्विद्युप्रतिदिव इति कनिन् । हलि चेति । यत्तु प्राचा उपधायां चेत्युपन्यस्तम् । तन्न । दिवेर्वकारस्यानुपधात्वात् । इन्हन् । उप
धाया इति । उपधादीर्घस्यायं नियमस्तेन वृत्रहायत इत्यत्र अकृत्सार्वधातुकयोरिति दीर्घो भवत्येव । तथा च वृत्रहणीत्यत्र
अनुनासिकस्य क्विझलोरिति यो दीर्घः सोपि नियमेन व्यावर्त्यते । उपधादीर्घमात्रापेक्षया नियमविज्ञानादिति भावः ॥ ह
न्तेरत्पूर्वस्येति सूत्रं योगविभागेन व्याचष्टे हन्तेः । प्रसंगादस्योदाहरणमाह । प्रहण्यादिति । प्रकृतोपयुक्तमंशमाह ।
अत्पूर्वस्य । एकाज्नुत्तरेति । न चाल्लोपे कृते एकाज्त्वं नास्तीति वाच्यम् । पूर्वस्मादपि विधौ स्थानिवत्त्वात् । न च पूर्वत्रासि
द्धे न स्थानिवदिति वाच्यम् । तस्य दोषः संयोगादिलोपलत्वणत्वेष्वित्युक्तेः ॥ यत्तु अट्कुप्वाङिति सूत्रे वृत्रघ्नः स्रुघ्न
इति भाष्यमुपादाय कैयटेन व्याख्यातम् । प्रातिपदिकान्तेति णत्वप्रसंग इति । तत्संवमीसमासो मास्त्वित्याशयेन त

117

-स्तु

स्यदोष इत्यत्र णत्वग्रहणं मास्त्वित्याशयेन वा बोध्यम्। णत्वग्रहणप्रत्याख्यानं तु भाष्ये ध्वनितं शब्दकौस्तुभे च प्रपंचितम्। वस्तुत
स्तु ऊमतिचेति निर्यणत्वमिह न्याय्यम्। सर्वथापि वैकल्पिकं निर्यवाप्रातं णत्वं नियमेन निवर्त्यत इति सिद्धम्। भाष्ये तु ऊ
व्यवायेहाऽदेशेषु प्रतिषेधो वक्तव्यः। किं प्रयोजनम्। वृत्रघ्नः स्रुघ्नः प्राघानि हन्तेरत्पूर्वस्येत्यत्पूर्वग्रहणं न कर्तव्यं भवतीत्यु
क्तं। एतच्च वार्तिकाशयवर्णनमात्रं न तु वस्तुस्थितिः। वार्तिके नस्त्वत्रावयवप्रत्याख्यानापेक्षया योगविभागमाश्रित्य वार्ति
कार्थेपि संग्रहस्यैव न्याय्यत्वादिति दिक्। माधवेनोक्तमिति। इत्थं हि तदीयो ग्रंथः। भसंज्ञाया मल्लोपे ऊत्तरपदमनक्तं स्था
निवत्त्वावस्थाल्विधित्वान्नैरयेकाज्उत्तरपदत्वाभावात्। प्रातिपदिकान्तनुम्विभक्तिषु चेति विकल्पो भवति। वृत्रघ्नः वृत्रघ्ना ॥राम५
इति। तन्नाप्येति। किंचाल्विधित्वान्नेत्यसंगतम्। अल्विध्यर्थमेव अचः परस्मिन्नित्यस्यारंभात्। तस्या प्रवृत्तावुत्तरप ॥५९॥
त्वस्यैव वाच्यत्वात्। विकल्प इत्यप्यसंगतम्। ऊमतिचेति सूत्रस्य दुर्वारत्वादित्यवधेयम्। मघवा बहुलम्। अर्वणस्त्र
सावनञ इति सूत्रात् तृ इत्यनुवर्तते तदपेक्षा च मघवेति षष्ठ्यर्थे प्रथमा तदाह मघवन् शब्दस्येति। अधातोरिति। अधा
तुभूतपूर्वस्यापीत्यर्थः। अंचतिग्रहणं हि नियमार्थं धातोश्चेद्भवति अंचतेरेवेति। एवं च गोमानिवाचरति गोमानित्यादौ
संप्रति धातुत्वेपि विध्यर्थमधातुग्रहणम्। एतच्च मूल एव स्फुटी भविष्यति। ननु ऊर्वन्नित्यादाविव संयोगान्तलोप
स्यासिद्धत्वेन नान्तत्वाभावाद्दीर्घत्वं न स्यादित्याशंक्याह। इहेति। बहुलग्रहणादिति। क्वचिदन्यदेवेत्यर्थकादित्यर्थः।

निपातनादिति। महेर्हकारस्य घकारः। अुगागमः कनिप्रत्ययश्चेत्येतस्य त्रितयस्य निपातनादित्यर्थः। प्रत्याख्यातमिति। तथा चछं
दसीवनिपावित्यत्र कैयटेनोक्तम्। मघवा बहुलमित्येतन्न कर्तव्यम्। श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा भाषायाम
पि शब्दद्वयस्य सिद्धत्वादिति। यत्त्वत्र वार्त्तिककृतोक्तम्। अवर्णस्त्व मघोनश्च नशिष्यंछान्दसं हितम्। मतुब्वन्योर्विधानाच्छ
च्छन्दस्युभयदर्शनादिति। ।१। यच्च तद्व्याख्यावसरे कैयटेन भाषायामसाधुतेत्युक्तं तदनिवत्तमध्योदात्तमघवन्शब्दवि
षयकम्। छन्दस्येव वनिविधानात्। अतो न कैयटस्य पूर्वापरविरोध इति [illegible] ध्वनयन्नाह छन्दसीत्यादि। अन्तोदात्तं त्वि
ति। यद्यपि श्वन्नुक्षन्नित्यत्र कनिन्नन्तानां एतदस्युज्वलदन्तादिग्रंथमहिम्ना आद्युदात्तत्वं लभ्यते तथापि उक्षा समुद्रो अ
रुणः सुपर्णः। पूषा त्वेतो नयतु अग्निर्मूर्द्धा निर्मज्ज्ञानं न पर्वणो जभार। त्वमर्यमा भवसि यत्। इत्यादौ तक्ष्णोषान्ताना
मुदात्तत्वादीनामन्तोदात्तस्य निर्विवादतया कनिप्रत्यय एवोचित इति भावः। मघवा बहुलमिति सूत्रे मघोन इति प्रतीक
मुपादाय मघशब्दस्याकारस्य यस्येति लोपमाशंक्य नैतदस्ति अन्यदेव ह्रीदमव्युत्पन्नं प्रातिपदिकम्। तथाहि। भाषा
यामप्यस्य प्रयोगो दृश्यते इति वदन्न्यासकारोपि मघवन्शब्दस्यान्तोदात्तत्वे भाषायामपि साधुत्वे चानुकूलः। एवं स्थि
ते मतुपमाश्रित्य त्राद्देशं प्रत्याचक्षाणो भाष्यवार्त्तिककृतो मघवानित्यत्र त्रादेशपक्षेऽपि दीर्घस्वोरूतरावफलभेदे
प्रत्याख्यानासंभवात्। अतो बहुलग्रहणात्रासिद्धत्वमिति यदुक्तं तद्भाष्यादिसम्मतमेव। यत्त्वाहुः। मतुप्पक्षेपि छी

म॰ लु॰

दसत्वान्न दीर्घ इत्येव भाष्यस्याशय इति तन्न। मतुबन्तस्य छान्दसत्वे मानाभावात्। उदाहृतभट्टिकैयटविरोधाच्चेति दिक्। एतेन श्वन्नुक्ष-
न्नित्यत्र निपातितस्य मघवन्नित्यस्य त्रादेशे दीर्घाभावान्मघवन्निति क्षीरस्वामिग्रंथः प्रत्युक्तः। तथा च कातंत्रसूत्रम्। सौ मघ-
वान्मघवा चेति। विचारचिंतामणावपि। मघवानेव मघवेत्युक्तम्। काशिकायामपि दीर्घ एव दृश्यत इत्यलं बहुना। अर्वणस्तृ। य-
द्यपि ऋ धातोर्विच् गुणे च अर् इति रूपं तस्मान्मतुपि अर्वन्तावित्यादि सेत्स्यति। छन्दसीवनिपाविति वनिपि वेदे अर्वेति। लो-
के तु ऋ धातोरेव। वनिपि सेत्स्यति रूढिशब्दश्चायम्। वाजिवाहार्वगंधर्वहयसैंधवसप्तय इत्यमरकोशात्। अतोऽर्थोऽपि न भि-
द्यते। न चापि नांततांतयोः सर्वत्र प्रयोगे प्राप्ते व्यवस्थार्थमिदं सूत्रं तृज्वत्क्रोष्टुरिति त्रिसूत्रीवत्। यत्तु हरदत्तेनोक्तं अर्वन्
मघवन् शब्दयोर्द्वयोरपि भाषायामसाधुत्वमेव। अर्वणस्तृ मघोनश्चेत्यादि भाष्यादिति तदापाततः। भाष्यस्य विशेषविष-
यतायाः प्रागेवोक्तत्वात्। तथा च श्रीहर्षः। वाहैरलुप्यत सहस्रदृगर्वगर्व इति प्रायुंक्त। ननु गुणानामभेदकत्व इति पक्षे सूत्रे-
ऽनुनासिकोच्चारणं व्यर्थं स्यान्न च तन्माऽस्तु नासिकः स्यादित्याशंक्याह आ आदिति। यत्वा कुः। इहानुनासिको न। अनणुत्वेन
सवर्णग्रहणाभावात्। न च तपरस्तत्कालस्येत्यनणि विध्यर्थमिति वाच्यम्। भाव्यमानः सवर्णान्न गृह्णातीति निषेधात्।
गुणानामभेदकत्वेऽपि शुद्धैकव्यक्तेः सूत्रे निर्देशान्नातिप्रसंग इति। अथेदं वक्तव्यम्। अनणि विध्यर्थमिति शंकायां भा-
व्यमान इत्याद्युत्तरमसंगतम्। तस्याण्विषयत्वात्। यदाहुः। भाव्यमानोऽणित्यादि। अन्यथा वोः कुरित्यादावपि निषेधा

।।राम
।।६०

120

पत्तेः। तत्रोदित्करणसामर्थ्यान्ननिषेध इति चेत् किमनेन वकवंधन प्रयासेन। तपरस्तत्कालस्येति सूत्रे अप्रत्ययग्रहणस्य भाष्यो
दावनुवर्त्तितत्वाच्च। किंच। शुद्धैकव्यक्तेरित्यसंगतम्। अभेदकत्वे दोषस्य दुरुद्धरत्वात्। एकाव्यक्तिर्गृह्यत इत्युक्त्या हि व्य
क्त्यंतरं ननिर्दिष्टमित्यर्थः फलितः स च गुणानां भेदकत्वे सत्येव संगच्छते नान्यथेत्यास्तां तावत्। एतेन भाव्यमानो ऽण् सवर्णान्न
गृह्णातीति निषेधादाकारो नानुनासिक इति प्रसादग्रंथोपि प्रत्युक्तः। दीर्घस्थानएत्वेन सूत्रं शैथिल्यात्। थो न्थः। स्थाद्यादे
शो द्वावपन्थाः। थे न्थ इत्येव सिद्धे इतो ऽत्सर्वनाम स्थाने इति न्थसिद्धिर्नर्थम्। न्थादेश इति। केचित्तु अन्थादेशमाहुः। तत्राकार प्रश्ले
षो व्यर्थः। यत्तु न्यासकृता प्राचा च व्याख्यातं अनेकाल्त्वे पि थकारमात्रस्यायमादेशः निर्दिश्यमानस्यादेशा भवन्ती
ति न्यायादिति तन्न। तद्धि शिष्टस्याप्रसंगेनोक्तपरिभाषाया इह विषयाभावात् प्रसंगादाह स्त्रियामिति। सुपथीति। इ
नः स्त्रियामिति कप्पुनरुक्ततः समासान्तविधेरनित्यत्वात् युवोरनाकाविति सूत्रे सुपथीति भाष्याच्च। नपुंसकादिति निषेधस्य
तु नायं विषयः षत्वः प्राचीनेष्वेव स इति वक्ष्यमाणत्वात्। पथिमथ्योरेत्यादेश्च थो न्थश्च लिंगविशिष्टपरिभाषया प्राप्तं विभक्तौ
लिंगविशिष्टाग्रहणान्न भवति। शाविति। यत्तु प्राचा इतो त्सर्वनामस्थाने थो न्थ इति सूत्रद्वये सुटीति व्याख्यातं तदस
त्। निर्दिष्टलक्षणापत्तेः। क्लीबे औङः शी सुपथी इत्यत्रातिव्याप्तेः। सुपन्थानि पश्येति शासि रूपस्यासिद्धिप्रसंगाच्चेति
भावः। अत्रेदमवधेयम्। पन्थानमात्मन इच्छतीति पथीयति ततः क्विप्। अल्लोपयलोपौ। एकदेशविकृतस्यानन्यत्वात् पथि

म. सु.

मथीत्यात्वम्। न्थः। पन्थाः। इतोऽत्सर्वनामस्थाने इत्यत्त्वं न भवति। इत इति तपरकरणात्। एरनेकाच इति यणं बाधित्वा परत्वान्नित्यत्वाच्च
थो न्थः संयोगपूर्वकत्वान्न यण्। पन्थियौ पन्थियः। पन्थियं पन्थियौ। भस्य टेर्लोपः पथः। पथा पथीभ्यां पथीभिरित्यादि। एतेन इतोऽत्सर्व
नामस्थाने इत्यत्र स्थानिन्यादेशे च तपरकरणं मुखसुखार्थमिति हरदत्तग्रंथः प्रत्युक्तः। यत्तु न्यासकारस्तदनुसारिणोऽन्ये च स
खीः सुतीः तीरिति वत् पथीः पथ्यौ पथ्य इत्याद्युदाजहुस्तच्चिंत्यम्। सावर्ण्यस्य दुर्वारत्वात्। यत्तु पथिमथ्यृभुक्षामिति नान्त प्रकृत्यनुक
रणमेतदिति तदप्यपार्थकम्। एकदेशविकृतन्यायस्य दुर्वारत्वात्। पन्थाश्च चापि नित्यत्वाद्विशेषविहितत्वाच्च पूर्वमात्वे कृते ना ।।राम
न्तत्वे नन्थादेशाप्रसंगाच्च। यदप्याहुः। अल्लोपस्य स्थानिवत्त्वान्नात्त्वादिं क्वौ लुप्तं न स्थानिवदिति तु नेहाऽऽश्रीयत इति तदपि चिन्त्य ।। ६९
म्। तथा सति यण्प्रसंगात्। ख्यत्यादिति सूत्रे सखीः सुतीरित्यादि निर्वाहाय क्वौ लुप्तं न स्थानिवदित्यस्य कैयटादिभिराश्रितत्वात्।
इतोऽदित्यत्र तपरकरणं कुर्वतः सूत्रकृतोऽपि इहानुकूलत्वाच्च। तस्मादात्वं न्थादेशश्च न्याय्य एवेति स्थितम्। एतेन मथीः मथ्यौ
मथ्य इत्याद्यपि प्रत्युक्तम्। मन्थाः मन्थियौ मन्थिय इत्यादेरेव न्याय्यत्वाच्च। यदपि ऋभुक्षीः ऋभुक्ष्यौ ऋभुक्ष्य इत्यादि तत्र सा
वर्ण्यं दुर्वारमित्युक्तमेव। ओऽत्वादिषु यस्तु दुर्लभः संयोगपूर्वकत्वात्। तस्माद् ऋभुक्षाः ऋभुक्षियौ इत्यादि बोध्यम्। ष्णान्ताष
ट्। स्त्रीलिंगनिर्देशः संख्यां विशेषयितुं तत्सामर्थ्याच्च पूर्वत्र संज्ञापरमपि संख्याग्रहणमिह संज्ञिपरं संपद्यत इत्याशयेनाह सं
ख्येति। यत्तु प्रावाउपदेशकाले षान्ता नान्ता वेत्युक्तं तत्सर्वेत्यत्र नलोपे कृतेऽपीत्यादिस्वग्रंथविरुद्धम्। संप्रत्यनान्तत्वेषु

उपदेशेनात्वमासीदितिकिमसिद्धत्वेन। नन्वेवं पूर्वापरविरोधः काशिकायामपि तुल्य इति चेत् किं ततः। बाधेऽदृष्टेऽन्यसाम्यात् किं
दृष्टेऽन्यदपि बाध्यतामिति न्यायात्। यत्तु व्याचख्युः। उपदेशकाले यौ षकारनकारौ तदन्तेत्यर्थः। देवदत्तस्य गुरुकुलमितिव
त्समुदायेन संबंधात् नासमर्थसमास इति तदापाततः। अवयवेन संबंधं व्याख्याय समुदायेन संबंधादित्युक्तेः परस्पर व्याख्या
घातात्। किंच। यत्रोपसर्जनपदार्थः ससंबंधिकः तत्र द्वयी विधा सापेक्षोपि समस्यत इत्येका। प्रधानपदार्थस्यैव कुलादेर्गुर्वा
दिना देवदत्तादिनापि संबंधः स च गुरुणा सह उपसर्जनगर्भः। देवदत्तेन सह तु तदीयगुरुं सा द्वारा पूरूपो गुरु घटित इति द्विती
या विधा। उक्तं च हरिणा। संबंधिशब्दः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयत इति॥१॥ समु
दायेन संबंधो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह इति च॥२॥ अत्र तु उपसर्जनेन ससंबंधिके ये
न द्वयी विधाऽवकाशमासादयेत्। नन्विहाप्यन्तशब्दः ससंबंधिकार्थोऽस्तीति चेत्। न। उपदेशकाले यौ षकारनकारा
विति वदद्भिस्तदन्वयस्यत्यक्तत्वात्। अन्यथा हि उपदेशकालेऽन्तो यस्या इति वक्तव्यं स्यात्। वस्तुतस्तु तदपि न।
अन्तशब्दो हि अवयवनिसामीप्यसाकांक्षेनत्वयत्रकुत्रचित्। अन्यथा ऋद्धस्य राजपुरुष इति स्यात्। राज्ञोपीशितुरीशितव्य
स्य प्रतिसाकांक्षत्वात्। राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोः। इति कोशात्। यदि तु ऋद्धस्य प्रत्यनाकांक्षेतेति ब्रूषे
तर्हि समंपक्षेऽपि। सन्निपातेति। तथा च उपदेशकाल इति व्याख्यानं निष्फलमपीति भावः। यत्त्वाहुः परिभाषाया

कां।

प. सु.

अनित्यत्वात्स्तु कुर्यादिति तत्साहसमात्रम्। इष्टसिद्धिलेश्यं प्रवृत्तौ परिभाषाया निर्विषयत्वापत्तेः। किंच। उपदेश इति निर्मूलमपि।
यत्तु वदन्ति अन्तग्रहणसामर्थ्यादौपदेशिकत्वं लभ्यत इति तदपि न। संख्येत्यस्याकर्षणेन संज्ञिपरत्वसंपादनेन तत्सामर्थ्यो
पक्षयात्। नोपधायाः। नेति लुप्तषष्ठीकम् अंगस्य विशेषणम्। गोपा त्वेत्विति। बहुवचननिर्देशस्यार्थप्राधान्यार्थत्वादिति भा
वः। प्रियपञ्चामिति। नकारद्वयमध्ये एकारः। अष्टन आ हलादाविति। रायो हलीत्युत्तरसूत्राद्धलीत्यपकृष्यते तच्च
विभक्तेर्विशेषणमिति भावः। तेनाष्टानामित्यत्र नुटः पश्चादेव सन्निपातपरिभाषया अनित्यत्वादात्वं न तु प्राक्। अन्यथा
अष्टन् आमिति स्थिते परत्वान्नित्यत्वाच्च आत्वे कृते नान्तत्वेषट्संज्ञाभावान्नुट् न स्यात्। न च यथोद्देशपक्षे त्रैरंगत्वात्रा ।।राम।।
णवत्कृताषट्संज्ञा एकदेशविकृतन्यायेन कृतात्वेपि सुलभेति वाच्यम्। अल्विधावुक्तन्यायायोगादिति भावः। अष्टाभ्य ।।६२।।
औश्। कृताकारादिति। ननु हलीत्यपकृष्यत इत्युक्तं तत्कथं कृतात्कारादित्यत आह। अष्टाभ्य इति। कृतात्वस्येद
मनुकरणम् न तु लक्षणवशात्संपन्नमात्वम्। तथाहि सति वक्ष्यमाणज्ञापकेन तस्य वैकल्पिकतया लाघवार्थमष्ट
भ्य इत्येव ब्रूयादिति भावः। इदमिति। श्रुतमनुमितं वेत्यर्थः। अष्टनो दीर्घादिति। दीर्घान्तादष्टनः परा असर्वनामस्था
नविभक्तिरुदात्ता स्यात्। अष्टाभिः। दीर्घात्किम्। अष्टभिः। मध्योदात्तमिदम्। षट्त्रिचतुर्भ्यो हलादिरिति बाधित्वा
सत्युपोत्तममित्यस्य प्रवृत्तेः। षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यादिति तस्यार्थः। एवं

स्थिते कृख्य व्याहत्यर्थं क्रियमाणं दीर्घग्रहणं आवश्यनित्यत्वे व्यर्थं स्यादित्यर्थः। पूर्वस्मादपीति। एवं च प्रियाष्ट इति रूपं दत्तोदा
हृतं प्लुत्वं न संभवतीति भावः। न च पूर्वत्रासिद्धीये न स्थानिवदिति निषेधः। तस्य दोष इति सापवादत्वात्। ननु रषाभ्यामिति प्रतिपदो
क्तं णत्वं तत्र ग्रहीष्यामो न तु प्लुत्वविधिलभ्यमिति चेत्। मैवम्। भाष्यमतेतदयोगात्। तथाहि। रषाभ्यामिति सूत्रे पदान्तस्य पूर्व
त्र इति सूत्रमनुवर्त्य णग्रहणं पदान्तस्येति निषेधसूत्रं च भाष्ये प्रत्याख्यातम्। न चम्रं ईन्यशब्देन प्लुशब्देन वा निवर्त्यमाने
णकारे वैषम्यं सुवचम्। यथोत्तरं च मुनीनां प्रामाण्यमिति स्थानिवद्भाव एवोचितः। शब्दकौस्तुभे तु तस्य दोष इत्यत्र णत्व
ग्रहणं मास्त्विति निष्कर्षः। कृतस्तद्गीत्या प्याह कार्यकालपक्षे इति। न च यथोद्देशमाश्रित्य प्लुत्वमस्त्विति वाच्यम्। फल
भेदे प्रत्याख्यानासंभवेन कार्यकालपक्षस्यैव हन्याय्यत्वात् इति भावः। अत एव पंचमीसमास प्रत्याख्यानपक्षोपष्टं
भेनापि प्लुत्वं प्रत्याशा न कार्या। फले व्याप कार्यकालस्यैव न्याय्यत्वेनासिद्धत्वस्य दुर्वारत्वात्। निष्ठायां सेटीति से
ट्ग्रहणात् ज्ञापकात् पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यतया नेत्प्रवृत्तिरिति तु संभवेत्। तत्र क्षायदिलव्ये प्लुत्वं
प्रमितं स्यात्। लक्षणैकचक्षुष्कतायां तु अनित्यत्वपुरस्कारोऽनुचित एवेत्यास्तां तावत्। जरशसोरिति। ओरत्वं हि लु
प्तुटावि वगौणत्वेन भवति अष्टाभ्य इति बहुवचननिर्देशात्। अन्यथा हि हृतास्वानुकरणेऽपि एकवचनेनैव नि
र्दिशेत्। अत्र षष्ठा औ शिति। अष्ट इति वा। एतच्च छन्दसीति सूत्रे भाष्यकैयटयोः स्पष्टम्। तथा च औत्वविधौ [illegible] ताऽत्व

विधीयमानः

125

म॰सु॰

निर्देशबलेनानुमीयमानमात्वमपि प्राधान्येनैवोचितम्। तथा च ङसि प्रियाष्टान इत्येव स्यान्न तु प्रियाष्टा इतीत्याशंक्योक्तं भाष्ये यथालक्षणमप्रयुक्त इति। न भवत्येवात्र आत्वमित्यर्थ इति कैयटः। वामनोपि अष्टाभ्य औशिति सूत्रे तदनुयहणात्परमाष्टाविद्युक्ता प्रियाष्टान इत्यत्र आत्वस्याभावादौशत्वं न भवतीत्याह। हरदत्तस्तु तत्रैव प्रियाष्टान इत्यत्र तिवृत्तिर्ग्रंथमुपादाय यथा गुणेन गौणतया मात्वं न भवति तथा तद्विधावेव वक्ष्यत इति प्रतिज्ञाय अष्टन आ विभक्तावितिसूत्रे एकवचननिर्देशादुपसर्जनस्यात्वम्। भविषये आतोलोपः प्रियाष्टः पश्येत्यादिवदन्यूर्वप्रतिज्ञातार्थविपरीतं भाष्यवृत्त्यादिविरुद्धं च कथमभिहितवानिति स एव प्रष्टव्यः। हलादावेवेति। यद्यपि हलीत्यस्यापकर्षमहत्त्वापि व्याख्यानं भाष्ये प्रतीयते तथापि तस्यापरितोषयस्तत्वं प्रपंचितमन्यत्रेति भावः। प्रियाष्टा इति। प्रथमैकवचनम्। उक्तं संगृह्णाति प्रियाष्ट्न इति। नान्ता॥ ॥सुदिति। बुध्यतेः क्विप्। धातोः॥ ऋत्विग्दधृक्॰। किंविदिति। ऋतावुपपदे यजेः क्विन्। धृष्णोतेर्द्वित्वम् अन्तोदात्तत्वं च। स्रजेः कर्मणि क्विन्नमागमश्च। दिशेः कर्मणि। उष्णिगिति। उत्पूर्वात्स्निहेः क्विन् उपसर्गान्तलोपः षत्वं च। अंचेः सुप्युपपदे क्विन्नेवेत्यर्थः। युजेरिति। क्रुंचेरप्येवं नलोपाभावस्त्वधिकः। सन्निहिते इति। यत्तु प्रांचः। तृतीयया त्वधिकार इति तन्न। सन्निधौ धातुनाधिकृतेति। इकारस्तूच्चारणार्थ इति भावः। युजेरसमासे। सर्वेति। यत्तु प्राचोक्तं सुट इति तन्न। सर्वनामस्थाने इत्यस्य उत्तरत्रानुवृत्तेरभावेनाधिकारत्वाभावात्।

॥राम॥
॥६३॥

(126)

सर्वनामस्थाने इत्यस्यैव प्रकृतत्वात्। लक्षणायां बीजाभावात्। क्ली बेयुजी इति द्विवचने। अतिव्याप्तेश्च। यत्तु वदंति नपुंसके शसि युजीत्यत्र तु न्नस्यादिति। तन्न। नपुंसकस्य झलच इति नुमः संभवात्। सुलोप इति। ऊत्वस्यासिद्धत्वात्। परत्वादादेशो नु मू ततो हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् इत्यादि लोप इति भावः। क्विन्प्रत्ययस्य कुः। पदान्ते इति। यत्तु प्राचोक्तं झलीति तन्न। झलीत्यस्यासन्निहितत्वात्। निष्फलत्वाच्च। यत्तु तत्पौत्रेण व्याख्यातं झलो झलीत्यतो मंडूकप्लुत्या झलीत्यस्मिन्ननुवर्त्तमानेऽपि न कश्चिद्दोष इति। तन्न। स्पृष्टः दृष्ट इत्यादौ अतिव्याप्तेः। खञ्जिति। खंजतीति खञ्ज्। खजि गतिवैकल्ये। परौ व्रजेः। दीर्घश्चेति। यत्तु प्राचा व्याख्यातं विणोणित्वादुपधाया वृद्धिरिति। तन्न। पंचपाद्यां दशपाद्यां वानेन क्विब्दीर्घयोरेव विधानात्। स्कोः संयोगेति। तुप्रपष्टीकं पदस्य झलं ताभ्यां विशेष्यते इति व्याचष्टे पदान्ते इत्यादिना। भृज्जतीति भृट्। क्विप्। सस्येति। जश्त्वस्यासिद्धत्वात्। इवृं श्चुत्वमित्यर्थः। एतेन प्राचो विपरीतोक्तिः प्रत्युक्ता। ऊर्गिति। ऊर्ज बलप्राणनयोः। अस्माद्धुरादिण्यन्तात्क्विबाजभासेत्यादिना क्विप्। णिलोपः। सवयोः कुत्वेन स्थानिवत्त्वपदान्तविधित्वात्। पूर्वत्रासिद्धत्वाच्च। ईदृग् जान्तेष्ववया इति नोदाहृतं श्वेतवाः कथं मंत्रे श्वेतवहो क्थेति प्रकृत्य अवेयज इति विहितस्य ण्विनः तदपवादस्य पदान्तेऽसंबुद्ध्यां दसत्वात्। यत्तु श्वेतवाः कथम्। यदपि अवया इति प्रतीकासः पुरोडाश्‍ अवयाजो डसिति प्राचोक्तं तन्न। डसः प्रकृतिभूतयोर्वहि पुञ्जोर्दीर्घाभावात्। यदपि अवया इति प्रती

म॰ सु॰

कमुपादाय ण्विनिति प्राप्ता व्याख्यातं तत्र। अपवादस्य ऽसो विषये ऽउत्सर्गस्य ण्विनोऽप्रवृत्तेः। तदोः सः सावनन्त्ययोः। अनन्त्ययोः किम्। हे स। परत्वात्स्यदाद्यत्वं बाधित्वा सत्वं स्यात्। ततो हल्ङ्यादिलोपे रुत्वविसर्गौ स्यातां। किञ्च। त्विर्यासे तिन स्यात्। वस्कृतस्क अनन्त्यग्रहणं शक्यमकर्तुम्। न चोक्तदोषः। पुनः प्रसंगविज्ञानेन त्यदाद्यत्वसंभवात्। सकृद्गताविति पक्षेपि तदोः सः सावित्यस्यानंतरं अदस इति योगं विभज्य अदस एव दस्य सत्वं नान्यस्य दस्येति व्याख्यातुं शक्यत्वात्। ननु यथा न्यासे दीयते। किं पिस्व इति प्राप्नोति नियमे तु इदं इति स्यादिति चेत्। मैवम्। गौणे अत्वसत्वयोरसंभवेन दीरित्यस्यैव न्याय्यत्वात्। ङे प्रथमयोरम्। ङे इति द्विवचनपदं लुप्तषष्ठीकं। प्रथमाशब्दः। प्रथमा द्वितीययोः समुदाये गौण इति व्याचष्टे ङे इत्यस्य त्वादिना ङे सुटोरमिति सुवचम्। अधिकरणत्वविवक्षयेति। यदि तु शेष इति विभक्तिविशेषणं स्यात्तर्हि व्यर्थमेव तत्। आत्वयत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसंभवात्। न चैवमप्यलोप इति पक्षस्य निरालंबनत्वापत्तिः। साम आकमिति ससुट्क निर्देशेन तस्यापि ज्ञापितत्वादिति भावः। एवं च स्थानीति। शेषे लोपः। यत्तु काशिकायामुक्तं। पंचम्याश्च चतुर्थ्याश्च षष्ठी प्रथमयोरपि। यान्यद्विवचनान्यत्र शेषे लोपो विधीयत इति तद्भाषापेक्षया। छंदसि तु प्रथमाद्विवचनमपि शेषे लोपस्य विषय एवेति बोध्यम्। मपर्यन्तस्य किम्

॥ राम॥
॥ ६४॥

ति। अधिकारसूत्रं किमर्थमिति प्रश्नः। अंगकार्यं इति। एतेनांगवृत्ते पुनर्वृत्तावविधिरिति परिभाषार्थ उपनिबद्धा। अंगे अंगाधि
कारे वृत्तं वृत्तं येन यस्य तदङ्गवृत्तं शास्त्रं तस्मिन्कृते सति प्रवृत्ते सति पुनरन्यस्य प्रवृत्तौ प्राप्तायां अविधिरिति हि तस्यायम
र्थः। एषा च परिभाषा ज्यादादीयसः ज्ञाजनोर्जेति सूत्रद्वये पि ज्ञापितेति भाष्ये स्थितम्। अन्यथा हि ज्यादादिति आकार
न्न स्यात्। वहो लोपि इत्यतो लोपमेवानुवर्तयेत्। अकृत्सार्वेति दीर्घे सिद्धे ज्यायानिति। ज्ञाजनोश्च जं विदध्यात्। अतो दी
र्घो यिन्नीति दीर्घो भविष्यतीति। नचैवं ह्वाभ्यामित्यत्र त्यदाद्यत्वे कृते सुपि चेति दीर्घो न स्यादिति वाच्यम्। द्वयोरेकस्येत्या
दिनिर्देशेनोक्तपरिभाषाया अनित्यत्वज्ञापनात्। यत्तु केचित्परिनिष्ठितस्यात्र पठन्ति द्वाभ्यामिति तु दीर्घं विनान
परिनिष्ठितमिति च वदन्ति तद्भाष्यविरुद्धम्। ज्यायान् जानाति जायते इत्येषामपि दीर्घं विनाऽपरिनिष्ठितत्वेन भाष्योक्त
परिनिष्ठितमिति च वदन्ति तद्भाष्यविरुद्धम्। ज्यायान् ... इत्येवं पाठस्तर्हि विवनि
ज्ञापकद्वयस्यापि शिथिलमूलत्वापत्तेः। यदि तु भ्यसोऽभ्यमिति सूत्रे भाष्येऽपि परिनिष्ठितस्येत्येव पाठस्तर्हि वा वनि
कत्वमेवाश्रित्य पक्षान्तरपरतया योज्यः। अनित्यत्वबलफलितार्थकथनं तत्र तु ज्ञाप्यांशप्रविष्टमिति वा स्तु। एवं
तु काशिकादिग्रंथोऽपि कथंचिन्नेतुं शक्य इति दिक्। मकारान्तरमित्युपलक्षणम्। जसः शीत्यत्र जसः सइति सका
रं प्रश्लिष्य सान्तस्य जस इति व्याख्यानादंतोमिति सूत्रादम्ग्रहणमनुवर्त्यमम् अमेवेति व्याख्यानाद्धेति बोध्यम्।

।सु

अविभक्तिकमिति। तथा चङे प्रथमयोरिति पूर्वसूत्रेणाप्राप्तस्यामः प्रतिषेधोऽयमिति भाष्ये शंकितम्। न च तथैव किं न स्यादिति
वाच्यम्। स्त्रीनपुंसकयोर्नत्वाप्राप्ते युष्मान् ब्राह्मणीः कुलानि वा अलिंगत्वे युष्मान्ब्राह्मणानित्यादेरप्यसिद्धिप्रसंगाच्च। यो
वि। अविकिम्। युवाभ्याम्। यदि तु युष्मदस्मदोरनादेश इत्यत्र रायो हलीत्यतो हलीत्यनुवर्तते तदा इह अवातिमास्तु।
परिशेषादेवसिद्धेः। युष्मदस्मदोः हलादाविति यावीत्यग्ग्रहणात्परिशेषसिद्धमिदम्। रायो हलीत्यतोऽनुवृत्त्यालं
र्थ्यं वा। नन्वेवं किमनादेशग्रहणेन नह्यादेशो हलादिरस्ति। मैवम्। भ्यमः सत्वात्। अभ्यम्पक्षे तु योऽवीत्यत्रानुवृत्त्य ।।राम।।
र्थमनादेशग्रहणं बोध्यम्। पक्षद्वयेऽपि। न चात्र लोपपक्षे पररूपं बाधित्वा सवर्णदीर्घः स्यात् अकारोच्चारणसा ।।६५।।
मर्थ्यादिति वाच्यम्। एत्वनिवृत्त्याऽकारोच्चारणस्य चरितार्थत्वात्। युष्मदस्मद्भ्याङ्सोऽश्। शित्वं सर्वादेशार्थम्।
अन्यथा हि आदेः परस्येति स्यात्। न चैवैयर्थ्यम्। आदेशव्यपदेशेन यत्वनिवृत्त्यर्थत्वात्। न चावयवस्यादेशत्वे त्य
पि विभक्तेरनादेशताऽस्त्येवेति वाच्यम्। सर्वे सर्वपदादेशा इति सिद्धान्तात्। इदमेव शित्वं ज्ञापयति। सर्वे सर्वपदादेशा
इति। अर्थवत्येव स्थान्यादेशभावविश्रान्तिरित्यर्थः। सिद्धे ऽनादयस्तु वचनसामर्थ्यादनर्थकस्यापि बोध्याः। इदं त्वव
धेयम्। अंत्यलोपपक्षे अशः स्यादेशः प्राप्तः अंगवृत्तपरिभाषया वारणीयः। यदि तु अंगस्य यत्कार्यं तद्विधयिष्ये

वसापरिभाषानत्वंगाधिकारमात्रपरेतिदुराग्रहस्तर्हि अशित्यत्रातोगुणइतिपररूपेणाकारान्तरं प्रश्लिष्याकाररूपएव अत्र भवतिनविक्रियतेइतिव्याख्येयम्। यत्तु स्याऽदेशस्यापवादोऽशिति। तन्न। अशादेशप्रवृत्तिकाले शेषेलोपाभावेनस्याऽदेशस्याप्रसक्तेः। भाविनइति। कृतेहिशेषलोपेऽकारान्तत्वात्प्राप्तः सुट् ससुडक स्यस्थानित्वेननिर्दिशसामर्थ्यान्निवर्त्ततइतिभावः। शेषेलोपष्टिलोपइतिपक्षेतु सुट् ग्रहणं व्यर्थमेव। आकमिदीर्घोच्चारणंसवर्णदीर्घार्थम्। अन्यथापररूपंस्यात्। नवाकारोच्चारणसामर्थ्यम्। एत्वनिवृत्त्या अभ्यमश्चचरितार्थत्वात्। इहयुवावौद्विवचनेत्वमावेकवचनइतिसूत्रद्वयेद्विवचनेकवचनशब्दौनप्रत्ययपरौकिंत्वर्थपराविति व्याख्यातं तत्फलं दर्शयति समस्यमानेइत्यादिना। द्व्येकत्वेति। पंचकं प्रातिपदिकार्थइतिपक्षे संख्याया अपि प्रातिपदिकार्थत्वादितिभावः। त्रिकपक्षेतु द्व्येकार्थवाचिनीइतिपाठ्यम्। संख्यायाविभक्त्यर्थत्वेपिसंख्येयस्य प्रातिपदिकार्थत्वानपायात्। समासार्थोमुख्यविशेष्यम्। अन्यसंख्यश्चेद्युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तश्चेदित्यर्थः। त्वइति। अर्थपरत्वाश्रयणसामर्थ्यादेवइष्टतद्वर्गतेरपिस्वीकारात्। प्रत्ययपरत्वेतुनस्याताभितिअव्याप्तिःस्यादित्यर्थः। एवंच तदुक्तश्लोकेपिनयुवावौत्वमौवनेष्वतुत्याप्रत्ययपरत्वेगतिव्याप्तिर्ध्वनिता। एवंवाव्याप्त्यतिव्याप्तिपरिहाराय अर्थपरत्वमाश्रितमितिफलितम्। न

म· सु·

वहुत्रिमाद्कुत्रिमन्यायविरोधः। वचनग्रहणसामर्थ्यादेव तद्बाधात्। अन्यथाहि द्वित्वैकत्वे इत्येव ब्रूयात्। द्वित्वैकत्वे तया
विभक्तिः तस्यामिति व्याख्यानसंभवादिति भावः। अति त्वाकमति माकमिति। यत्तु वदन्ति। सामआकमित्यत्र यद्यपि सुड्
ग्रहणं न स्थानिविशेषणं बाधात्। तथाप्युपलक्षणं तु भवति। तेन यस्यामः सुडग्रेभावी तस्यैवामआकमा भवितव्यम्। नैवे
तद्गौणत्वे संभवतीत्याकमन्न प्रवर्तते। न च समुदायनिर्देशे विशेषणत्वमुपलक्षणत्वं वा विहाय तृतीयः प्रकारोस्ति। न च सु
डामोः पृथक् स्थानित्वमिह निर्दिश्यते च शब्दस्य द्विवचनस्य चाभावात्। यदि तु सडाम् आमू वेति समाहारद्वंद्वो व्याख्या ॥
येत योग्यताबलाच्च सडशब्देन सुडेव गृह्येत। तथापि यदि सुड्ग्रहणमन्वाचयशिष्टम्। ततः समासो न स्यात्। अन्यत्र तु ॥
साहित्यविवक्षया केवलस्याऽमोऽप्रसक्तेरिति। अत्रेदं वक्तव्यम्। यस्याऽमः सुडग्रेभावीत्यादि तावद्बाधितम्। आ
कमाऽपहृतस्य सुडन्वयाभावात्। आकमः सुड्भावी इति चेत्तर्हि त्वमेवोपलक्षयेत्। आदेशद्वारेण परंपरासंबंधेन
स्थानिनमुपलक्षयति चेत्। हन्तैवं युष्माकमित्यादौ सुट् श्रूयेत। सामइति निर्देशसामर्थ्यान्न श्रूयेत इति चेत्। न।
निर्देशस्य गौणव्यावृत्त्या चरितार्थत्वेन सामर्थ्याभावात्। यदपि समाहारद्वंद्वं प्रक्रम्य अन्वाचयशिष्टत्वे दूषणा
भिधानं तदप्यसंभवदुक्तिकम्। साहित्यविवक्षया केवलस्याप्रसक्तेरिति परमवशिष्यते तदपि न। प्रक्रियाद

शायांस्थितस्याः मध्यंतरकालभावित्वेनोत्प्रेक्षितस्य स्फुटस्यैकबुद्ध्युपारोहेणैव साहित्याभ्युपगमात्। अतीतानागतयोरयं द्र
ष्टेतिवत्। तत्रोभयोरेकस्मिन्दर्शनसंबंध इति वेदिताप्येकस्मिन्नादेश इति तुल्यम्। तथा च इरयोरे इति सूत्रे च इदं ध्रेश्यादौ।
धात्वोस्तस्य इरे विध्यातोल्लोपे रेभावे तस्य च्छसत्वे पृष्टेति षु चरितार्थतया इटिछूते इरयोरिति द्विवचननिर्देशाल्लाक्ष
णिकस्यापि रेभावः पुनः क्रियत इति स्थितमाकरे। इरयोरित्येकशेषः। साम इति द्वंद्वः। सहविवक्षात् भयं च तुल्ये व व
क्तत स्क साम आकमिति सूत्रे केवलोऽप्याम् तेनैव निर्दिष्टस्तस्यापि केमिस्थाने निवक्षावेनाः न्वासस्तु एकत्वाच्च साम
इति प्रवर्त्तते। गौणत्वे तु प्रथमप्रवृत्तस्यैव पर्यवसानम्। अत एव शेषेल्लोपः ष्टिल्लोप इति पक्षेण सह फलैक्यमपि सिध्य
ति। सर्वथापि अतित्वयामतिमयामिति कश्चिदुत्प्रेक्षितं समर्थयितुन्नाभिनिवेष्टव्यम्। अतित्वाकं मतिमाकमि
त्यादेर्भाष्यकृतैवोदाहृतत्वादितिदिक्। षष्ठ्यादिविशिष्टयोरिति। एतच्च सर्वस्य पदस्येत्यधिकाराल्लभ्यते। सूत्रग्रह
णं तु त्रिभक्तौ श्रूयमाणायामेव यथा स्यान्न तु लुप्तायामित्येतदर्थमिति वक्ष्यति। वेदे रशेषे रिति। युष्मान् रक्ष
तु गोविंद इति तु प्रावः पाठस्त्यक्तः। अस्मान्नित्यस्य समानवाक्यस्थत्वाभावादेवाप्राप्तेः। सूत्रग्रहणादिति। तिष्ठति
रत्नो वर्त्तते यथा समर्यतिष्ठ सुयी वेति समर्थं मा हासारिति गम्यते। तेन षष्ठ्यादीन विजहतोरेवादेशा इत्यर्थः।

म॰ सु॰

इति युष्मत्पुत्र इति। युवयोर्युष्माकं वा पुत्र इति विग्रहः। पदास्परत्वं संपादयितुमिति शब्दः। प्रावातुनासौ प्रयुक्तः तत्र पदास्प
रत्वाभावादेवाऽऽदेशो न भविष्यतीति किं सूत्रग्रहणेन। न च वावादिपंचकेति। पंचानां मध्येऽन्यतमेन योग इत्यर्थः। युक्ते
इति। नपुंसके भावे क्तः। परस्यार्थैः। अत एव निपातनाज्ज्ञावेशः। दर्शनं प्रत्ययः। तत्रेह ज्ञानमात्रम्। अदर्शनं लोप इत्य
त्र यथा। न तु चाक्षुषज्ञानमेव अनालोचन इति निषेधात्। तदेतदाह चाक्षुषज्ञानार्थैरिति। भक्तस्यादि। अत्र व्याचख्युः।
पनहरेस्त्वं भक्तः तेनैव कारणेनाहमपि भक्त इति योऽन्वयः। यदि तु तेनेत्यनेन भक्तत्वं त्वात्पेहेतुर्निर्दिश्येत ततः सापेक्षविधानेन त्व ॥राम॥
मेव तदिममितिवत् अन्वादेशो न स्यादिति। अत्रेदं वक्तव्यम्। सापेक्षविधानेऽन्वादेशत्वं नास्तीति तावदसंगतम्। आदेशो ॥६७॥
हि विधिः। किं विद्धि धायपश्चादितरविधिश्चान्वादेशः न तु निरपेक्षत्वगर्भः। अशाब्दार्थत्वात्। शास्त्रे तथा परिभाषितत्वाच्च।
न च प्रयोगदर्शनादेव तथा कल्प्यत इति वाच्यम्। वचनक्षिपेनोन्मथितात्वगस्य। अथैनमन्ऽस्तनयाश्रुशोवेत्यादौ सापेक्षत्वे
पि एनादेशादर्शनात्। तत्र हेतुत्वं नैशाक्षेनोपात्तमिति चेत्। न। तदेनमुल्लंघितशासनं विधेर्विधेहि कानाशनिकेतना
तिथिमित्यादिप्रयोगविरोधात्। न त्वं भीरुरयमिति तु न विधिः। किं त्वनुवादः। अतस्तदिममिति न विरुध्यते। एवं स्थिते पन
त्वं भक्त इति यच्छब्दाध्याहारक्लेशो व्यर्थः। किं तु तेनत्राप त इत्येव संबंधः। प्रक्रान्तार्थत्वाच्चनपदस्य सापेक्षेति दिक्। अत्रैते

134

घ

नेति पूर्वं विद्यमाने पदं ततो हरिरिति प्रथमान्तं ततः परस्यादेशः। तथा त्रायत इत्यस्मात्परं स इति प्रथमान्तं। न च त्रायत इति भिन्न
वाक्यस्थमिति भ्रमितव्यम्। स हरिस्त्वां मां त्रायत इति तंत्रेणानेककारकसंबंधात्। अनुषंगाभ्युपगमेपि एकतिङ्वाक्यमि
तिपरिभाषितैकवाक्यत्वानपायाच्च। सामंत्रितम्। संज्ञाविधावपि महासंज्ञाकरणसामर्थ्यात्तदंतग्रहणम्। आमंत्रणमामं
त्रितम्। उपचारात्तत्साधने वृत्तिः। विभक्त्यं तेन चामंत्र्यं तेन तु केवलया विभक्त्येत्याशयेनाह तदन्तमिति। आमंत्रितं पूर्व
मविद्यमानवत्। यत्तु प्राचोक्तं विशेष्यपूर्वं संबोधने तरष्पूर्वं च संबोधनं हित्वान्यस्मात्संबोधनात्परयोर्नैते आदेशाइ
ति केचिदिति। तत्र केचिदित्यनुचितम्। उक्तार्थस्य प्रकृतद्विसूत्रीसिद्धत्वात्। यच्च व्याचख्युः त्रिसूत्र्यां [illegible] मप्य इति तत्र
तृतीयसूत्रार्थस्य तेनासंस्पर्शात्। पादः पत्। तदवयवस्येति। निर्दिश्यमानस्यादेशा इति परिभाषयेदं लभ्यते॥ दान्ताः॥
॥ ॥ अग्निं मन्यतीति। मथ्नाते मंथिते क्विपि एतदेव रूपम्। इदितस्तु नलोपाभावात्। अग्निमन्। अग्निमन्थाव अग्नि
मन्थः। थान्ताः॥ ॥ ङकार इति। आन्तरतम्यादिति भावः। ह्रस्वव्यंजनयोरिति। व्यंजनस्यापि ह्रस्वईषत्सदृशः दीर्घ
स्तु विसदृश इति भावः। उक्तं चेति। वार्त्तिककृतेति शेषः। केचित्तु पूर्वस्येव मुत्वादमुष्य [illegible] त्युदाहरंति। तन्नाष्या
दौ नोक्तमित्युपेक्षितम्। उदर्इत्। अप्रवृत्तस्यापवादः। चान्ताः॥ ॥ आत्वसन्नस्य चायातोः। इहाधातोरिति योगो

म·पु·

विभज्यते तत्सामर्थ्यादनन्तरस्यासन्नस्यैव प्रतिषेधो नान्त्यस्येति कैयटहरदत्तादयः। तदेतद्दर्शयति धातुभिन्नासन्नस्येति। उ
भे अभ्यस्तम्। द्व इत्यनुवृत्त्यैव सिद्धे उभेग्रहणं समुदाय प्रतिपत्त्यर्थम् इति व्याचष्टे उभे समुदिते इति। अन्यथा हि नेनिजतीत्य
त्र अभ्यस्तानामादिरित्याद्युदात्तत्वं प्रत्येकं पर्यायेण स्यात्। जक्षित्यादयः षट्। जक्ष इति पृथक् पदम्। इति शब्देन जक्षिरेव परा
मृश्यते। इति आदिर्येषामित्यतद्गुणसंविज्ञानो बहुव्रीहिः। तदेतदाह षड् धातवोऽन्ये इति। तान्ताः॥ ॥गोपायतीति गुपू रक्षि
पि विवक्षिते आयादय आर्द्धधातुके वेति आयाभावः। पान्ताः॥ त्यदादिषु। अनालोचने कञ्च। तत्पश्यतीति तद्दर्शः। कर्म
ण्यण्। तादृशादयस्तु रूढिशब्दत्वादसताऽप्यवयवार्थेन व्युत्पाद्यन्ते। अतएवाज्ञानार्थत्वेऽपि दृशेरिति संगच्छते। भाष्ये तु क
र्मकर्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यन्ति जनाः स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थः। तत्त्वविषयत्वापत्तिमात्रं वृत्ति
त्वेऽपि विषयीकरणाद्वृत्तित्वादज्ञानार्थादिति संगच्छते। नशो वा। अत्र झल्यपीत्यपकृष्य नीयम्। नष्टमित्यादावतिप्रसक्तेः।
नगिति। षड् गकाः प्राग्वत्। शान्ताः॥ नुम्विसर्जनीयशर्व्यवायेऽपि। षत्वेनेति। सनः सस्य रुत्वविसर्गयोः कृतयोर्वशिरीति
विकल्पात्पक्षे सकारः। तेन नशाराव्यवाये सुपः सस्य षत्वं पूर्वस्य ष्टुत्वम्। न त्वादेशप्रत्यययोरिति षः। अपदान्तस्येति निषे
धादिति भावः। एवं स्थिते सकारग्रहणेनासिद्धे शर्ग्रहणस्य प्रयोजनं चिन्त्यम्। व्याख्यानादिति। असंभवादिति हरदत्तो

॥राम॥
॥६८॥

136

क्विस्तनादत्वेया। सुहिन्सु इत्यत्रसंभवादिति भावः॥ संयोगान्तेति। न वास्मिन्कर्तव्ये बहिरंगत्वेनातो लोपस्यासिद्धत्वं शंक्यम्।
पदसंज्ञासापेक्षत्वेन संयोगान्तलोपस्यैव बहिरंगत्वात्। कथं तर्हि काष्ठ्यं कलत्रं शाल्वं वा वेक्षाणे संयोगान्तलोपो नेति
प्राग्युक्तमिति चेत्। नात्र बहिरंगत्वात् प्रतिषेधो न वाऽसल्लोलोपादिति पक्षद्वयेऽपि लोपाभावे निष्पन्ने तदेकरूपायपूर्वं पूर्वमं
तरंगमिति यहीतं युक्तम्। अतिदेशेन लभ्यस्य पदत्वस्य तत्प्रयुक्तलोपस्य च लक्ष्यपूर्वभागे विश्रान्तेः स्पष्टत्वात्। इह तु
आद्यपक्षद्वये संयोगान्तलोपस्य स्पष्टतया तदेकरूपाय बहिर्भूतनिमित्तापेक्षं बहिरंगमित्यस्यैव न्याय्यत्वादिति
दिक्। तद्धिरक्षिन्यामित्यादि। यत्तु वदन्ति। श्रुलकं वर्कं श्रुकं वा। वक्षाणेषु कल्लोपः। श्रुल्कं श्रुल्कौ श्रुल्भ्याम्। वः वर्कौ।
वर्भ्याम्। श्रूः श्रुकौ श्रूर्भ्यामिति तत्सर्वमनेन प्रत्युक्तम्। अयं तु विशेषः तकू रकू इत्यत्र संयोगान्तलोपो निर्विवादः। त
त्र तु सोऽपि दुर्लभ इति। दिधमिति। यत्तु दहर्हढः। षढोरिति कत्वस्यासिद्धत्वात् संयोगान्तलोपे दस्य जश्त्वे दिधडिति नै
मिषीये णोक्तं तत्प्रामादिकम्। दादेर्घ इति घत्वस्य ढत्वापवादस्य जागरूकत्वात्। षान्ताः॥ ॥विद्वानिति। विदः शतुर्व
सुः अदादित्वाच्छपो लुक्। सद्विद्वानिति। भाषायां सदवसश्रुव इति क्वसुः॥ सद् उप इति। ननु तदनुबंधक ग्रहणे नातदनु
बंधकस्येति परिभाषया विदः शतुर्वसुरित्यस्यैव वसोः संप्रसारणं युक्तं न क्वसोः। सत्यम्। वसो रुकारानुबंधकरणं

म॰सु॰

क्वसोः सामान्यग्रहणार्थम्। उगित्त्वस्य स्थानिवद्भावेनापि सिद्धेः। इह गमिप्रभृतिभ्यः क्वसुर्नोदाहृतः। छान्दसत्वात्। कवयस्तु प्रयुं
जते। श्रेयांसि सर्वाण्यधिजग्मुषस्ते। तं तस्थिवांसं नगरोपकंठे इत्यादि। छान्दसा अपि क्वचिद्भाषायां भवन्तीति मासश्छन्दसीति सा
मान्यापेक्षं ज्ञापकमाश्रित्य कथंचित्समाधेयम्। पुंसोऽसुङ्। विवक्षितः इति तेन परमपुमानित्यत्र परत्वादसुङि कृते समासान्तो
दात्तत्वं भवद असुङ् एवाकारस्य भवति। परमसप्तम्यां तु नैतत्सिध्येत्। सर्वनामस्थानोत्पत्तेः प्रागेव पुंशब्दोकारस्योदात्तत्वे कृ
ते स्वरं सनयर्मणो हलः स्थाने तद्धर्मणोऽनुदात्तस्यैवादेशस्य प्रसंगात्। न वोकारस्य कृतोऽपि स्वरोऽनन्यत्वान्निवर्तेवि ॥राम॥
घ्यते असुङः श्वांत्यत्वात् करिष्यत इति वाच्यम्। अन्तरंगे स्वरे कर्तव्ये बहिरंगस्यासुङोऽसिद्धत्वादिति भावः। एतच्चैकेपद ॥६९॥
हरदत्तादीनामनुरोधेनोक्तम्। वस्तुतस्तु परसप्तमीपक्षोऽपि स्वरूपपादः। अकृतव्यूहपरिभाषायाः अंतरंगपरिभा
षाऽपवादत्वादित्यवधेयम्। नन्वेवमसमासेऽप्यसुङि कृते प्रातिपदिकस्वरेण सतिशिष्टेन प्रत्ययस्वरस्य बाधादसुङ
उदात्तत्वं स्यात्। इष्यते तु उकारस्य पुमान् पुमांसं परिपाहीत्यादौ तथैव पाठादिति चेत्। सत्यम्। उम्सुनोनिष्करण
सामर्थ्यात्प्रातिपदिकस्वरो न भवतीति हरदत्तः। नन्वेतदयुक्तम्। प्रकृतिप्रत्ययविभागश्चान्येष्वपि षट्त्वस्य प्रवृत्ते
रितिचेत्। सत्यम्। क्वचित्स्वरखंडेष्वपि प्रवृत्तावित्यर्दलिंगं यद्यप्यसिद्धं बहिरंगमितीदं सिद्धं तथापि बहिरंगपरिभाषाया

(138)

प्रत्ययस्योकारे कृते प्रकृतेः टाप् प्राप्नोति । तदभावेन औकारासंभवात् ६ ववनसि द्धम् २

अनित्यत्वमपि ज्ञापयितुं नित्करणमिति निष्कर्षः । उच्चारणार्थ इति । यत्तु प्राचोक्तम् उः भविताविति । यच्च तत्सौत्रेण व्याख्यातं उकार उगित्कार्यार्थ इति तदसंगतमिति भावः । हे पुमन्निति । असंबुद्धाविल्युक्ते नेर्दीर्घः । पुंस्विति । संयोगान्तलोपे मोऽनुस्वारः । नुम् स्थानिकस्यैवानुस्वारस्योपलक्षणान्नुम्विसर्जनीयेति नषत्वम् । अस्य संबुद्धाविति । एतच्च वाँवनि क्रमश् । यत्तु हरदत्तादय आहुः । सोऽर्ज इति वाच्ये ऽनङ् साविति वचनेन नङ् विदनङ् एवश्रवणास्य ज्ञापितत्वादेतत्सिद्धमिति तत्तु प्रागेव दूषितम् । अंग वृत्त परिभाषया वा समाधेयम् । अदस औ सुलोपश्च । ननु सोरेवौकारो विधीयतां त्यदाद्यत्वेन असाविति सिद्धं किं सुलोपविधानेन । मैवम् । असकौ स्त्रीत्यत्र टापि प्रत्ययस्थादिति इत्त्वप्रसंगात् । असुक इति । औत्वाभावे त्यदाद्यत्वे साद्धुत्वम् । अमुक इति त्वसाधुः । सत्वेन मुत्वस्य बाधात् । एवं अमुका अमुकः शर्मा इत्यादयोऽप्यसाधव एव । असुका असुकः शर्मेत्यादेरेव न्याय्यत्वात् । एतरि द्बहुवचने । पारिभाषिकस्य बहुवचनस्य ग्रहणे ऽमी भिरित्यादि सिद्धावपि जसि अमी इति न सिध्येत् । नह्यत्र एकारस्य बहुवचनपरतास्ति । अतो व्याचष्टे बह्वर्थे तावितीति । न मु ने । न इति विषय सप्तमी त्याह नाभावे कर्तव्य इति । अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः । नन्वेवमपि कृते नाभावे सुपि चेति दीर्घः स्यात् दीर्घं प्रति मुत्वस्यासिद्धत्वात् अत आह कृते चेति । सन्निपातपरिभाषया वा समाधेयम् । अत्रेदमवधेयम् । अमुनेति वत् अमुनेति वक्तव्ये न मुन इत्युक्तिर्नेति योगविभागार्था । तेन रामः रामेभ्य इत्यादि सिध्यति ।

ऋशाद्ध्रस्यैव श्रवणं भवतीति ४

म॰ सु॰

अन्यथा हि रोरसिद्धतया उकारस्य इत्संज्ञालोपौ कथं स्याताम्। न चानुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ त्रत्यसिद्धत्वं
नेति वाच्यम्। तरू मूलमित्यादौ हशि चेत्यस्य व्यावृत्तये तोरोरित्यत्रानुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात्। न चा
तो रोरित्यत्र मास्त्वनुनासिकता। प्रतिपदोक्तग्रहणेनैव निर्वाहादिति वाच्यम्। एवमपि देवरूहात्यत्र रुधातोर्दुचरित्वात्।
राम इत्यादावप्यनुनासिकस्य रोः श्रवणस्यापाद्यमानतया चरितार्थत्वस्य सुवचत्वाच्च। एवं च स्थानिवत्सूत्रस्यापि प्रवृ
त्तोपदत्वाद्विसर्गोऽपि लभ्यते। प्रत्ययः परश्चेत्यादिनिर्देशाय त्वविधावश्यग्रहणं चेह लिंगमिति दिक्॥ ॥इति हलन्ताः ॥राम।
पुल्लिंगाः॥ ॥नहो धः। द इत्येव नोक्तं तथा हि सति नद्धमित्यत्र रदाभ्यामिति नत्वं स्यात्। झषस्तथोरिति च न स्यात्। अ ॥७०॥
त्रेदमवधेयम्। सुष्ठु अनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वानित्यादि पुंवदेव रूपम्। यत्तु गौरादिङीषं कृत्वा स्वन
ड्वाहीत्युदाजह्रुः तच्चिन्त्यम्। अनुपसर्जनाधिकारविरोधात्। गीरिति। गॄ निगरणे शब्दे वा क्विप्। ॠत इदितीत्वं र्वो
रुपधाया दीर्घः। पूरिति। पॄ पालनपूरणयोः। उदोष्ठ्यपूर्वस्येत्युत्वम्। आशिषाविति। आङः शासः क्वावुपसंख्यानमित्युप
धाया इत्वं शासिवसीति षत्वम्॥ ॥इति हलन्ताः स्त्रीलिंगाः॥ ॥अन्वादेश इति॥ अयं च अन्ये चेति व्याख्यातारः। तस्य
लुका लुप्तत्वेऽपि वचनसामर्थ्यात्प्रत्ययलक्षणमित्याहुः। वस्तुतस्तु सूत्रे एवेन इत्कर्तव्यः। एनं एनौ इत्यादि तु त्यदाद्यत्वे
न सिद्धम्। क्लीबे ऽमि लुका लुप्तेऽपि तकारोच्चारणसामर्थ्यादेनदादेशः। न चैवं एतद्ब्रितत्यत्रापि तदापत्तिः। एकप

दाश्रयत्वेनान्तरंगेत्वमोऽस्तु किं चरितार्थत्वेन बहिरंगे सामासिके लुक्कितदप्रवृत्तेः। रोः सुपि। अह भीतीति। प्रावातु अहन्नित्युपन्य
स्तम्। तदिहानुचितम्। अहोभ्यामित्याद्यर्थतया कथंचिद्योज्यम्। अस्तु रुत्वहृत्वस्त्वेति। एतच्च क्षीरस्वामिग्रंथे स्पष्टम्। बहूर्जी
ति। अंत्यादित्यादि त्ववाचनिकम्। तथा च वार्त्तिकम्। बहूर्जि प्रतिषेधः। अंत्यात्पूर्वं नुम् एके इति। भाष्ये तु अवः परो यासल्वत
दत्र स्यनुम् इत्यर्थमाश्रित्य प्रथमवार्त्तिकं प्रत्याख्यातं। एवं उर्दमाने गर्ह गर्ह्यामित्यादीनामपि क्विबन्तानां नुमान भाष्यमे
व। यथोत्तरं मुनीनां प्रामाण्यमिति दिक्। अल्लोपस्येति। क्वौ लुप्तं न स्थानिवदिति तु न ह्याश्रीयते तस्य क्वाचित्कत्वात्। क्वौ विधिं
प्रति न स्थानिवदित्यस्यैव सार्वत्रिकत्वादिति स्पष्टमाकरे। अष्टाविंशतानीति। सप्तविंशत्यधिका पंचशतीत्यर्थः। त
थाहि। सो नवानां अंत्यस्य द्वित्वे द्वादश। औङि च तुर्णां मध्ये पूजार्थानां त्रयाणां द्वित्वे सप्त। अनुनासिकस्तु नास्ति। प्र
गृह्यत्वात्। जसि द्वित्वस्यानुनासिकस्य च विकल्पात् द्वादश। संकलनया सप्तत्रिंशत्। एवं द्वितीयायामपि। टायां च
तुर्दश। भ्यामि अष्टचत्वारिंशत्। भात् प्राग्वर्णयमानां द्वित्वात्। भिसि चतुर्विंशतिः। ङयि सप्त। अनुनासिकस्तु नास्ति। ए
कारस्यानण्त्वात्। भ्यसि भ्याम्वत्। ङसो ङसादि पंचके च प्रत्येकं चतुर्दश। सुपि गत्यर्थे त्रयाणां ककारषकारयोर्द्वित्वे
न उकारस्यानुनासिके न च चतुर्विंशतिः। एवं कृकृपक्षे षण्णां ङ षयोर्द्वित्वेऽनुनासिके च अष्टचत्वारिंशत्। ङमभावे
त्रयाणां ङकारद्वित्वे अनुनासिके च द्वादश। सु १८। औ ७। जस् १२। अम् १८। औ ७। शस् १२। टा १४। भ्याम् ४८। भिस् २४

म. सु.

ङे ३। भ्याम् ४८। भ्यस् ४८। ङसि १४। भ्याम् ४८। भ्यस् ४८। ङस् ओस् आम् ङि ओस् प्रत्येकम् १४। सुप् ८४। अत्रेदमवधेयम्। ऊ
र्जायां जसि नुमागमे कृते तस्य पाक्षिके द्वित्वे चकारद्वयसहितं रूपषट्कम्। एवं शस्यपीति। संकलनया द्वादश। तथा च रूपं
यद्यपि भूतावस्थामिति भाष्यव्यतिरिक्तमत इति दिक्। यत्तु वदन्ति। ऊह्यमेवं द्वित्वपुनर्द्वित्वलोपविकल्पनैः। अष्टपंचा
शतोत्तरं छ्यात्रिंसत्त्यधिकं शतमिति तच्चिन्त्यम्। पुनर्द्वित्वस्याप्रामाणिकत्वात्। रूपानंत्यप्रसंगजनकत्वाच्च। अष्टपं
चाशतो वृद्धौ उपपत्त्यभावाच्चेति दिक्। तिरश्चीति। भत्वादच इत्यल्लोपः। अलोप इति वचनान्नियादेशाभावः। स्वप् इ ।।रा
ति। शोभना आपोऽस्मिन्सरसीति बहुव्रीहिः। ऋक्पूरिति समासान्ते प्राप्ते न पूजनादिति निषेधः। यत्तु अनित्यत्वादि ।।७१
ति प्राचोक्तं तत्प्रामादिकम्। घ्यन्तं रूपसर्गेभ्य इति तु न भवति तत्राप इति कृतसमासान्तस्यानुकरणमिति वक्ष्यमाण
त्वात्। सुपुमांसीति। पुंसोऽसुङिति सूत्रे सुटीति व्याख्यानस्य प्राचां मते शसि नैतत्सिध्येत्। ओङि वेति व्याप्तिः। अ
स्माकं तु सर्वनामस्थाने इति पक्षे सूत्रं कुर्वतां सर्वेष्टसिद्धिरिति भावः।। ।।इति हलन्ता नपुंसकलिंगाः।। ।।
स्वरादिनिपातमव्ययम्। स्वरादयश्च निपाताश्चेति समाहारद्वंद्वः। स्वरिति स्वर्गे परलोके च। अन्तरिति मध्ये। प्रा
तर् प्रत्यूषे। पुनर् अप्रथमे विशेषे च। सनुतर् अन्तर्धाने। स्वराद्याः पंचरेफान्ताः। उच्चैस् महति। नीचैस् अल्पे। शनैस्
क्रियामान्द्ये। ऋधक् सत्ये। वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये। ऋते वर्जने। युगपदित्येककाले। आराद्दूरस

मीपयोः। पृथक् भिन्ने। ह्यस् अतीतेऽह्नि। श्वोऽनागतेऽह्नि। दिवा दिवसे। रात्राविति निशि। सायमिति निशामुखे। चिरमिति बहु
काले। मनाक् ईषदर्थे। ईषदित्यल्पे। जोषं सुखे मौने च। तूष्णीमिति मौने। बहिस् अवस् इमौ बाह्ये। समयेति समीपे मध्ये च।
निकषेत्यन्तिके। स्वयमित्यात्मनेत्यर्थे। वृथेति व्यर्थे। नक्तमिति रात्रौ। नञ् निषेधे। हेताविति निमित्ते। इद्धेति प्राकाश्ये। अ
द्धेति स्फुटावधारणयोः। तत्त्वातिशययोरित्येके। सामीप्यर्द्धजुगुप्सितयोः। वत् तेन तुल्यमित्यादिभिर्विहितो वतिप्रत्य
यः। यस्तूपसर्गाद्धात्वर्थ इति विहितः स नेह गृह्यते। यदुद्धृतो निवतोयाप्तिः। सना सनत् सनात् एते नित्ये। उपधेति भेदे।
तिरस् अन्तर्द्धौ तिर्यगर्थे परिभवे च। अन्तरेति मध्ये विनार्थे च। अन्तरेणेति वर्जने। ज्योगिति कालभूयस्त्वे प्रश्ने शीघ्रा
र्थे सं प्रत्यर्थे च। कमिति वारि मूर्द्धनिन्दासुखेषु। शं सुखे। सहसेत्याकस्मिकाविमर्शयोः। विनेति वर्जने। नानेत्यनेक
विनार्थयोः। स्वस्तीति मंगले। स्वधा पितृदाने। अलं भूषणपर्याप्तिशक्तिवारणनिषेधेषु। वषट् वौषट् श्रौषट् एते ह
विर्दाने। अन्वादित्यन्वार्थे। अस्तीति सत्तायां। उपांश्वित्यप्रकाशोच्चारणरहस्ययोः। क्षमेति क्षान्तौ। विहायसेति वि
यदर्थे। दोषेति रात्रौ। मृषामिथ्ये इत्येतौ वितथे। मुधेति व्यर्थे। पुरेत्यविरते चिरातीते भविष्यदासन्ने च। मिथोमिथस् ए
तौ रहः सहार्थयोः। प्रायस् इति बाहुल्ये। मुहुस् इति पुनरर्थे। प्रवाहुकमिति समकाल ऊर्द्ध्वार्थे च। प्रवाहिकेति
पाठान्तरं। आर्यहलमिति बलात्कारे। शाकटायनस्तु आर्यवेति प्रतिबंधे। हलमिति प्रतिषेधविवादयोरित्याह।

म. मु.

आभीक्ष्णमिति पौनःपुन्ये। साकं सार्द्धम् एतौ सहार्थे। नमस् नतौ। हिरुक् वर्जने। धिक् निंदाभर्त्सनयोः। अम् शीघ्रे ऽल्पे च। आ
म् अंगीकारे। किमेतिङव्ययेति कास् प्रत्ययादिभिश्च विहितः प्रत्ययोऽपीह गृह्यत इत्येके। पपाचतराम्। कारयामास।
प्रताम् ग्लानौ। प्रशान् समानार्थे। प्रतान् विस्तारे। मामाङ् एतौ निषेधाशंकयोः। आकृतिगण इति। तेनान्येऽपि ज्ञेयाः। तथा
हि। कामं स्वाछंद्ये। प्रकाममित्यतिशये। भूय इति पुनरर्थे। सांप्रतमिति न्याय्ये। परमिति किंत्वर्थे। साक्षात् प्रत्यक्षे। साचीति
तिर्यगर्थे। सत्यमित्यर्द्धांगीकारे। मंक्षु आशु एतौ शीघ्रे। संवत् वर्षे। अवश्यं निश्चये। सपदि शीघ्रे। बलवदित्यतिशये। ॥ राम
प्रादुस् आविस् इति प्रकाशे। अनिशम्। नित्यम्। नित्यदा। सदा। अजस्रम्। सन्ततम्। एते सातत्ये। उषेति रात्रौ। रोद ॥ ७२
सी द्यावापृथिव्यर्थे। ओम् इत्यंगीकारे ब्रह्मणि च। भूरिति पृथिव्याम्। भुव इत्यन्तरिक्षे। झटिति स्रागिति तरसा इति शी
घ्रे। सुष्ठु प्रशंसायाम्। दुष्ठु निकृष्टे। सु पूजायाम्। अद् आश्चर्ये। कु इति कुत्सितेषदर्थयोः। अंजसेति तत्वशीघ्रा
र्थयोः। मिथुरिति द्वावित्यर्थे। भाजक् शीघ्रे। चिराय चिररात्राय चिरस्य चिरं चिरेण चिरादित्येते चिरार्थकाः। अस्तमिति
विनाशे। आनुषक् आनुपूर्व्ये। अनुषक् अनुमाने। अम्नस् शीघ्रसांप्रतिकयोः। स्थाने इति युक्ते। वरमितीषदुत्क
र्षे। सुदि शुक्लपक्षे। वदि कृष्णपक्षे। इत्यादि। चेति समुच्चयादिषु। वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये। हेति प्र
सिद्धौ। अहेति पूजायाम्। एवेत्यवधारणे। नवक्लृप्तौ च। एवमित्युक्तपरामर्शे। नूनमिति निश्चये तर्के च। शश्वदिति

१४५

पौनःपुन्ये नित्ये सहार्थे च। युगपदिति एककाले। भूयस्तु पुनरर्थे आधिक्ये च। कूपदिति प्रश्ने प्रशंसायां च। कुविदिति भूर्यर्थे
प्रशंसायां च। नेदिति शंकायां प्रतिषेधविचारसमुच्चयेषु च। चेदिति यद्यर्थे। चण् अयं चेदित्यर्थे णित्। समुच्चयादौ त्वननुबंधः।
कच्चिदिति इष्टप्रश्ने। यच्चेत्यनवक्लृप्त्यमर्षगर्हाश्चर्येषु। नावकल्पयामि न मर्षये गर्हे आश्चर्यं वा यच्च भवान् वृषलं याजये
त्। नहेति प्रत्यारंभे। हन्तेति हर्षे विषादे अनुकंपायां वाक्यारंभे च। माकिः माकीम् नकिरिति त्रयोपि वर्जने। माङ् न ओ स्वरादि
सूक्तौ। इह पाठस्तु निपातत्वार्थः। तेनाघ्नदान्तत्वं सिध्यतीति प्राञ्चः। तच्चिन्त्यम्। फिट्स्वरेणापीष्टसिद्धेः। यद्यप्यङः। सत्वव
चनानामपि अव्ययसंज्ञार्थं स्वरादिपाठ इति। तदपि चिन्त्यम्। लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः। तस्मादुभ
यत्र पाठे फलं चिन्त्यम्। यावत्तावदिति साकल्यावधिमानावधारणेषु। साकल्ये। यावत्कार्यं तावद्भुक्तम्। अवधौ। याव
द्गंतव्यं तावत्तिष्ठ। माने। यावद्दत्तं तावद्भुक्तम्। अवधारणे। यावदमत्रं ब्राह्मणानामंत्रयस्व। त्वे विशेषवितर्कयोः। द्वौवि
तर्के। न्वे इति पाठान्तरम्। रे दाने अनादरे च। रे करोति ददातीत्यर्थः। त्वं रे किं करिष्यसि। श्रौषट् वौषट् एते तौ हविर्दा
ने। स्वाहा देवताभ्यो दाने। स्वधेति पितृभ्यः। श्रौषडादीनामनेकाचामुभयत्र पाठः स्वरभेदार्थः। तुमिति तुंकारे। गुरुं तुं
कृत्य हुंकृत्य। तथाहीति निदर्शने। खल्विति निषेधवाक्यालंकारे निश्चये च। किलेति वार्तायामलीके च। अथे
ति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादिरपि। तेन मंगलवाचकस्य सत्वार्थ

145

म॰ सु॰

चेपि अव्ययत्वं सिध्यति। तथा च श्रीहर्षः। उदस्य कुंभीरथ शातकुंभजाश्चतुष्कचारुत्विषि वेदिकोदरे। यथा कुला चारमयावनी दर्जापुरंध्रिवर्गः स्नपयांबभूवतामिति। अत्र हि अथ स्नपयांबभूवेत्यस्य मंगलं स्नपनं च कारेत्यर्थः। निपातस्य स्वरूपेणैव मंगलं मृदंगध्वनिवत्। सुष्टु स्वरे भेदार्थः पाठः। स्मेत्यतीते पादपूरणे च। आदहेत्युपक्रमहिंसाकुत्सनेषु। अवदत्तमिति। इह अनुपसर्गत्वात् अवडुपसर्गात्तइति न भवति। अहमिति सुबन्तप्रतिरूपकम्। एतेन गेयेके नविनीतौ वामिति व्याख्यातम्। युवामित्यर्थे हि वामित्यव्ययम्। अस्तीति तिङन्तप्रतिरूपकम्। एवमस्मीत्यहमर्थे। ॥राम॥
त्वामस्मि वच्मि आहेत्युवा चेत्यर्थे। आसेति बभूवेत्यर्थे इत्यादि। अइति संबोधने अधिक्षेपे निषेधे च। आइति वाक्य ॥७२॥
स्मरणयोः। इः संबोधनजुगुप्साविस्मयेषु। ईउ ऊ एऐ ओ औ संबोधने। पश्य सम्यगर्थे। पश्य मन्यमानाः श्रुकं शैघ्र्ये। यथा कथा चेत्यनादरे। पाट्प्याट् अंग हे हे भोः अयेएते संबोधने। घेति हिंसाप्रातिलोम्यपादपूरणेषु। विषुनानार्थे। एकपदे इत्यकस्मादित्यर्थे। पुत्र ऊत्सायां। आतइति इतो ऽपीत्यर्थे। आकृतिगण इति। तद्यथा। यत्तदिति हेतौ। आहोस्वित् विकल्पे। सीम् सर्वतो भावे। कं पादपूरणे। सुकमतिशये। अनुकं वितर्के। शंबत् अन्तःकरणे आभिमुख्ये च। चपादपूरणे ऽवार्थे च। दिष्ट्येत्यानंदे। वट् वाड् प्रियवाक्ये। कुमिति भर्त्सने। इवेति सादृश्ये। अद्यत्वे इतीदानीमित्यर्थे इत्यादि। अत्रेदमवधेयम्। स्वरादिचादयो राकृतिगणत्वाद्विशेषविषयाणि निपातस्वरपस्तेचादिषु।

196

अन्येस्वरादिषु। स्वरव्ययभाजस्तत्र तत्र बोध्याः। यथा उतशब्दः स्वरादिषु। ईष्योनू तनैरुते स्यन्तोदात्तप्रयोगात्। यत्तु उतशब्दस्य
स्वरादितामुक्त्वा निपातस्वरमाशंक्यान्तोदात्तत्वं निपातनमाश्रित्य समादधुस्तदसत्। स्वरादेरनिपातत्वात्। अन्तोदा
त्तनिपातनवैयर्थ्यात्। यदपि काशिकायामुक्तम्। स्वरादिषु शनैस् ऋधक् दिवा हथा नक्तमित्यादयोऽन्तोदात्ता इति। पठ्यस
नात् तिरस्त एवमादय आद्युदात्ता इति तत्सर्वं प्रामादिकम्। लक्ष्यविसंवादान्निर्मूलत्वाच्चेति शब्दकौस्तुभे प्रपञ्चितम्। त
द्धितश्चासर्वविभक्तिः। सर्वेति। वचनत्रयात्मिकेत्यर्थः। नेति। किं त्वेकवचनमेवोत्पद्यत इति भावः। तद्धितः किम्। एकः द्वौ।
त्रयः। असर्वेत्यादि किम्। औपगवः। कृन्मेजन्तः। जीवसे इति। तुमर्थे सेसेनिति असेप्रत्ययः। पिबध्यै इति। तेनैव शध्यै
प्रत्ययः। पाघ्रेति पिबादेशः। यत्वाङः। कर्त्तरि शबिति। तद्भसात्। अव्ययकृतो भाव इति सिद्धान्तात्। अन्तग्रहणमौ
पदेशिकत्वप्रतिपत्त्यर्थं तेनेह न। आधयेचिकीर्षवे। लक्षणप्रतिपदोक्तसन्निपातपरिभाषाभ्यां सिद्धे तयोरनित्य
त्वज्ञापनायेदम्। क्त्वातोसुन्कसुनः। उदेतोरिति। उदस्रूवदिणो भावलक्षणेस्थेण्कृञ्वदिचरिहुतनिजनिभ्यस्तोसु
न्। विस्रप इति। सृपितृदोः कसुन्। आम्ग्रहणमिति। तथा च वार्त्तिकम्। अव्ययादाप्सुपो लुग्वचनानर्थक्यं लिंगाभा
वादिति। सूत्रस्योक्तिसंभवस्तु स्त्रियामिति सूत्रे स्त्रीसमानाधिकरणादिति पक्षं गृहीत्वा बोध्यः। सवनस्थितः। कृत

सु

मियं ब्राह्मणीत्यादावतिव्याप्तेः। अलिंगत्वे आथर्वणप्रणवविद्यागतश्रुतिविरोधमाशंक्याह सदृशमिति। लिंगकारकेति। वि
भक्तिवचनशब्दौ कारकसंख्यापराविति भावः। यथावावेति। परिगणनमिदमित्येके। अन्येतुउदाहरणमाहुः। वगाहइति।
आदिरेव अकारोलुप्यते नान्त्यः। अपिनासाह वर्यति॥ ॥इत्यव्ययानि॥ ॥खट्वेति। अष्ट पुषिलटिकणिखटिविशि
भ्यः क्वन्। पंचाजीति। नवा च तदन्तविधिविरहादेवटाबन्नेतिवाच्यम्। अमहत्पूर्वग्रहणेनानुपसर्जनाधिकारेण च स्त्री
प्रत्ययेषु तदन्तविधिज्ञापनात्। मूषिकेति। वृश्चिकमूषाः किकन्नित्यधिकारेमुषेर्दीर्घश्चेति किकन् इकारमध्यो मूषि ॥राम॥
कशब्दः। यस्तु मूषस्तेयेइतिदीर्घोपधात्संज्ञायांकुन् निमूषकशब्दो माधवेनोक्तस्ततोऽप्ययं टाप्। प्रत्ययस्थादितीत्व ॥१४॥
मितितुविशेषः। पत्तु कुन्नंतोऽसौ अजादिगणेपाठं नप्रयुंक्ते। तस्य जातिलक्षणङीषो बाधनार्थत्वात्। संज्ञायाश्च अ
जादित्वादित्याहुः। तच्चिंत्यम्। व्याघ्रीत्यादिवत्संज्ञात्वेऽपि जातित्वानपायात्। अस्त्र फलेति। अस्त्रैव फलानियस्याइति
विग्रहः। घ्वापोरिति। एतच्च फलनिष्पन्नाविति धातौ माधवग्रंथे स्थितम्। भाष्ये तु प्रायेण दीर्घ एव पठ्यते। प्रत्यकुष्ठेति। पा
ककर्णेत्यादिसूत्रस्थभाष्यवार्त्तिकपर्यालोचनयेदमुक्तम्। तेन सत्याकांडेतिप्राचः पाठो नादर्तव्यः। शूद्रा वेति। शू
द्रशब्दष्टापमुत्पादयति जातिश्चेत्। महत्पूर्वस्तु न। जातिश्चेदिनीत्यपि संबध्यते। पुंयोगे त्विति। पुंयोगश्चेदां प्रत्ययस्तु

पुंयोगलक्षणजातिलक्षणयोर्जातिलक्षणस्यैव बाधो भविष्यति टापाकृत्वा २

पट एवेति न नियमः किंतु जन्यजनकभावोऽपि । तेन वैश्याश्शूद्रयोस्तु राजन्यान्माहिष्यौ सुतौ स्मृताविति सिद्धम् । महाशूद्री
ति । आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः । अत्रेदमवधेयम् । अजादिगणे शूद्रेत्येव पाठ्यम् । जातेरिति व्यर्थम् ।
मुख्ये कार्यसंप्रत्ययाज्जातिलक्षणो ङीषेव बाधिष्यते । पुंयोगे हि गौणी वृत्तिः । अमहत्पूर्वेत्यपि व्यर्थं । महाशूद्रशब्दो हि वि
शिष्ट एव जात्यन्तरे वर्तते । तत्रावयवस्यानर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वाभावात्टापः प्रसंग एव नास्ति । यातु मह
ती शूद्रा तत्र महाशूद्रेतीष्यत एव । कुञ्चेत्यादि । त्रयोऽमी हलन्ता इत्येके । क्रुञ्चा नालभेत । उष्णिहककुभौ इत्यादिप्र
योगमुदाहृत्य अदन्ता अपि भाष्ये स्वीकृताः । पुंयोगेऽपीति । यदाऽज्येष्ठादयः प्रथमजाता दीव्यंतीति तदा अदन्तत्वादेव
टाप् सिद्धः । यदा तु ज्येष्ठस्य स्त्रीत्यादि विवक्षा तदा पुंयोगलक्षणो ङीष् प्राप्तः सोऽनेन बाध्यत इति सूचयितुमपि शब्दः ।
मूलान्नञः । नञः किम् । शतमूली । अमूलेति । ओषधिजातिरियं । उगितश्च । भवतीति । सर्वादिषु भवतुरित्युदित्त्वा
तः । भातेर्डवतुरिति व्युत्पादितश्च । शतृन्तात्तु ङीपि शप्श्यनोर्नित्यमिति नित्यो नुम् । वनो र च । सुत्वानमिति । सुयजोर्ङ्वनिप् । अ
तिधीवरीति । ध्यधातोः क्वनिप् । शर्वरीति । शॄधातोर्वनिप् । गुणे कृते हसन्तात्परत्वेऽपि हशन्तादिहितत्वाभावात् ङ्वनिप्यो
र्निषेधो न । अवावेति । न्यासकारस्तु प्रायिकोऽयं निषेधः तेन अवावरी स्यादाह । न त्वेतद्भाष्यादौ दृष्टम् । पक्षे ङाबिति । त

म. सु.

यावद्विवचने बहुधीवर्यौ बहुधीवानौ बहुधीवे इति रूपत्रयं भवतीति भावः। टाबुवि। पूर्वेणाप्राप्तस्य ङीपोऽपवादः। असिद्ध
त्वादिति। कार्यकालपक्षेणेदम्। यदि तु यथोद्देशं पदसंज्ञां यदि वा उपदेशकाले ह्लान्नेति व्याख्यानं तदा असिद्धत्वोपवर्ण
नं नोपयुज्यत इत्याकूतः। वस्तुतस्तु यथोद्देशपक्षेपि असिद्धत्वमुपयुक्तमेव। एकदेशविकृतस्योपसंख्यानं हि स्थानिव
त्सूत्रे पठ्यते। आदेशग्रहणसामर्थ्यात्सर्वे सर्वपदादेशा इत्याश्रित्य आनुमानिको याऽदेशः स्थानिवदिति वा व्या
ख्यायते। उभयथापि अल्विधौ न तत्प्रवृत्तिः। एतच्चाकरे स्पष्टम्। बहुयज्वानाविति। नसंयोगादिति निषेधान्नाय ॥ राम ॥
मुपधालोपः। तेन अनउपधालोपिन इति न प्रवर्तते। डाबुभाभ्याम्। ननु निषेधडापोः वचनसामर्थ्यात्पर्यायः सिद्धः ॥ ७५ ॥
। सत्यम्। अन्यतरस्यामिति योगो विभज्यते। तत्र मनः इति निवृत्तं। अनो बहुव्रीहेर्ङीब्वा स्यात्। ङीपा सह विकल्प
लाभार्थमिदम्। अनउपधालोपिन इति सूत्रं तु नियमार्थं। अनो यः सो विकल्पः स उपधालोपिनो नेति। तथा च सु ए
पर्वेत्यादावनुपधालोपिनि निषेधार्थमिदम्। बहुराजीत्यादौ तु ऋन्नेभ्य इत्येव ङीप्। तेन बहुधीवरी सिध्यति।
ऋन्नेभ्य इति हि ङीपमनूद्य तत्सन्नियोगेन विधीयमानो रेफः प्रकरणान्तरस्थेन ङीपि कृते न स्यात्। ननु व
नो रवेति सूत्रमेव ङीब्बाधित्वामिति चेत्। न। उभयविधौ गौरवात्। किं च। एवमपि ङीपि निषिद्धे रोऽपि दुर्लभः सन्नि

योगशिष्टत्वात्। भाष्ये तु सूत्रभंगेन समाहितम्। तद्यथा। अनो बहुव्रीहेः। इत्यस्यानन्तरं उपधालोपिनो वेति सूत्रमस्तु। अन
उपधे त्वादि प्रदेशान्तरस्थे सूत्रे ङाप् सूत्रे ऽन्यतरस्यां ग्रहणं समास्त्विति। अनउपधा॰। बहुव्रीहे रूधसो ङीषित्यतो
बहुव्रीहिग्रहणं संख्याव्ययादेर्ङीबित्यतो ङीबनुवर्तते। इत्याशयेनाह। अन्नन्तादित्यादि। नियमार्थमिदमित्युक्त
म्। नैवं वं पूर्वेणो वविकल्पसिद्धेः इहान्यतरस्यां ग्रहणं व्यर्थमिति वाच्यम्। असति हि तस्मिन्नित्यार्थो विधिरेवा
यं स्यान्न तु नियमः। प्रत्ययस्थात्कात्पूर्वस्य। कादित्यकार उच्चारणार्थः। व्यंजनमात्रं विवक्षितम्। विशिष्टविव
क्षायां तु एति कास्थ्वरत्नीयादौ अकविनस्यादित्याशयेनाह ककारादिति। वर्णनिर्देशे हि कार प्रत्ययो विहितः। क्वचित्समुदा
यात्प्रयोगस्तु उच्चैस्तरां वा वषट्कार इत्यादि निर्देशरूपयत्नसाध्य इति भावः। आपि परइति। एतद्याकारस्य विशेषणम्। तत्र
सामर्थ्यात्ककाराकाराभ्यां व्यवायेपि भवति। न तु रथकट्या इत्यादौ त्रिवतुरादि व्यवाये। अत एव सर्विकादौ आद्याकारस्य न भ
वति। तदेतदुक्तं अकारस्येकारः स्यादापि पर इति। ककार विशेषणे तु विवक्षिते आप्परात्ककारात्पूर्वस्यात इत्यवक्ष्य त्वे
त्। यत्तु प्राचः। आपीति ककार विशेषणं। सर्विकेत्यादौ तु एकादेशस्य स्थानिवद्भावादकारेणाव्यवधानेपि वचनसा
मर्थ्याद्भविष्यतीति। तन्न। रथकट्यादावपि प्रसंगात् व्यवहितस्यापि परत्वानपायात्। न च निर्दिष्टपरिभाषया निस्ता

म॰ स्त॰

रः। अनुवादे परिभाषाणामनुपस्थितेर् उच्यमानस्य विशेषणेष्विति हितदर्थः। अत्र उदीचामात इति सूत्रे स्थाने ग्रहणं लिंगम्। फ
लं तु वृद्धसंज्ञायां इकः परिभाषानुपस्थानात् शालीयादिसिद्धिः। यदप्याहुः। आपीति विधीयमानस्येतो विशेषणमिति। त
स्थवीयः। आपीत्यस्यांग विशेषणत्वे तु अनाशं कमेव। रथकद्यापुत्रकामेत्यत्राति प्रसंगात्। शकेति। पचायच्। स्थग्रहणं
विस्पष्टार्थम्। ककारमात्रस्य प्रत्ययस्याभावादेव तात्स्थ्यलाभात्। पूर्वस्य किम्। सर्विकेत्यादौ टाबेकादेशं बाधित्वा कासर
स्यमाभूत्। तस्मादित्युत्तरस्येति परिभाषणा न। यत्तु वर्णादांगमिति परिभाषया एकादेशो बाध्यते त्याहुः। तन्न। अपवा ॥ राम
दे परत्वस्यैव उक्तपरिभाषाया अपि निष्फलत्वात्। वक्तृतरक प्रत्ययस्थे। किं इति सप्तमी निर्देश एवाचितः। पूर्वग्रहणं च ॥ ७६
सुत्यजम्। अत इति तपरः किम्। कदाधाराचिकलिभ्यः कः। धाका। राका। मामिकेति। केवलमामिकेत्यादिना संज्ञा
छंदसोरेवेति नियमान्ङीप्। त्यकृत्यपोरिति। उदीचामात इति विकल्पस्यापवादः। दाक्षिणात्यिकेति। दक्षिणस्या
म इरे दक्षिणा। आजन्तः। दक्षिणाभवेति विग्रहः। यत्तु दक्षिणस्यां दिशि भवेति प्राचा विग्रहीतं तन्न। त्यब्विधौ अव्यय
साहचर्यादाजन्तस्यैव दक्षिणाशब्दस्यै ग्रहणात्। अन्यथा सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावापत्तेश्च। यत्तु समा
स एव पुंवदिति। तन्नेति वक्ष्यते। त्यकिकिति वेत्यादि द्वे टाप्। ततो ज्ञाताद्यर्थे कः। केणः इति ह्रस्वः। टाप्। इहापि

152

केति। अव्ययात्यप्, नयासयोः। अत्र त्यासकारः। याइत्येतस्योदीचामातःस्थाने इति विकल्पे प्राप्ते निषेधोऽयमिति। तन्न। आतःस्था
नेइत्यंशस्येहाभावात्। यासेति यत्तदोरुपलक्षणमित्याशयेनाह यत्तदोरिति। स्वरूपस्याविवक्षायां फलमुदाहरति। यका
तकामिति। यासयोरित्यपत्यय यत्तदोरित्येव वक्तुमुचितम्। उपत्यकेति। उपाधिभ्यां त्यकन्नासन्नारूढयोः। क्षिपकादीनां चाने
त्यनुषज्यते। क्षिपकेति। क्षिपेरिगुपधलक्षणः कः। ततोऽज्ञातादौ कः। वटभेदने। पचाद्यच्। ततः कः। तारकेति। तरतेर्ण्वुल्। ज्योति
र्नक्षत्रे नेत्रकनीनिकायां च। वर्णका प्रावारविशेषः। तंतूनां विकारस्तांतवं। औरञ्। अन्यत्र वर्णिकेति। ग्रंथविशेषस्य व्याख्या
त्री त्रकची वावर्तयतीति वर्तिका। शकुनौ इत्येवं। अन्यत्र नित्यमेव। पितरश्च ता देवताश्च पितृदेवताः। तदर्थं कर्मपितृदेवत्यम्।
देवतान्तात्तादर्थ्ये इति यत्। अष्टन्त्रि ब्राह्मणा यस्यां सा अष्टका। इष्यशिभ्यां तकन्। अष्टिकान्येति। अष्टौ परिमाणमस्याः
संख्यायाअतिशदन्तायाः कन्। अर्थगतं स्त्रीत्वम्। आकारोऽप्यारोप्यक पूर्वया इति स्त्रीलिंगनिर्देशस्तेन स्त्रीप्रत्ययो
लभ्यत इत्याह स्त्रीप्रत्ययाऽकारस्येति। सांकाश्यिकेति। संकाशेन निर्वृत्तं नगरं सांकाश्यम्। वुञ्छण्णादिसूत्रेण सं
काशादिभ्यो ण्यः। ततो भवार्थे धन्वयोपधाद्वुञ्। अकादेशः। स च सांकाश्यभवां स्त्रियमाहेति तदकारस्यापि इत्वं विक
ल्पेत। तस्मादात इत्युक्तम्। ननु यथाऽयमकारो नाऽकारस्थानिकः। एवं स्त्रीप्रत्ययस्थानिको नेति ध्यंग विकल्पमेत

ग्ग

म॰सु॰

तः। अत्राऽऽः। सति घात इत्येतस्मिन् स्त्रीलिंगनिर्देशबलात् स्त्रीवाचकः आकारः स्त्रीप्रत्यय एवेति लभ्यते। असति तु तस्मि
न् स्त्रीवाचकस्य यो अकार इत्येतावल्लभ्येत ततः सांकाश्यिकेत्यत्रापि प्रसज्येतेति। अत्रेदं वक्तव्यम्। यकपूर्वायाः स्थाने
इति स्थानेशाद्धेऽजागरूके कथमवयवषष्ठीत्वं गम्यताम्। न खलु अः स्थाने अयमिति वाच्यम्। अकेति समुदायस्य तथात्वेपि
अकाररूपावयवस्य अतथात्वात्। वुञो यकपूर्वत्वाभावाच्च। नहि तस्यामवस्थायां यस्येति लोपो लभ्यते। किञ्च। प्रतिप
दोक्तस्य स्त्रीप्रत्ययस्य लाभे भवार्थे विहितस्य वुञादेः प्रसंग एव नास्ति। तस्मादात इति स्पष्टार्थमेव। अश्विकेति। कौमा ॥राम॥
रास्तु भस्त्रादिवाक्येऽश्वशब्दमपि पठन्तोऽस्यापि इत्वविकल्पमिच्छन्ति। शुभंयातीति शुभंयाः। विच्। ततः कः। केऽणः। ॥७७॥
शुभमिति मान्तो निपातः। सुष्ठु नयो यस्याः सुनया। ततः कः। भस्त्रैषा०। तदंतेति। आंगत्वादिति भावः। एवं चेति। उक्तं वह
रदत्तेन। अत्राऽतः स्थान इत्येतत् स्वशब्दस्य विशेषणम्। संभवव्यभिचारौ हि तत्र स्तः काकयोः सतोः॥१॥ द्वेषयोः संभवो
नास्ति नान्यत्र व्यभिचारिता। सर्वनाम्नः स्वशब्दस्य तेन नायं विधिर्भवेदिति॥२॥ इह स्वशब्दस्येत्यस्यानन्तरमत इ
ति शेषो बोध्यः। एतच्चेह मूलेपि ध्वनितम्। एवं च। हंसनन्नो सन्निहितं चरन्तं मुने मनोघ्नीं निरिवस्त्रिकायाम्। इति
श्रीहर्षश्लोके भस्त्रैषेति वैकल्पिकमित्त्वमिति व्याचक्षाणा उपेक्ष्या इति भावः। आत्मीयायामिति। आत्मज्ञातिध

नेपुंस्त्रीत्वमेव नास्तीति भावः। यत्तु ज्ञातिधनयोः स्वकास्विकेति रूपद्वयमाकरे स्थितमित्याहुः। तच्चिंत्यम्। तादृशस्याकार
स्याप्रसिद्धेः। लिंगानुशासनविरोधाच्च। यत्तु स्वकास्विकेति काशिकायामुदाहृतं तत्संज्ञाविषयकं न तु ज्ञातिधनविष
यकम्। यदपि स्वार्थिकाः क्वचित्प्रकृतितो लिंगवचनान्यतिवर्तंत इति परिजह्रुः। तदपि चिंत्यम्। उक्तरीत्या कप्रत्ययात्प्रागा
प्प्रसंभवेपि प्रकृतेः स्त्रीलिंगतया आतः स्थाने इत्यंशस्य दुरुपपादत्वात्। प्रत्युदाहरणान्युक्त्वा उदाहरणान्याह। निर्भ
स्त्रिकेत्यादि। निष्क्रांता भस्त्राया निर्भस्त्रा। उपसर्जनह्रस्वः। टाप्। ततो ज्ञातादौ कः। कृतषत्वेति। सूत्रे विकृतनिर्देशो
विवक्षितविषयो न तु न्यासयोरिति बहुपलक्षणमिति भावः। स्त्रीलिंगनिर्देशादजाद्यः स्त्रीलिंगा एव गृह्यंते।
तेनेह न। शुभ्रोऽजोऽस्याः शुभ्राजिका। जानातीति ज्ञः। प्रियो ज्ञो यस्याः प्रियज्ञिकेति। अभाषित॰। विहितविशेष
णतया व्याख्यायाः फलमाह बहुव्रीहेरिति। नित्यमिति। अस्याविकल्पस्याप्रवृत्तेः प्रत्ययस्थादित्युत्सर्गस्य प्रव
र्तत इत्यर्थः। परविशेषणत्वे त्वयं विकल्पः स्यादिति भावः। बहुव्रीहेरित्युपसर्जनोपलक्षणम्। तेनातिखट्विका
निःखट्विकेत्यादावपि नित्यमेव। शेषिकेकपीति। आपोऽन्यतरस्यामिति ह्रस्वपक्षे इति भावः। अभिव्याप्येति। अत

म. पु.

एवं बहुयुवा शालेत्यत्र यूनस्तिरुपसर्जनत्वान्नेति प्रांचः आङः ॥ टिड्ढ ॥ इह वृत्तिकृता स्त्रेरखुन् प्रक्षिप्तः । औत्सीति उ
त्सेभवा । उत्सादिभ्योऽञ् । न च शार्ङ्गरवाद्यञ इति ङीनासिद्धमिदमिति वाच्यम् । तत्र जातेरित्यनुवृत्तेः । अन्यथा पुंयोगे
पि स्यात् । एतेन इह अञ्ग्रहणं स्पष्टार्थमिति प्राचो ग्रंथः प्रत्युक्तः । इहानेकं वाक्यं तत्र अनुपसर्जनं अण्योः कारः तद
न्तादिति व्याख्यानान्नेह । आपिशलमधीते आपिशला ब्राह्मणीति । अत्र हि प्रोक्तार्थे ण्डुपसर्जनम् । अध्येत्रणुतु
लुप्तः । वर्णग्रायान्यान्नप्रत्ययलक्षणम् । अतष्टाबेव भवति । ताच्छीलिकेति । अयं भावः । शीलम् छत्रादिभ्यो णः इति ॥ राम ॥
योणः तस्मिन् अण् कार्यं भवति । कार्म्मस्ताच्छील्ये इति ज्ञापकात् । अनेन हि अन्निति अणि विहितं प्रकृतिभावं बा ॥ ७८ ॥
धितुं टिलोपो निपात्यते । चौरीति । चुरा शीलमस्याः । हलस्तद्धितस्य । उपधाभूतस्येति । ननु यस्येति वेति यत्रो अ
कारलोपे कृते यकारस्य ईकारपरत्वमस्त्येव । किंतु पधाग्रहणानुवृत्त्या । न चाल्लोपस्य स्थानिवद्भावः । यलोपे त
न्निषेधात् । मैवम् । यलोपे कार्ये ल्लोपस्याऽभीयत्वेनासिद्धत्वात् । अनपत्येति । यद्यपि आपत्यग्रहणं कर्तव्यमिति वा
र्त्तिकं तथापि अपत्याधिकारविहितपरं तत् । तादृशश्च गार्ग्यादियञेव न तु देवाद्यञ् । तस्यापत्याधिकारात्प्रागे

(156)

वपाठात्। अत एवाष्टकृताकस्त्रकरणो अपत्यश्चेति गर्गादिभ्यो यञिति च प्रकारः प्रक्लृप्तः। यस्कादिभ्यो गोत्रे अपत्र
त्रोश्चेतिसूत्रेष्वेवश। प्राग्दीव्यतः तद्धिताः। तद्धितग्रहणं प्रातिपदिकसंज्ञार्थं। ननु तां विनाऽपि चित्करणसामर्थ्याद्विवङीश्
भविष्यति। एवं तर्हि तद्धितग्रहणमित्यन्त्रादपि क्वचित्ष्फ इति ज्ञापयति। यत्रं ते सवर्णदीर्घेणापि रूपसिद्धोयस्येति लो
ना पस्यावश्यकत्वात्। तेन आसुरेरुपसंख्यानमिति वक्ष्यमाणं सिध्यति। आयनेः। फकारादिषु ककार उच्चारणार्थः। आ
यनीनोर्नकारस्य नेत्वम्। फिनो निःकरणसामर्थ्यात्। कौरव्यः। कथं तर्हि यद्यसौ रूपमाण्डूकि तवै तावतिकः स्मय
इति भट्टिः। अत्राकुः। कौरव्यसाहचर्यात् अपत्यप्रत्ययान्तस्यैव माण्डूकस्येह ग्रहणम्। इह तु मण्डूकस्येयं भावे इति
तस्येदमित्यण्। कुमारीति। प्रथमवयोवाचीए वशाक्षः नत्वरूढत्वप्रयुक्तः। वृद्धकुमारीति तु गौणः प्रयोगः। व्य
नीकेति। त्रयाणां मनीकानां समाहारः। अत्र अजादेराकृतिगणत्वात् टाबिति व्यनीकाधिकरणे मीमांसकाः।
पंचाश्वेति। नन्वत्र द्विगोरिति ङीप्स्यात्। अदन्तत्वात् स्यादेवेति चेत्। न। ढकोयोऽकारः इति व्याख्यानात्। द्वि
विस्तेति। सुवर्णविस्तो हेम्नोऽक्षे इत्यमरः। आचितो दशभाराः स्युः। द्विकंबल्येति। द्वाभ्यां कंबल्याभ्यां क्रीता। कं

म. सु.

बल्य सूर्णापलशतस्य । कंबलाच्च संज्ञायामिति यत् । क्रीतार्थस्य ठञो लुक् । आढकीति । द्वावाढकौ पचतीति । आढकाचि
तपात्रात्खोऽन्यतरस्यां द्विगोष्ठंश्चेति खठञ्भ्यां मुक्ते प्राग्वतीयष्ठञ् । तस्य लुक् । एतेन आचिता व्याख्याता । कांडं
तात् ० । षोडशहस्तप्रमाणो दंडः कांडम् । यद्यपि विशेषणेन तदन्तविधिः सिद्धः तथापि अंत ग्रहणे असति क्षेत्र इत्येत
त्स्यान्तत्वात् कांडस्यैव विशेषणं स्यात् न तदन्तस्य । ततश्चेहापि स्यात् । द्वाभ्यां कांडाभ्यां काण्डप्रमिताभ्यां क्षेत्राभ्यां
क्रीता द्विकांडा वडवेति । इह तु न स्यात् । द्विकांडा क्षेत्रभक्तिरिति । अतोऽन्तग्रहणम् । मात्र इति । यत्तु प्राचोक्तं ।।राम।।
द्वयसचो लुगिति । तन्न । प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ ममेति सिद्धान्तात् । द्विकाण्डी रज्जुरिति । नन्विह त्र ।।७९।।
परिमाणान्तादिति पूर्वेण निषेधः स्यात् कांडशब्दस्य आयामपरतया अपरिमाणार्थत्वात् । परितः सर्वतः आ
रोहतः परिणाहतश्च येन मीयते तद्धि परिमाणं आढककुडवादि । ननु यथाकथंचित् परिच्छेदकमात्रम् । यदाहुः ।
ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः । आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वत इति । अत एव द्विहस्ता
भित्तिरित्यत्र ङीप् न । अत्राहुः । नियमार्थमिदम् । क्षेत्र एव निषेधो यथा स्यादिति । अतो द्विकांडी रज्जुरित्यत्र

ङी बेवसूत्रस्य फलमिति। पुरुषात्प्रमाणे॰। यद्यपि पुरुषशब्दो जातिवचनस्तथापि द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणे वर्त्तत ए
व। प्रमाणशब्दसामानाधिकरण्यात्। हरदत्तो तु तत्त्वभावादेव। तथा च शुल्वसूत्रम्। पंचारत्निः पुरुष इति। द्विपुरुषीति। अत्र न्या
सकारः। प्रमाणे लो द्विगोर्नित्यमिति द्वयसचो लुगित्याह। तन्न। पुरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे लः इति श्लोकवा
र्त्तिकस्य तत्राप्रवृत्तेः। यो हि शमादिवत्प्रमाणत्वेन प्रसिद्धस्तत्रैव तत्प्रवर्त्तते न तु पुरुषशब्देपि। अन्यथा पुरुषद्वयसमित्यत्रापि
लुक् स्यात्। स्पष्टं चेदं पुरुषहस्तिभ्यामण् चेति पदमंजर्याम्। नचैवं द्वयसज्दघ्नञ्मात्रचामपि नास्मात्स्यात्। नामिति वाच्यम्। ऊर्द्ध्वमाने
मतो मम इति वचनात्। एवं पुरुषात्प्रमाणे इत्यस्यापि सामर्थ्यादिव प्रवृत्तिः। यत्तु तत्रैव सूत्रे द्विगोर्नित्यं लुगिति वृत्तिग्रंथ
मुपादाय हरदत्तेनोक्तम्। तस्मात्प्राप्त एवात्र लुग्विधीयत इति तदपि चिंत्यम्। मुनित्रयानुक्तस्य विधानोक्तेर्व्याहतत्वात्।
यदपि प्राचीनप्रक्रियां व्याचक्षाणैरुक्तं पुरुषहस्तिभ्यामित्यत्र पठ्यमाने नवार्त्तिकान्तरेण लुगिति। तदपि भ्रमोक्ति
मात्रम्। उदाहृतसूत्रस्य भाष्यवार्त्तिककाराभ्यामस्पृष्टत्वादित्यास्तां तावत्। वस्तुतस्तु पुरुषात्प्रमाण इति सूत्रे द्वि
गोस्तद्धितलुकीत्यनुवर्त्तते। तत्सामर्थ्याल्लुगप्याक्षिप्यते। हरदत्तोक्तिरपि कथंचिदेवंपरतयैव नेयेति सहृदयैरा
कलनीयम्। प्रमाणे किम्। द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा गौः। तद्धितलुकीत्येव। समाहारे पंचपुरुषी। ऊधसो नङ्।

म. सु.

नादेशेनैव सिद्धे ऽनङ्गीकरणं धनुषश्चेत्येतदर्थम्। दाम॰। बहुव्रीहिविशेषणत्वादेव सिद्धे ऽन्तग्रहणं स्पष्टार्थम्। संख्यादेरिति।
स्वरितत्वबलादेकदेश एवानुवर्तते इति भावः। केवलमामक॰। इत्यादीति। अध्यस्यामामकीतरः। मित्रावरुणयोर्भागधे
यी। अनिषद्यास्तन्वः संतु पापीः। उतापरीभ्यो मघवा विजिग्ये। समानीव आकूतिः। आर्यकृती सुमंगलीरियं शिवा रुद्रस्य भे
षजी। प्रत्युदाहरणं त्विति। यत्तु प्राचा ऽन्तर्वत्नीपतिवत्नीति प्रत्युदाहृतं तदयुक्तमिति भावः। व्यस्ते कथमिति। यत्तु प्राचा समस्ते
ष्युपचार इति वर्णितं तन्नुयैवेति भावः। प्लुतकतौरैच्। एकार आदेशो न तु प्रत्ययः। उत्तरसूत्रे उदात्त इत्युक्तेः। नत्विति। अ
न्यथा वृषाकपिशब्दो लघावन्ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्त उदात्तत्वं प्रयोजयति। अग्न्यादिषु त्रिषु स्थानेष्वन्त
रतम इत्येव सिद्धमिति प्राचां ग्रंथो विरुद्ध इति भावः। उदात्तैकार इति। मनुशब्दो ह्याद्युदात्तः। शृस्वृस्निहीत्यादौ
मनेरुप्रत्ययविधायके सूत्रे धान्ये निदित्यधिकारात्। समासनिर्देशेन तद्दर्शयति। उदात्त इत्यनुवर्तमानं संबं
धानुवृत्तैरैकारेणैव संबध्यते। नत्वौकारेणापीति। ततश्च यदुक्तं प्राचा ऐकारौकारावुदात्तौ स्त इति तदुपेक्ष्यम्। वृ
त्तिपदमञ्जर्यादिविरोधादिति भावः। मनावीति। मध्योदात्तम्। इतरत्तूपमाद्युदात्तम्। एतान्कर्बुरा। वर्णानामिति।
एतः। शोणः। शितिः। पृश्निः। पृषत्। इत्युदाहरणानि। त्र्यण्येति। अत्र उत्तरपदस्योपसर्जनत्वेपि समस्तस्यानुपस

॥राम॥
॥८०॥

160

ऽर्न्नित्यमिति भावः। संज्ञात्वाणत्वं छान्दसत्वाद्वा। कमेके इति। अत्र छंदसीति भाष्योक्तेः लोके गतो गणस्तूर्णमसिक्किका
नामित्यादि प्रयोगाः प्रामादिका इति प्रांचः। वस्तुतस्तु छंदस्येके इत्यन्वयाज्ञापायामपीति भाष्याभिप्रेतम्। अन्यथैकग्र
रूपं न रूप्यति। नहि छंदसि पलिक्नी रिदयुवतय इत्यादि प्रयोगेषु कश्चिद्विप्रतिपद्यते। विशुद्धिवावीति। दे शोधन
इति स्मरणात्। अवदातः सितो गौर इति कोशे तु विशुद्धत्वसामर्थ्यात्प्रयोग उपनिबद्ध इति भावः। लघाविति। अत्र
एकस्मिन् लघौ द्वयोश्च लघ्वोः परतो बहुषो बहुकस्य गुरूरूदात्तः स्यात्। अप इति अचः प्रावीसंज्ञा। हलेति।
हलषेश्चेति न प्रत्यये कपश्चेति सौत्रात् धातोरौणादिके इल्लचि वहुलकपिल्लावत्तोदात्तौ। विज्ञौरादिभ्यश्च। श्वनूश
ब्दाः त्रपश्यते। तेन रुन्त्रेभ्योऽडि क्वित्यत्रयत्वा वा शुनीत्युदाहृतं तच्चामादिकम्। यत्तु व्याचक्षते। श्वानमावष्टेश्चेवा
चरतीति वाक्ये णिचः क्विपो वा क्वौ उपसर्जनत्वान्ङीषभावेन शुनीत्यादिवन्ङीबिति। तत्र णिविसंप्रसारणटिलोप
योः उक्तरूपं सुखमते दुर्लभम्। अन्यत्रत्वासक्तां कथंचित्। आवपनं चेति। आ उप्यते निक्षिप्यते धान्यं यस्मिन्। गोणा
न्योति। यस्या याद्दछिकं नाम। अकृत्रिमेति। यथा सेधा स्थली यत्र विचिन्वता त्यामिति। स्थलाऽन्येति। कृत्रिमा तु
रूपेण संस्कृता। यथा स्थलयोदकं परिगृह्णन्ति। श्रा णापका। अयो विकार इति। फाल इति प्रसिद्धः। कुशा

म.सु.

न्येति। छन्दोगास्तो त्रियागणनाथानोदुंबरानूर्णाक्रूरऊशा इति व्यवहरन्ति। अतः ऊरूत्तरपदादौपम्ये इति सूत्रे हानौ लपायनेति
व्यास सूत्रे ऊशा वानस्या स्त्री सहना मायातेति श्रुतौ च प्रसिद्ध एवायम्। पतिंवरेति। तथा च पाणिग्रहणे कंकणमित्यपि
लोकप्रपावचनोयमिति भावः। वक्त्रादिभ्यश्च। वक्रशब्दस्य गुणवाचित्वात् पूर्वेणासिद्धे उत्तरार्थं ग्रहणमित्याहुः। व
क्तृतस्क्त वक्रशब्दो नित्यं छंदसीत्युत्तरसूत्रे च द्वयमपि व्यर्थमिव। सर्वविकल्पानां छंदसि व्यवस्थितत्वात्। तुंयोगा
दिति। तथा च गौणी वृत्तिरिति भावः। यदा तु मुख्यार्थो तस्येदमित्यण् तदा गोपीत्येव भवति। योगश्चेह दंपतिभाव
एवेत्येके। वस्क्त तस्क्त संकोचेमानाभावाज्जन्यजनकभावोपि गृह्यते। तथा च भट्टिः। कौशल्ययासावि सुखेन रामः
प्राक्केकयीतो भरतस्ततोऽभूदिति। केकयस्य दुहिता केकयी। जनपदशब्दादित्यपत्यप्रत्यये केकयीति स्या
त्। न च तस्यात श्चेति लुक्। नप्राच्यभर्गादीति प्रतिषेधात्। तथा च कालिदासः। कैकेयिकामाः फलितास्तवेति।
एतेन देवका व्याख्याता। दुष्टो यवो यवानीति। जात्यन्तरमेवानेनाभिधीयते। अयमेव चास्य दोषः। यदुत यवत्व
जातेरभावेपि तदाकारानुकृतिः ङीषाद्य इति। इदं च तृतीये ऊङ्श्चेति सूत्रे भाष्ये स्थितम्। कथमिति। यत्तु वदन्ति।
दीर्घोच्चारणसामर्थ्यात् आ अनु ऊङ् इति पदं विभज्यते। तेन शादीनामनुङेव सिद्ध आकारादशविधानसाम

॥राम॥
॥८१॥

र्थात्क्वचिदन्यतोऽपि विधानमनुमीयते। तेन ब्रह्मणीति सिध्यतीति। तच्चिन्त्यम्। अनुकि कृते अतो गुण इति पररूपप्रसंगात्।
नन्चकारोच्चारणसामर्थ्याद्दीर्घो भविष्यति अन्यथाऽनुकमेव कुर्यादिति चेत्। न। अल्लोपोऽन इत्यस्य बाधेन चरितार्थत्वात्।
प्रत्युत नरीति वदादेशे कर्तव्ये आगमलिंगककारोच्चारणसामर्थ्यादेवाल्लोपो न भविष्यतीति चेत्। न। शर्वशब्दे ककार
स्य चरितार्थ्यात्। नहि तत्र लोपोऽस्ति नसंयोगादिति निषेधात्। तस्मात्ककाराकारयोः सामर्थ्यविरहे पररूपबाधनार्थं दी
र्घोच्चारणमावश्यकमिति। एतेन अनुक् कृत्वादिरेव लाघवाद्वक्तव्य इति हरदत्तोक्तिरपि प्रत्युक्ता। यत्तु इंद्रमाच
क्षाणः इन्द्रः। तत्करोतीति णिच्। ततः क्विप्। तस्येंद्रः स्त्री इंद्राणी यथा स्यादिति दीर्घोक्तिरिति न्यासकारेणोक्तं तन्न। इं
द्रशब्दस्याचक्षाणादावुपसर्जनत्वात्। इंद्रः स्त्रीति वाक्यमेव तत्र भवति। कर्मण्यणिति। तदन्तान्ङीष्। पूर्वपदा
त्संज्ञायामिति णत्वम्। वस्त्रक्रीतीति। वस्त्रेभिः क्रीता इत्यस्यामवस्थायां प्राक्सुबुत्पत्तेः समासेऽदन्तत्वान्ङीष्।
क्वचिन्नेति। कर्तृकरणे कृता इति सूत्रे बहुलग्रहणात् क्वचित्सुबन्तेन समासः। तत्र च सुपः प्रागेवान्तरंगत्वाट्टा
पूर्ततोऽदन्तत्वाभावान्न ङीषिति भावः। तेन वस्त्रक्रीतेति। अयं भावः। बहोर्नञ्वदुत्तरपदभूम्नि। नञ्सुभ्याम्। जाति
कालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्ना इति सूत्रोदात्तत्वविधायकानि। तत्र जातिपूर्वादित्यु

म॰ सु॰

क्तो बह्वादि पूर्वकस्यायं पर्युदासः इति। अस्वांगपूर्वपदाद्विकल्पस्य वक्ष्यमाणत्वात्। इह स्वांगपूर्वपद एवोदाहरणमित्याह। ऊरुभिन्नेति। जातान्तादिति। वर्णादित्तु दान्तादिति वद्बहुव्रीहेरुदान्तादित्येव सिद्धे। न्त ग्रहणं नित्यत्वप्रतिपत्त्यर्थम्। वा जाते इति तु वैकल्पिक उदात्तो न तु नित्य इति भावः। सुमुखा शालेति। एवं च फलमुखी कारणमुखी चानवस्थेत्यादि प्रयोगाः प्रामादिका इति बोध्यम्। उरः क्रोडेति। स्त्रीलिंगोऽयमिति हरदत्तादयः। तत्रोपसर्जनह्रस्वत्वे कृते दन्तत्वान्ङीषः प्राप्तिः। अमरस्तु नना क्रोडं भुजान्तरमित्याह। रत्नमतिस्तु पुंस्त्वमाह। गणे च क्रोडेति प्रातिपदिकमात्रं पठ्यते न तु टाबन्त मिति गणरत्नमहोदधिकारः। एवं चाविशेषाल्लिंगत्रयेप्युदाहरणं बोध्यम्। माधवस्तु तुदादिगणे कुड निमज्जन इति धातावाह। क्रोडः घञ्। क्रोडा अश्वानामुरः। टाबन्तोऽयं स्वभावतो विशेषविषयः। क्रोडादिषु टाबन्तस्यैव पाठो कुजान्तरमात्रवचनस्य क्रोड शब्दस्य बहुव्रीहौ स्वांगलक्षणो ङीष् विकल्पो भवत्येव। कल्याणक्रोडी कल्याण क्रोडा मयूरीति। ङीषो ङी बादेश इति। दिक्पूर्वपदादिति पंचम्या ङीषिति प्रथमायाः षष्ठी विकल्प्यत इति भावः। यदि तु स्वतंत्रो ङी स्यात् प्राग्गुल्फादावपि प्रयुज्येत। पूर्वोक्तपर्युदासस्य निषेधानां चानुवृत्तौ तु गौरवमितिभावः। वृषलेति। एकस्यां हि व्यक्तौ वृषलत्वे कथिते तदपत्यत्वसहोदरादौ कथनं विना तस्य सुग्रहत्वादिति भा

॥ राम ॥

॥ ८२ ॥

वः। औपगवीति। अणन्तलक्षणं ङीपं परत्वाट्टिड्ढे बाधते। एवं चापत्याधिकारे औपगवीति प्रतीकमुपादाय टिड्ढाणञिति
ङीब्विति व्याख्यानाड्डपेक्ष्यमितिभावः। ब्राह्मणीत्यत्रेति। एवं च प्राचोऽङी षुदाहरणं प्रामादिकमितिभावः। ऊङुत इति।
लिंगविशिष्टपरिभाषया स्वादयः। प्राचा लवन्तादिवत्रेति सूत्रमुपन्यस्यादिवद्भावात् स्वादय इत्युक्तं। तत्रेदं वक्तव्यं।
परं प्रत्यादिवद्भावो विधीयते। तथा चेह प्रत्यय इति प्रतिषेध एव स्यान्न तु स्वादयः। यत्तु व्याचख्युः। आदिरूङ्पे
क्षया पूर्वः प्रातिपदिकं तद्वद्भावात्तदवयवत्वेन ग्रहणात्। पूर्वान्तवद्भावादिति यावदिति तदपि क्लिष्टम्। स्वपर
ग्रंथविरुद्धं च। ऊङः कृत्यादिकार्ये ऊङ्स्यात् द्वावपि एकवचनमुत्सर्ग इति सुः प्रवर्तते। तद्वारणाय चाप्रत्यय
इति प्रसज्यप्रतिषेधाभ्युपगमे प्रकृते दोषः। श्वश्रूरित्यत्र एकादेशाभावाल्लिंगविशिष्टपरिभाषाया एवाऽव
श्यकत्वात्। यत्तु तत्र श्वशुरः श्वश्र्वेति निर्देशात् स्वादय इति तन्न। निर्देशस्य शब्दपरत्वात् यथा विपराभ्यां जेः ङ्य
इतिवत्। श्वशुरस्येति। पुंयोगलक्षणे ङीषि प्राप्ते ऊङ्। तत्संनियोगेन च विधीयमानो लोपः सन्निहितत्वादस्यैव
वाकारस्य न त्वादेः। एतच्च वचनं श्वशुरः श्वश्र्वेति निर्देशसिद्धार्थकथनम्। अतोऽपि प्रथमाकारस्य लोपो न शंक्यः।
उपमानवाचिपूर्वपदमिति। धात्री कराभ्यां करभोपमोरूरित्यत्र तु न। करभशब्दस्योपमानवाचित्वेऽपि पूर्वप

म॰ सु॰

दत्वाभावात्। शफौ खुरा क्षिति। यद्यपि शफं क्लीबे खुरः पुमानित्यमरः। तथापि शफशब्दस्य पुंस्त्वमपि बहुसम्मतम्। शफाविव जर्भुराणेति श्रुतौ। याम्यपशुसंघेष्विति सूत्रस्य व्याख्यावसरे न्यासहरदत्तादिग्रंथेषु वाचस्पत्यादिनिबंधेषु च प्रचुरप्रयोगदर्शनात्। लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्याच्च। शफो भुजो गुदं घोणेति गणरत्नमहोदधौ। क्रोडादिगणे पाठाच्च। शफः खुरे गवादीनां मूले विटपिनामपीति हेमचंद्रकोषाच्च। विश्वकोषे च पुंन्नपुंसकलोक्ता। वामोरू सुंदरौ ऊरू यस्याः इति विग्रहः। इह सर्वत्रोपमानाभावादप्राप्ते विधिः। कथं तर्हि पीवरोरूपिबतीव बर्हिणा इति कुमारः। प्रमाद एवायम्। संज्ञापूर्वकत्वात् संबुद्धि गुणो नेत्येके। हितेन सहितेति। समो वा हिततत्योरिति ल्युप्तादितः सहितशब्दस्येह न गृह्यते। एकदेशविकृततया संहितग्रहणादेव सिद्धेरिति भावः। अश्रूयो अकार इति। अत्र अकारविशेषणं किम्। शूरसेनी। जनपदशब्दादित्यञो अतश्चेति लुकि जातिलक्षणो ङीष्। शार्ङ्गरवीति। शृंगरुशब्दादपत्यार्थे अण्। नृनरयोरिति। नृशब्दात् ऋन्नेभ्य इति ङीपि नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनम्। ननु नरशब्दे ऽलोन्त्यस्य वृद्धिः स्यात्। यस्याः। अंत्यस्य यस्येति लोपेनापहारात्। अनंत्यस्याप्यकारस्य वृद्धिर्भवति। आन्तरतम्यात् गुणो लव न्याय्यकल्पनेति अलोन्त्यप

।।राम।।

।।८३।।

166

रिभाषाबाधस्यैव न्याय्यत्वादिति। तन्न। प्रत्ययसन्नियोगशिष्टाया वृद्धेरन्तरङ्गत्वेन परमपि यस्येति लोपं बाधित्वा प्रवृत्तत्वौचित्या
त्। किञ्च। अस्तु कथञ्चिल्लोपस्तथापि रेफस्यैव वृद्धिः स्यात् नत्वकारस्य। अन्तरतमपरिभाषापेक्षया अलोऽन्त्यपरिभा
षायाः परत्वात्। अपि च। अन्तरतमपरिभाषा असदृशमादेशं व्यावर्तयितुं न तु स्थानिनं नियच्छति। तत्कथं रेफस्य स्था
नित्वव्यावृत्तिः। किं च। गुणोऽन्त्यस्येति न्यायोपन्यसनं स्वग्रीव एव। परिभाषयोः परस्परं गुणगुणिभावायोगात्। अत्रे
दं तत्त्वम्। नर इति रान्तं शब्दस्वरूपाकारानुकरणम्। नरः अः नरः। नावनरस्य तयोरिति व्याख्येयम्। पद्मानरस्य अः नरः क
तन्त्रवत्स्वरूपम्। नावनरस्य तयोः तन्नरयोः। नरस्यैव प्रथममेव अकारो गृह्यते न तु द्वितीयः प्रत्यक्षसामर्थ्यात्। अथ
कं शब्दं कौस्तुभे बोध्यम्। पुत्रशब्दो न पठ्यते। तौल्वपुत्री। पुत्रीव हर्षं हृदये तनोति। कुर्वति दुर्वीपतिपुत्रिसर्वम्। नव
पुत्रशब्दः कन्यायां नास्तीति भ्रमितव्यम्। आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेऽप्य
मरोक्तेः। अत एव प्रत्ययस्थादिती त्वप्रकरणे वा सूतकापुत्रिकावृन्दारकाणामिति वार्त्तिकं तज्ज्ञाप्यादिकं च संग
च्छते। यत्तु वत्र हरदत्तेनोक्तम्। केवलः पुत्रशब्दः स्त्रियां न वर्तते इति तज्ज्ञाप्यादिविरोधादुपेक्ष्यम्। इत्वप्रकर
णस्थ स्वग्रैथ्यविरोधाच्च। इदं तु चिन्त्यम्। कारे सत्यागदस्येति सूत्रे। सूतो ग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्र

167

मि॰

प॰ खु॰

ङ्वेति वार्त्तिकं किमर्थमिति। यत्तु वदन्ति। स्वरार्थमिति तन्न। टित्वान्ङीपि कृते उदात्तनिवृत्तिस्वरेणोदात्तः। ङीनन्तेन तत्पुरुषे
पि समासस्वरेणान्तोदात्त एवेति स्वरभेदाभावात्। यदपि शार्ङ्गरवादौ पुत्रशब्दः प्रक्षिप्तः न तु सांप्रदायिक इति। तदपि न उ
दाहृतप्रयोगविरोधात्। वास्तुतके त्यादिवार्त्तिके कैयटहरदत्तादिकृताकारप्रश्लेषविरोधाच्चेत्यास्तां तावत्। आंबष्ठ्येति।
वृद्धेत्कोसलेति ञ्यङ्। कारीषगंध्येति। करीषस्येव गंधोऽस्य करीषगंधिः। उपमानाच्चेति गन्धस्येदन्तादेशः। तस्य गोत्रा
पत्यं स्त्री अण्। अणिञोरिति ष्यङादेशः। सर्वपद्यपि। स्त्रियामेव विहितस्तथापि लिङ्करणसामर्थ्यात्तिदन्तादपत्यं वा ॥राम
पू। पौतिमाष्येति। पूतिमाषशब्दो गर्गादिः। तद्धिताः। बहुवचनमनुक्तानामुपसंख्येयानां संग्रहार्थम्। महासंज्ञा ॥८४
करणमन्वर्थत्वाय तेभ्यः प्रयोगेभ्यो हिताः तद्धिता इति। तेन यथाभिधानमेव स्युः। स्यादेतत्। टापः प्रागयमधि
कारोऽस्तु ष्फविधौ तद्धितग्रहणं यस्येति लोपे ईद्ग्रहणं वमास्त्विति चेत्। मैवम्। पङ्क्तीत्यत्र ओर्गुणप्रसंगात्। अत्र
न्नादिति। यौतिमिश्रीकरोति पत्येति व्युत्पत्तेः। केचित्तु बाहुलकाद्यौतेरौणादिकं कतिप्रत्ययं वदन्ति। उभयथापि
युवतीनां समूहो यौवतम्। त्यन्ता तु अणि पुंवद्भावात् यौवनमित्येव। भिक्षादिपाठसामर्थ्यान्न पुंवदिति वृत्ति
स्तु भाष्यविरुद्धा। भाष्ये तत्पाठस्य प्रत्याख्यानादिति दिक्॥ ॥इति स्त्रीप्रत्ययाः॥ ॥मात्रशब्दस्येति। त

स्यचावधारणार्थः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः। प्रातिपदिकादीन्येव तन्मात्रमिति एवकारेण स्वपदविग्रहः। मयूर
व्यंसकादित्वात्समासः। ह्रस्व इति। यद्यपि नीलरूपवत्परोऽयमनियतलिंगस्तथापि वासुदेवे भगवति नियतपुल्लिंग एवे
ति भावः। ज्ञानमिति। भावे ल्युट्। द्रोण इति। न च प्रातिपदिकार्थमात्रे प्रथमेहास्त्विति वाच्यम्। तथा सति परिच्छेद्यप
रिच्छेदकभावस्य संसर्गविधया भानायोगात्। नामार्थयोरभेदसंसर्ग एव व्युत्पत्तेः। न चात्र षष्ठ्यर्थबहुव्रीहौ व्यभिचारः।
एकार्थीभावाभ्युपगमात्। नापि निपातार्थे तेषां द्योतकताभ्युपगमात्। न च सिद्धान्तेऽपि प्रकृतिप्रत्ययार्थयोरभेदान्वयो
दुर्लभः अन्यत्रादृष्टत्वादिति वाच्यम्। देवतार्थकतद्धितादौ दृष्टत्वादिति भावः। वचनं संख्येति। तथैव प्राचां व्यवहारात्।
इह सूत्रेऽर्थे लिंगे च प्रथमेत्येतावदेव सुवचम्। इतरत्सर्वं त्यक्तुं शक्यम्। तथाहि। अर्थे प्रथमेत्युक्ते कस्यार्थे इत्याकांक्षा
यां यस्मात्स्वादिविधिस्तस्येति लभ्यत एव। स्वादयश्च प्रातिपदिकाल्लिंगप्रत्ययविशिष्टाच्च विधीयन्ते। तदर्थत्वं च तत्तन्नि
यतोपस्थितिकत्वमेव। एवं च मृडानी हिमानीत्यादौ पुंयोगमहत्त्वादेरपि स्थगत्वान्नियतत्वानेन प्रथमा सिध्यतीत्यपरम
नुकूलम्। यथान्यासे तु सा न स्यात्। यदि तु अर्थशब्दो वृत्तिविषयपरः। वृत्तिश्च शक्तिर्लक्षणा च। गौणी तु लक्षणान्तर्भू
तापृथग्वास्तु। तर्हि किं च प्रातिपदिकार्थ इत्याश्रीयते तदा लिंगेऽस्त्यपि मास्तु। लक्ष्याणां विविच्यत्वेऽपि न क्षतिः। निय

मांशस्यागात्॥ तथा च अर्थे प्रथमेत्येव सारम्॥ द्रोणो व्रीहिरित्यपि द्रोणशब्दस्य तत्परिमिते उपचारात् सिद्धः॥ गौ
र्वाहीक इतिवत्॥ एको द्वावित्याद्यपि न केवला प्रकृतिः प्रयोक्तव्येति निषेधादेव सिद्धम्॥ अनन्वि
तार्थक प्रयोगोपि त्वया अनुवादकमात्रस्य प्रयोगस्य न्याय्यत्वात्॥ एवं मात्रग्रहणमपि व्यर्थम्॥
संबोधने चेति ज्ञापकेन कर्मद्याधिक्ये प्रथमाया अप्रवृत्तेः॥ यत्तु प्रायो व्यक्तं प्रातिपदिकार्थः सत्ते
ति॥ यच्च व्याख्यातं योऽर्थः सन्नित्येव केवलं भासते न जात्यादिरूपेण लिंगसंख्याकारकयोगी स ॥रा
विवक्षितो यथा॥ अव्ययार्थः॥ अव्ययार्थो हि केवलमस्तीति शक्यते वक्तुम्॥ न पुनरीदृशास्तादृशा ॥८
इतीति॥ तन्न॥ उच्चैर्नीचैरित्यादिशब्दानां सन्नित्याकारकप्रतीतिजनकत्वस्य सर्वतंत्रविरुद्धत्वात्॥ रु
अस्त्यादिसामानाधिकरण्यस्यापि असत्वार्थकेषु दुर्लभत्वात्। न लिंगसंख्याकारकयोगीति

समुच्चयादि शब्दस्य॥ त्वदुक्तिविरोधाच्च॥ पदान्तरोपस्थापितस्य अस्तिसामानाधिकरण्यमस्तीति चेत्॥ न॥ तस्याव्याव
र्तकत्वात्॥ न पुनरित्यादिवाक्यशेषविरोधाच्च॥ कृष्णः श्रीरित्यादावव्याप्तेश्च॥ न च लिंगग्र
हणात्तत्सिद्धिः मात्रपदेनाधिकव्यवच्छेदात्॥ यदपि प्राचा व्याख्यातम्॥ यत्रार्थांतरापेक्षया शब्द

सोऽयं द्रोण इत्याकारेण प्रवृत्तिर्गुणभूता।४

प्रवृत्तिः स सर्वः प्रातिपदिकार्थः शब्दप्रवृत्तिनिमित्तमिति यावत्। यथा उच्चैर्नीचैरिति। अलिंगसंख्यावेतौ
केवलं जात्यादिनिरपेक्षं स्वार्थमाहतुरिति। तदपि न। प्रवृत्तिनिमित्तं हि प्रकारीभूय भासते। तथा च तत्
न्मात्रबोधोऽसंभवी। यदि सोऽपीष्टस्तर्हि घटादिशब्देभ्योऽपि स्यादिति संख्याकारकाद्यनन्वय एव
स्यात्। यदपि द्रोणपरिमिते व्रीह्यादौ द्रोणशब्दः सोऽयमित्यभिसंबंधात्प्रवर्तते। तत्र गौणमुख्यन्याया
न्न प्राप्नोतीति परिमाणग्रहणमिति। तन्न। पदकार्येष्वयं न्यायो न प्रातिपदिककार्येष्विति सिद्धान्ता
त्। अन्यथा सिंहो माणवक इत्याद्यसिद्धिप्रसंगाच्च। यदप्याहुः। द्रोणादयः शब्दाः लोहं दारुमयं वा
परिमाणमेव न व्यभिचरंति। परिमेयं तु व्यभिचरंत्येव। अतस्तस्य प्रातिपदिकार्थत्वाभावादप्राप्ते परिमा
णग्रहणमिति। गौणलाक्षणिकेषु सिंहो माणवकः मंचाः क्रोशंतीत्यादिष्वव्याप्तेः। तत्र विशेष्यस्य माण
वकादेर्भेदेऽपि सिंहसदृश इत्यर्थो गौण्यां नियतोपस्थितिक एवेति यदि। तर्हि व्रीह्यादेर्भेदेऽपि [illegible] द्रोण
परिमितो नियत एवेति तुल्यम्। सम्बोधने तु मात्रग्रहणात्सम्बोधनाधिक्ये न प्राप्नोतीत्यारंभः। इह
संबोधनं प्रकृत्यर्थं प्रति विशेषणं क्रियां प्रति विशेषणमिति सिद्धान्तः। उक्तं च। संबोधनपदं यच्च तत्

ति ३

म॰सु॰

क्रियाया विशेषणम्॥ व्रजानि देवदत्तेति निघातो न तथासतीति॥१॥ एवं च राममां पाहीति वाक्य
स्य रामसंबंधिसंबोधनविषयो मत्कर्मकरक्षणमर्थः॥ ॥इति प्रथमा॥ ॥कर्तुरीप्सिततमं क
र्म। कर्तुरिति क्तस्य च वर्तमान इति कर्तरि षष्ठी। आप्नोतेः सनन्तान्मति बुद्धिपूजार्थेभ्यश्चेति वर्त
माने क्तः। मतिरिच्छा। ननु बुद्धिः पुनर्बुद्धिग्रहणात्। एवं च कर्त्रा आप्तुमिष्यमाणं कर्मेत्यर्थः। क
र्तृ च धातूपात्तव्यापाराश्रयः स च केनाप्तुमिच्छतीत्याकांक्षायां विशेषणीभूतेन व्यापाराश्रयेण
त्यर्थाल्लभ्यते। तदेव दारु। क्रिययेति। क्तप्रत्ययेनोपस्थितं वर्तमानत्वं च नेह विवक्षितम्। तेन कटं कृ
तवान् करिष्यतीत्यादि सिद्ध्यति। कारकमिति। एतच्च कारक इत्यधिकारसूत्राल्लभ्यते। तत्र हि व्य
त्ययेन प्रथमार्थे सप्तमी। प्रतिसूत्रं च वाक्यं भित्वा कारकसंज्ञा विधीयते। तद्यथा। अपाये ध्रुवं कारक
संज्ञं स्यात्। तत अपादानम्। उक्तं कारकमपादानसंज्ञं स्यात्। पुनः कारकग्रहणाद्वानुवृत्तिसामर्थ्याद्वि
ह विशेषसंज्ञाभिः सह समावेशः। अन्वर्था चेयं संज्ञा। करोतीति कारकमिति। तेन क्रियायामन्वयि
नो न भवति। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। इह हि ब्राह्मणः पुत्रविशेषणं न तु क्रियान्वयी।

अपादानसं
ज्ञाभिः॥२

॥रा
॥८

172

यद्वा। कारकशब्दः क्रियापरः। करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथा चापादानादिसंज्ञाविधौ क्रि
यायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञा विधीयते। कारकाद्दत्तश्रुतयोरित्यादौ तु कारकश
ब्दः स्वर्यते। तेनैतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते। अन्यस्मिन् पक्षे त्वत्रापि कारकमित्यस्य क्रि
यान्वयीत्यर्थः। आद्यपक्षे तु कारकसंज्ञं स्यात्। तच्च कारकं कर्मसंज्ञं स्यादिति व्याख्येयम्। अनभिहि
ते। ननु बहुपटुरित्यादौ बहुचा उक्तार्थत्वाद्यथा कल्पबादयो न। एवं क्रियते कट इत्यादावपि ति
ङाभिरुक्तार्थत्वात् द्वितीया न भविष्यति। किं च। कटं करोतीत्यादौ सावकाशा द्वितीया। कृतः कट
इत्यादिषु प्रथमया बाधिष्यते। निरवकाशत्वात्। न च वृक्षः प्लक्ष इत्यादिरवकाशः। तत्रापि प्रतीयमा
नामस्ति क्रियां प्रति कर्तृत्वेन तृतीयाप्रसंगात्। अथ नीलमिदं न तु रक्तमित्यादौ विशेषणान्तरनि
वृत्तितात्पर्यफलके अस्ति क्रियाया अनावश्यकत्वात् प्रथमाया अवकाशं ब्रूषे। तर्हि विप्रतिषे
धात् प्रथमाऽस्तु। एवं चानभिहिताधिकारो व्यर्थ इति चेत्। मैवम्। संख्याविभक्त्यर्थ इति पक्षे सूत्रारंभा
त्। तथा चानभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमित्यर्थः। सूत्रानारंभे च कर्मणि यदे

४३३

173

३ कत्वं तत्र द्वितीयैकवचनमिति हि वाक्यार्थः। तथा सति कृतः कट इत्यादौ च क्तेन कर्ममात्रोक्तावपि त
देकत्वस्यानुक्ततया अम्रदुर्वरिः परत्वात्प्रथमेत्यपि न। कर्त्तव्यः कट इत्यादौ ततोऽपि परत्वेन कृद्यो
गलक्षणा षष्ठी प्रसंगात्। कारके विभक्त्यर्थ इति पक्षे तु सूत्रे प्रत्याख्यातमाकरे। हरिं भजती
ति भजनक्रियया हरौ प्रीतेरुत्पादात् प्रीतिविशिष्टतया क्रियाव्याप्यत्वेन हरिः कर्म। तद्वि
शिष्टं भजनं वाक्यार्थः। हरिः सेव्यत इत्यत्राप्येवमेव। क्रियाप्रधानमाख्यातमिति सिद्धान्त ॥राम॥
तः धात्वुपस्थिता क्रिया तिङर्थं प्रति विशेष्या न तु कृदर्थं प्रतीव विशेषणमिति हि तस्यार्थः। अत ॥८७॥
एव पाचको व्रजतीतिवत् पचति व्रजतीति नैकं वाक्यम्। पाककर्तृकर्तृकं गमनं हि पाचक इत्यादेर कं ७
र्थः। एककर्तृका पचिक्रिया गमिक्रिया वा पचति व्रजत्योः पृथगेवार्थः। एवं च प्रथमान्तविशेष्य
को बोध इति नैयायिकोद्घोषो भाष्याद्यथानुसारिभिर्नादर्त्तव्यः। यास्कोऽप्याह। भावप्रधान
माख्यातं सत्वप्रधानानि नामानीति। पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रि
यायां कर्म। प्रधानं दृशिक्रियैव। उक्तञ्च। सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणम्। तथाति

ङन्तमप्याकुस्तिङन्तस्य विशेषणमिति॥१॥ एवं पचति भवतीत्यस्य पचिक्रिया भवतीत्यर्थः॥ अयं तु विशेषः॥ तिङन्तो
पस्थितायाः क्रियायाः क्रियान्तरं प्रति विशेषणत्वे ऽपि शाब्दाध्याहारवादे कर्मत्वं संसर्ग एव न तु प्रकारः॥ अ
पदार्थत्वात्। अर्थाध्याहारवादे तु प्रकारत्वे ऽपीष्टापत्तिः पचतीत्यादौ धात्वपात्तफलस्यापीत्थमेवम
तभेदेन व्यवस्था। अत एव तत्समानाधिकरणे शोभनं पचतीत्यादौ द्वितीयैकवचनोत्पत्तिः। अग्नि
ष्टोमेन यजेत इत्यादौ तृतीयोत्पत्तिश्च संगच्छते। न च दृष्टान्ते विशेष्यसमर्पकाद्दार्ष्टान्तिके विशे
षणसमर्पकाच्च कर्मत्वादिवाचिकायाः सुब्विभक्तेः प्रयोगो ऽस्त्विति वाच्यम्। धातुतिङन्तयोर प्राति
पदिकत्वात्। नैयायिकानां तु स्यादेष दोषः। तथा हि। धावन्तं मृगं पश्यतीतिवत् धावति मृगमित्य
पि स्यात्। न चात्र प्रथमासामानाधिकरण्ये शाब्दज्ञानं चोनित्यत्वात् नैवं प्रयोग इति वाच्यम्। एवम
पि द्वितीयानुत्पत्तेर्दुरुपपादत्वात्। ननु तत्र वाक्यभेद एव पश्यत्यवतमिति कर्माध्याहारात् पचति
भवतीत्यादौ तु पाको भवतीत्याद्यर्थे अनिष्टमेवेति चेत्। मैवम्। अध्याहारे गौरवात्। तस्य च

पश्येत्यादिवाक्यं शाब्दबाधितत्वान्न स्यात्। २

विकृतिवाच काधातुवाच काचधातोः ५

धावतीत् क्कर्मबो ल्पचतौ चकर्तृ कात्। ५

अनिष्ट त्यस्य

इति क्रियां प्रति कर्मत्वात् कर्म द्वितीया स्यात्। ४

म॰ स्तु॰

मुनिवचनविरोधेनाप्रामाणिकत्वात् त्वदीयाः निष्ठामात्रस्य किं वित्करत्वात् अपि च। अपाक्षीदे
वदत्तोः वेद् इत्यादौ च्लादेः प्रसंग एव नास्ति। एकवाक्यत्वं च भाष्यवार्त्तिकादिसकलसंमतम्
न च तिङंतस्थले क्रियाविशिष्टक्रियान्तरबोधो न जायत एवेति वाच्यम्। तथैव व्युत्पन्नानां ताद
शबोधस्य दुर्वारत्वात्। ईदृशोः र्थे साधुत्वं नेष्टमित्यपि न। साधुत्वानुशासनार्थं त्वदुक्तेरेवस्वी
कारात्। धातुसंबंधाधिकारव्युत्पादिते पुरीमवस्कन्देत्यादौ तस्याः वश्यकत्वाच्च। ननु सिद्धा
न्ते आख्यातवाच्यक्रियाया अपि कर्तृत्वकर्मत्वस्वीकारे तस्या असत्वरूपत्वं भज्येतेति चेत्। न। लिं
गसंख्ययोः कर्तृकर्मेतरकारकस्य चाभावमात्रेण तथात्वोपपत्तेः। कर्मत्वस्य प्रकारतयाः न
भ्युपगमाद् इत्यन्यत्र विस्तरः। अभिहिते चेति। नन्वेवं पक्वमोदनं भुंक्ते इत्यत्रापि द्वितीया न स्यादि
ति चेत्। मैवम्। इह हि पचि भुजिनिरूपिते द्वे कर्मत्वशक्ती। तत्र प्रधान क्रिया निरूपितामनभि
हितां शक्तिमादाय द्वितीयोत्पत्तेः। उक्तं च हरिणा। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।

॥ ॥ वि

(176)

उ.को.व.८२

शक्तिर्गुणाश्रयात्तत्रप्रधानमनुरुध्यते॥१॥प्रधानविषयाशक्तिः प्रत्ययेनाभिधीयते।यदागुणेत
दातद्वदनुक्तापिप्रतीयतइति॥२॥अतएवपक्वौदनोभुज्यतइत्यत्रभुजिप्रत्ययेनाभिहितेप्रथमै
वापच्चेरप्राधान्यात्।वस्तुतस्तुपक्काभुज्यतइत्यादौकर्मणःपविभुजिभ्यांनयुगपत्संबंधोऽन्वयः
किंत्वन्यतरेणशाब्दःअपरेणार्थः।तत्रचप्रथमाद्वितीयेव्यवस्थितेएव।तद्यथा।पक्काभुज्यते
ओदनः।किंपक्काअर्थादोदनम्।यदातुओदनंपक्काभुज्यतइतिप्रयुज्यतेतदाभुज्यतइत्यत्रअ
र्थादोदनइतिगम्यते।एवंचविवक्षाभेदेनपूजयितुंशक्यतेहरिःहरिंवेत्युभयंसाधु।प्राप्तानं
दइति।आनंदकर्तृकप्राप्तिकर्मीभूतइत्यर्थः।तदुक्तंप्रायेणेतितस्यफलमाहक्वचिदिति।
विषवृक्षइति।यदितुवर्धिछिद्योरन्यतरेणसहकर्मतयाऽन्वयोविवक्ष्यतेतदाद्वितीयास्या
देवेतिध्येयम्।तृणंस्पृशतीति।यथास्तूयमानस्यगंगादेरीप्सितस्यक्रिययायोगः।तद्वन्य

म० सु०

संयोगादिफलाधारत्वात्। तथैवानीप्सितस्यतृणादेरपीतिभावः। स्यादेतत्। धात्वर्थस्याप्यफलत्वाल्लि
कर्मत्यैवास्तु। किमीप्सितानीप्सितयोः पृथक्कथनेनेतिचेत् मैवं। अग्रेर्माणवकं वारयतीत्यत्र वारणार्था
नामितिसूत्रेण माणवकस्यापादानत्वं प्राप्तं तद्बाधायकर्तुरीप्सिततममितिवक्तव्यमेव। एवं च द्वेष्यो
दासीनयोः संग्रहार्थं तथायुक्तमित्यस्याप्यावश्यकत्वात्। अनीप्सितग्रहणं तु स्पष्टार्थमेव नत्वाव
श्यकम्। इदं त्ववधेयम्। ईप्सितानीप्सितयोः शाब्दबोधे एकरूप एव। ईप्सानीप्सादेरघित्रीडादि ॥
वत्संज्ञाप्रवृत्तावुपयोगः। पि द्वितीयावाच्यकोटावप्रवेशात्। अनन्यलभ्यस्यैव शाब्दार्थत्वात्। कर्म ॥
णि द्वितीयेतिसूत्रे हितन्नत्स्त्रैर्यावतां कर्मसंज्ञाविहिता ते सर्वे तेन तेन रूपेणोपस्थिताः। तेषु चवि
धीयमाना द्वितीया आधारत्वाविकाद्वित्तलाघवात्। क्रियाया धातुना कर्तुश्च देवदत्तादिशब्दैर्ला
भात्। इष्टतमत्वादेस्तु भानाभावात्। प्रकृतिप्रत्ययार्थयोश्चाभेद... संसर्गः... तथा च स्वर्याधारिकाया
ग्रीतिस्तदनुकूलो व्यापारो वाक्यार्थः। यद्यपि कर्मणि क... अधिकरणे... नां द्वितीयादी

(178)

आधारसंबंधिफलम्‌ काष्ठं छिनत्तीति काष्ठे व्यापारः देवदत्तेन काष्ठं छिन्नमिति कर्तरि फलं स्यात्‌ व्याप्रियतीति कर्मद्वाराधिक
रणे फलव्यापारं कर्तृकर्मद्वाराम्भूतलले प्रवतीतिम्भूतले। १

नामाधारोऽर्थ इति तुल्यं तथापि तन्निरूपकं फलं व्यापारः स्वाश्रयद्वारा तदुभयं तत्फलीभूते त्वाख्याबो
धे वैलक्षण्यं संगच्छते। न चाधारतैव वाच्येति मंतव्यम्‌ तन्निष्ठधर्मस्य वाच्यतावच्छेदकतापत्त्या गौ
रवात्‌। कर्मणि द्वितीयेत्यादिसूत्रस्वरसभंगापत्तेश्च। अत एव भाष्यकार आह। सुपां कर्मादयोऽप्यर्थाः सं

र्मादयः सं
ख्या च ४

ख्या चैव तथा तिङामिति। न च तिङ्क्ष्वपि धर्ममात्रमर्थः। कर्त्तरि कृतल्लः कर्मणि च तयोरेव कृत्यक्तखलर्था इ
ति सूत्राणां वैरूप्यापत्तेः। पाचको देवदत्तः पक्व ओदन इत्यादौ सामानाधिकरण्यानुरोधेन धर्मिवाच्य
कतास्वीकाराच्च। तस्मादिह घटादिशब्दानामिव विशिष्टमेव वाच्यम्‌ आकृत्यधिकरणेऽभ्युपगते
तु कृत्स्वपि धर्ममात्रम्‌। सर्वथाऽपि नैयायिकमीमांसकाद्यभ्युपेतमर्द्धजरतीयं हेयमेव। न हि तिङ्‌
कृतोर्वैलक्षण्यं स्वरूपपादम्‌। प्रपंचितं चैतच्छब्दकौस्तुभेऽस्माभिरित्यलमियता। परिगणनमिति। तेन न
टस्य गाथां शृणोतीत्यादौ नातिप्रसंग इति भावः। गां दोग्धीति। गोसंबंधि पयः कर्मकं दोहनमित्यर्थः।
स्यादेतत्‌। कर्तुरीप्सिततमं कर्म। तथा युक्तं चानीप्सितमिति सूत्राभ्यां गतार्थमेतत्‌। तथाहि। त्यजनोप
सर्जनं त्याजनं दुहेरर्थः। दापनमंगीकरणं च याचेः। विक्लेदनं पचेः इत्यादि। एवं च धातूपात्तव्यापा

179

म०सु०

त्व्यापारविषयीभूतेयत्त्यजनदानांगीकारादितदाश्रयत्वंगवादीनांस्पष्टमेव।अतएवह्यणौक
र्तुर्णौकर्मत्वस्यन्याय्यसिद्धतयागत्यादिसूत्रंनियमार्थमितिप्राचांसिद्धान्तः।अतएवचाकडारसूत्रे
अपादानमुत्तराणि।गांदोग्धिपयइत्यत्रपरत्वात्कर्मसंज्ञेतिभाष्यंसंगच्छते।पंचकंप्रातिपदिकार्थइ
तिपक्षेअवधित्वफलाश्रयत्वयोर्युगपद्विवक्षायांचेदम्।अवधिभूतायागोःतन्निष्ठायःपयःक्षरणा
नुकूलव्यापारःतद्विषयिणीगोपनिष्ठप्रेरणेत्यर्थात्।तथाचअकथितंचेतिसूत्रंव्यर्थमितिचेत्‌। ॥रा
अत्रोच्यते।कर्मणःशेषत्वविवक्षायांनमाषाणामश्नीयादितिवत्षष्ठीप्राप्ता।तांबाधितुमिदंसूत्र ॥९
म्।तथाचेहषष्ठीवत्संबंधमात्रंद्वितीयार्थइतिस्थितम्।अपादानत्वमात्रविवक्षायांतुपंचम्येव।गोः
क्षीरविशेषणत्वेतुषष्ठी।तेनगोःपयोदोग्धीत्यपिप्रयोगःसाधुरेव।एवमग्रेऽप्यूह्यम्।यत्तुप्राचोक्तम्।
दुह्याच्यथरुधिप्रच्छचिब्रूशासुजिकर्मयुक्।नीहृकृषन्वहदंडग्रहमुष्षवकर्मभागिति।१।
अत्रेदंवक्तव्यम्।यद्दुहेःपाठोनिर्मूलः।जग्राहघृतंशाकमित्युदाहरणमप्ययुक्तम्।इतरेषांतु
द्विकर्मत्वंयद्यपिप्रामाणिकंतथापिसंदर्भशुद्धिः।तथाहिदुह्यादीन्न्यादींश्चद्वैराश्येनेहपठि

(180)

त्वाभावकर्मप्रक्रियाशेषेल्लकृत्यक्रखलर्थाः किंद्विकर्मकेभ्योमुख्येकर्मणिस्युःगौणेवेत्याकांक्षायांस्वय
मेवपठितम् न्यादयोणयन्तेनिष्कर्मगत्यर्थामुख्यकर्मणि। प्रत्ययंयांतिदुह्यादिगौणेऽन्येतुयथारुचीति॥१॥
एवंवदंडिमथिभ्यामपिमुख्येस्यात् तथावगर्गाः शतंदंड्यन्तामितिमाष्यंविरुध्येत। शतंह्यत्रप्रधानंनग
र्गाः अर्थिनश्चराजानोहिरण्येनभवन्तीतिवाक्यशेषात्। दंडिश्चेहग्रहणार्थोनतुनिग्रहार्थः अतएवह्य
त्रसमुदायेवाक्यपरिसमाप्तिः गुणानुरोधेनप्रधानावृत्तेरसंभवात् तथामंथेरपिप्रधानेस्यात् इष्य
तेतुगौणे। तथाचभारविः येनापविद्धसलिलः स्फुटनागसद्मादेवासुरैरमृतमंबुनिधिर्ममंथेइति। अ
त्रामृतंमुख्यंउद्देश्यत्वात् अम्बुनिधिस्तुगौणः यदपिव्याख्यातारआहुः। द्विकर्मकेषुपचेरप्रामाणिकः
पाठइतितद्भ्रमसात् तथाहि। कर्मवत्कर्मणेतिसूत्रेदुहिपच्योर्बहुलंसकर्मकयोरितिवार्तिकेतद्ग्रा
ह्येवपचेर्द्विकर्मकतालभ्यते। कैय्यटहरदत्ताभ्यांचतत्रैवस्फुटीकृता। माधवोऽप्याह। जयतेः कर्षतेर्मं
थेर्मुषेर्दंडयतेः पचेरित्यादिउदाजहारचे। तंडुलानोदनंपचतीति। यत्तुअकथितंचेतिसूत्रेहरदत्तेनो
क्तम्। अकथितशब्दोयद्यप्रधानार्थोगृह्येत तदापाणिनाकांस्यपात्र्यांदोग्धिपयइत्यत्रपाणिकांस्य

म०सु०

पाञ्चोरपिस्यात्। करणाधिकरणयोस्तुपवत्यादिरवकाशः। नहितत्रास्यप्रसंगो दुह्यादावपरिगणना
दिति। तन्मतान्तराभिप्रायेणं अन्यथा उदाहृतस्वपरग्रंथविरोधादित्यास्तांतावत्। शतंजयतीति। जिअ
भिभवे। यत्तु जि जय इति व्याख्यातं तन्न। तस्याकर्मकत्वात्। यद्यपि जयत्यादयो भाष्येन पठितास्तथा
पि चकारेण संगृह्यन्त इति कैयटः। अर्थनिबंधनेति। न तु स्वरूपाश्रया। अहमपीदमवोचं चोद्ये इति
तद्राजसूत्रभाष्ये हि विपर्यायस्य चुदेरपि द्विकर्मकत्वदर्शनादिति भावः। तथा च भट्टिः। स्थास्नुं रणे स्मे
रमुखो जगाद मारीचमुच्चैर्वचनं महार्थम्। कालिदासोपि। शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमे ॥राम॥
वार्थमभाषतेव। भारविश्च। उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेंद्र इति। एवं च नाथत्यादयो ॥९३॥
बहवो द्विकर्मका बोध्याः। देशा इति। कुरूपं चालादिरेवेह गृह्यते। तेनाधिशीङ्स्थासामित्यादेर्नवै
यर्थ्यम्। गोदोहमिति। न चेह कालत्वासिद्धिः लोके कालत्वेन प्रसिद्धस्य मासादेरेव ग्रहणात्। तेन
घटमास्त इत्यादि न भवति। यत्तु प्राचोक्तम्। अकर्मकधातुभिर्यो[illegible]देशः कालो [illegible]भावेभ्यो द्वितीयेति के
चित्। नदीमास्त इत्यादि। अत्रेदं वक्तव्यम्। कर्मसंज्ञायामनु[illegible]कर्मणि ल[illegible]नमु[illegible]पास्यते मा

सश इति यथा। केचिदित्यप्यसंगतम्। द्वितीयाया भाष्यसंमतत्वात्। नदीमित्युदाहरणं न संगतम्। ग्रामसमूह
कुर्वीदिरेव देशः। न तु प्रदेशमात्रम्। तेन ग्रामं स्वपितीति न भवतीत्याकरात्। अध्वेति च न्यूनम्। अध्वानं स्व
पितीति प्रसंगात्। अत एवाकरे अध्वा गन्तव्यत्वेन विशेषितः। गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशा
दिरिति च व्याख्यातम्। गतिबुद्धि०। प्रत्यवसानभक्षणम्। शब्दकर्मकाणामिति। शब्दः कर्मकारकं ये
षां तेषामित्यर्थः। न तु हृकर्तरि कर्मव्यतिहार इतिवत्कर्मशब्दः क्रियापरः कृत्रिमकार्यसंप्रत्यया
त्। कर्मग्रहणसामर्थ्याच्च। अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येवावक्ष्यत्। नि
यमार्थं चैतत्सूत्रमिति प्राञ्चः। णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेव कर्तुरिति। तेन
पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात्
तृतीया सिद्ध्यति। उक्तं च। गुणक्रियायां स्वातंत्र्यात्प्रेषणे कर्मतां गतः। नियमात्कर्मसंज्ञायाः स्वधर्मे
णाभिधीयत इति॥१॥ कर्तुः स्वधर्मेण तृतीययेत्यर्थः। ननु णिजर्थं प्रति कर्मत्वं बाधित्वा प्रकृत्यर्थं प्र
ति कर्तृत्वं परत्वादेव सिद्धम्। अंतरंगत्वाच्च। स्वकारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते। हेतुम

तिणिज्विधानात्। कर्त्तृप्रयोजकस्य हेतुत्वात्। अतएवोपजीव्यापि कर्त्तृसंज्ञा॥ एवं च परत्वादंतरंग
त्वादुपजीव्यतयापि च। प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितो विनेति चेत्। अस्त्वेवम्। लक्ष्यस्य निर्बा
धत्वात्। नियमसूत्रमिदमिति ग्रंथानां का गतिरिति चेत्। शृणु। णिजर्थस्य शाब्दं प्राधान्यं पुरस्कृत्य
प्रधानानुरोधिन्याः कर्मसंज्ञायाः प्राबल्यात्। विप्रतिषेध एव नास्ति। अंतरंगोपजीव्यत्वे अपि प्रधा
नं प्रति न प्राबल्यं प्रयोजयत इत्याशयेन ग्रंथानामुक्तिसंभवः। अर्थप्राधान्यपुरस्कारे तु विधायकत्व
मेवोचितमिति ध्येयम्। शत्रून् निति। स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनुकूलो यन्निष्ठो व्यापारः स श्री
हरिर्मे गतिरित्यर्थः। नन्विह कथं स्वर्गस्य कर्मत्वं कर्तुरीप्सिततमं हि कर्म। न च शत्रवः कर्तारः। तेषां
गत्यादिसूत्रेण कर्मत्वादिति चेत्। मैवम्। कर्मसंज्ञायां हि कर्तृग्रहणं स्वतंत्रस्योपलक्षणम्। स्वातं
त्र्यं च धात्वुपात्तव्यापाराश्रयत्वमेव। तच्च प्रयोजकसंनिधानेऽपि प्रयोज्यस्यास्त्येव। न चोपलक्षणत्वे
प्रमाणाभावः। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्। अप्रधाने दुहादीनां इत्युक्त्वा। ण्यंतेक
र्तुश्च कर्मण इति वदतो भाष्यकृत एव तत्र प्रमाणत्वात्। न हि लक्षणां विना णिजंतानां द्विकर्मकता लभ्य

ते। येनण्यंते कर्तुरिति वचनं सावकाशं स्यात्। ननु स्वतंत्रे संकेतितस्य तैर्बलक्षणा कथमिति चेत्। संज्ञांत
रानुपहिते संकेतितस्य तदुपहितसाधारणे स्वतंत्रमात्रे सत्यव धेहि। नीवह्योरिति। यद्यप्यनयोः प्रापण
मर्थो न गतिस्तथापि गतिरपि विशेषणीभूय प्रापणमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिं मत्वा प्रतिषेध उक्त
ः। नियंत्रिति। नियन्ता पशुप्रेरकः। न तु सारथिरेव। तेन वाहयति बलीवर्दान् यवान् इति सिद्ध्यति। अनि
येय इति। प्रयोज्यः कर्मेति वक्तव्यमिति फलितोर्थः। सूत इति। नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सा
रथिः। आदयतीति। अकर्त्रभिप्राये फले शेषात् कर्तरीति परस्मैपदम्। कर्त्रभिप्राये तु णिचश्चेत्यात्मने
पदमेव। तदपवादस्य निगरणचलनार्थेभ्यश्चेत्यस्य अन्तेः प्रतिषेध इति निषिद्धत्वात्। सस्यमिति। क्षेत्र
स्थानां यवानां भक्ष्यमाणानां हिंसा द्रष्टव्या। तस्यामवस्थायां तेषां चेतनत्वात्। स्मारयतीति। यत्तु णेर
णाविति सूत्रे स्मरयत्येनं वनगुल्मः स्वयमेवेत्युदाहृतं तत्र भाष्यप्रयोगादेव कर्मत्वं बोध्यम्। श
ब्दायतेरिति। शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ्। ततो हेतुमणिच्। याचयतीति। एतेन शब्दायय
ति सैनिकैरिपूनिति कर्मप्रयुञ्जानाः परास्ताः। यत्तु प्राचा अयं कंदः शब्दायते अग्नेत्युक्तम्। तत्र अयतेरु

स०सु०

क्तिस्तावन्निर्मूलैव। अकं दद्धेत्रोस्तु शब्दक्रियत्वमात्रेण प्राप्तिसंभावना। वस्तुतस्तु नासौ सूत्रार्थ इत्यु
क्तम्। यदपि श्रुग्रहदृशामिति कर्मत्वमुक्तम्ं तत्र दृशिग्रहणं प्रामाणिकमेव। श्रुणोतेस्तु शब्दकर्मक
त्वात्सिद्धम्। ग्राहेस्तु द्विकर्मत्वं यद्यपि सुधाकरादीनां सम्मतम्। तथापि बहूनामसंमतम्। अत एव अ
जिग्रहत्तं जनको धनुस्तत् इति भट्टिप्रयोगं अजिग्रहद्बोधितवान् इति व्याचख्युः। तथा अयाचिता
रं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेत्यत्र ग्राहयितुं उद्वाह्यत्वेन बोधयितुमिति युक्तं चैत
त्। ग्राहेर्द्विकर्मकत्वे हि जाया प्रतिग्राहिता गंधमाल्यामित्यत्र क्तेन प्रयोज्याया धेनोरभिधानं स्यात्। ॥राम॥
ण्यंते कर्तुश्च कर्मणः इत्युक्तेः। ततश्च जायया गंधमाल्ये प्रतिग्राहितामिति स्यात्। सिद्धांते तु प्रतिग्रा ॥ए३॥
हिते गंधमाल्ये ययेति विग्रहः। जाया निष्ठप्रेरणविषयीभूतं गंधमाल्यकर्मकं यस्याः प्रतिग्रहणं तत्क
र्त्रीमित्यर्थः। अन्यपदार्थान्तर्भाविणेव विशेषणविशेष्यभाववैपरीत्येनैवैकार्थीभावकल्पनात्।
अभिवादिदृशोरिति। अभिवादयतेरप्राप्ते दृशेस्तु प्राप्ते विभाषेयम्। अभि[illegible]नेरल्पाच्तरत्वेन पूर्वनि
पाते कर्तव्ये विपरीतोच्चारणं द्वंद्वासमुदायविवक्षार्थमित्याहुः [illegible] तेन [illegible] निविशतेय

...यानिष्ठ
रणविषयी
...तधेनुक
कग्रहणक
...भूते गंध
...ल्ये।५

186

दिश्भूकत्रिरवापदेइति। क्वचिन्नेति। एष्वर्थेष्वभिनिविष्टानामिति। भाष्यप्रयोगश्चेहमानम्। उपपदविभ
क्तिमाह। उभसर्वतसोरित्यादिना। उभसर्वयोस्तसौ उभसर्वतसौ। तदन्तयोर्योगे द्वितीया कार्येत्यर्थः
। अत्र प्रांचः। उभशब्देनोभयशब्दोलक्ष्यते अन्यथा तसोऽसंभवादित्याहुः। वस्तुतस्तु वृत्तिविषये
अयचूप्रवृत्त्यावपि उभशब्दाद्द्विहितायस्तसूतदन्तमस्त्येवेति यथाश्रुतं साधु। धिगित्यविभक्तिको
निर्देशः। गवित्ययमाहेतिवदिति प्रांचः। तन्न। तथा सति अपदान्ततया दृष्टान्ते लोपः शाकल्यस्येत्यस्ये
वदाष्टौतिके जश्त्वस्यापि अप्रवृत्तिप्रसंगात्। न चायं गकारांत एवेति भ्रमितव्यम्। कस्यचदइति सूत्रे
धकिदित्युदाहरणस्य असंगतिप्रसंगात्। तस्मात् धिगिति विभक्त्यन्तमेव। प्रकृतिवदनुकरणमित्य
तिदेशात्सुपोलुक्। उभयतः कृष्णमिति। कृष्णस्य पार्श्वद्वयेऽपीत्यर्थः। आद्यादित्वात्तसिः षष्ठ्यर्थे द्वि
तीया। एवमुपपदविभक्तौ सर्वत्र बोध्यम्। नाम्नोर्द्विधैव संबंधः सर्ववाक्येष्ववस्थितः। सामानाधिक
रण्येन षष्ठ्या वापिक्व विद्वद्वत्। इति वृद्धोक्तौ षष्ठीग्रहणं तदपवादविभक्तेरप्युपलक्षणम्। द्विधेत्यु

(87)

संबोधनस्य क्रियान्वितत्वात् क्रिय षष्ठ्या वेत्यस्यार्थमादाय वैयधिकरण्याभ्यामित्युक्तम्॥ संबोधने चेति
यैवधिकोन तु तेनापीति भावः॥ याविहितत्वा

म०सु० क्रिः सामानाधिकरण्यवैयधिकरण्याभ्यां निर्वाह्या। षष्ठी तदपवादयोरेककोटितया वा। धिक्कृ
त्लाभक्तमिति। तस्य निंद्यत इत्यर्थः। कथं धिङ्मूर्खेति। संबोधनपदस्य क्रियान्वय इति प्रागेवोक्त
तया धिकृशब्दप्रयोगाभावात् क्रियापदं च क्वचिच्छ्रुतं क्वचिदाक्षिप्तमित्यन्यदेतत्। तथा च मूर्ख
संबोध्यकं निषिद्धाचरणादि निंद्यमिति वाक्यार्थः॥ एतेन हा तात हा देवि धीराम वेत्यादि व्याख्या
तम्। यत्त्वाहुः। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति संबोधने प्रथमैव भवति। संबो ॥
धनपदस्य कर्तृकारकवाचित्वादिति। तन्मंदम्। संबोधनपदस्य कर्तृकारकत्वेनोक्तिसंभवा ॥
भावात्। देव प्रसीदेत्यादौ वस्तुगत्या देव एव कर्तेति चेत्। नैतावता कारकविभक्तिर्बलं लभ्यते।
किं च। देव त्वां भजे त्वां भजंतीत्यादौ संबोध्यस्य वास्तवमपि न कर्तृत्वमित्यास्तां तावत्। उपर्युपरी
ति। कथं तर्हि उपर्युपरि बुद्धीनां चरंतीश्वरबुद्धयः। उच्यते। उपरि बुद्धीनां उत्तानबुद्धीनां उपरि श्च
रंतीत्यर्थः। एवं चाम्रेडितत्वाभावान्न द्वितीया। यद्वा। प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति

(१४४)

वृक्षो लक्षणं द्योतनं लक्ष्यम् ५ क्रियायोगित्वे बुभुक्षितयोगासंभवात् ततो द्वितीयाऽपि न स्यात् २

कृतस्य द्वित्वस्यात्र ग्रहणम्। तेन वीप्सायां द्विर्वचने सति नास्य प्रवृत्तिः। अन्यत्रापि दृश्यत इत्युक्तं तद्द
र्शयति। अभितः परित इति। प्रतिभातीति। एष प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः न तु कर्मप्रवचनी
यः। अन्तरा त्वां मामिति। तव मम च मध्ये इत्यर्थः। सामर्थ्याक्षिप्तेति। अत एव हेतुत्वपर्यन्तमपि शब्दबोधे वि
षय इति स्वीक्रियत इति भावः। नदीमन्विति। द्वितीयायाः संबन्धोऽर्थः। स चेह साहित्यरूप इति अनुनाद्यो
त्यते। लक्षणेत्थम्०। वृक्षं प्रतीति। वृक्षसंबन्धि द्योतनमर्थः। संबन्धश्च लक्ष्यलक्षणभाव इति प्रत्याद
यो द्योतयन्ति। भक्तो विष्णुं प्रतीति। विष्णोर्भक्तेश्च विषयविषयिभावः प्रत्याद्योत्यः। लक्ष्मीरिति। लक्ष्मी
रूपस्य भागस्य हरिणा सह स्वस्वामिभावः। वृक्षं वृक्षमिति। इह वीप्सा द्विर्वचनेनैव द्योत्यते। परिशि
ष्टस्तु क्रियया संबध्यते। कर्मणि द्वितीया। कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् षत्वं न। एतद
र्थमेव लक्षणादयो विषयतयोपात्ता इति व्याख्यातमाकरे। पंचम्यपाङ्परिभिरिति तु न भवति। वर्जना
र्थेनापेत्यनेन साहचर्यात्। ममाभिष्यादिति। मम भागः स्यादित्यर्थः। मामभिष्यादित्यपि प्राञ्चः प्रत्युदाह
रन्ति। तत्र मां प्राप्नुयादित्यर्थः। उपसर्गवशेन अस्तेः सकर्मकत्वान्मामिति द्वितीया। अत्र च मम भाग इत्यर्थे

यतो लक्षणादयो द्योत्या न भवे[illegible] वीप्सायां [illegible]र्वचनद्योत त्वात् ४

अनुवर्त्ततेइति फलितोऽर्थः पूर्वसूत्रस्थत्वात्॥२

म० सु० तत्पर्यवसानात्। अभागे इति कर्मप्रवचनीये निषिद्धे उपसर्गप्रादुर्भ्यामिति षत्वम्। पूजायां चेति। सुः पूजायामिति पूर्वसूत्रात्पूजाग्रहणमनुकृष्यते। कालाध्वनोः। अन्तं विरामं अतिक्रान्तो अत्यन्तः। संवासो संयोगश्च निरन्तरसन्निकर्ष इत्यर्थः। द्वितीयास्यादिति। श्रुतत्वात्कालाध्ववृत्तिभ्यामेव। मासस्येति। कृत्वोऽर्थप्रयोगे कालेऽधिकरण इति षष्ठीत्याहुः। तन्न। तत्र शेषग्रहणानुवृत्त्या द्विरह्नो भोजनमिति कृदन्तेन सह समासनिवृत्तेरेव फलत्वात्। तस्मादिह षष्ठी शेष इति सूत्रेणैव षष्ठीति तत्त्वम्॥ ॥इति द्वितीया॥ ॥स्वतंत्रः कर्त्ता। प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं स्वातंत्र्यम्। आस्तां धातुनोक्तक्रिये ॥रा नित्यं कारके कर्तृतेष्यत इति। साधकतमं करणम्। प्रकृष्टेति। यद्व्यापारानन्तरं क्रियानिष्पत्तिस्तत्प्रकृष्टम्। उक्तं च। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतमिति। ॥पु विवक्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीति ध्वनयति। आस्तां वस्तुतस्तदनीदृश्यं न हि वस्तु व्यवस्थितम्। स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति॥१॥ अयं भावः। कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कं च वस्तुविशेषे विशेषणविशेष्यभाववन्न व्यवतिष्ठते। न हि

समानाधिकरणे दृष्टा नोऽयं विशेषणविशेष्यभाववदिति।१

गोः सर्वं प्रति गोरेव न तु कं चित्प्रत्ययगोरिति वद्विशेषणं विशेषणमेवेति सुवचनम्। तथा च कया चिद्धातुव्यक्त्या उपस्थापितेऽर्थे किं कर्त्रादिकमिति प्रश्ने पक्तव्यं तत्तुपात्त व्यापाराश्रयतया विवक्षितः कर्त्ता। व्यापारव्यधिकरणफलाश्रयः कर्म कर्तृकर्मद्वारक संबधेनाश्रयोऽधिकरणम्। पचधात्वर्थव्यापारश्चानेकधा। एवं च पचेरधिश्रयणतंडुलावपनैधोऽपकर्षणादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्त्ता। ज्वलनतात्पर्यकत्वे एधाः कर्त्तारः। तंडुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागादिपरत्वे तंडुलाः कर्त्तारः। स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयोऽपि स्थाली करणमेव न तु कर्त्री। देवदत्तादिव्यापारस्यैव तद्धातूपात्तत्वात्। तथा आदिखादिभ्यामुपात्तेऽर्थे प्रयोज्यः कर्त्ता तस्मिन्नेवार्थे भक्षयतिनोपात्ते कर्म। अधिपूर्वैः शीङादिभिरुपात्तेऽर्थे आधारः कर्म। केवलैरुपात्ते अधिकरणमित्यादि। एतेन ज्ञानस्य स्वप्रकाशकत्वे कर्तृकर्मविरोध इत्यादि परास्तम्। शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादौ उक्तिसंभवाभावात्।

आदयति बदुना इति।३

घटस्येव ज्ञानस्यापि विषयत्वे २

कर्मत्वाभिमतापेक्षया परत्वम्॰ कर्त्तर्यतिव्याप्तिवारणार्थं परपदम्॰१

न॰सु॰

एतेन परसमवेतक्रियाफलशालित्वं कर्मत्वं चेत्॰ अपादानेऽतिव्याप्तिरित्याशंक्य धात्वर्थतावच्छेदकफलशालित्वं तदिति परिष्कुर्वन्तोऽपि प्रत्युक्ताः। ग्रामं गमयति देवदत्तमित्यादौ गन्तरि अव्याप्तेः। तन्मते गमनस्य प्रकृत्यर्थत्वेऽपि तथात्वानवच्छेदकत्वात्। तत्त्वे वा पापाद्वयतीत्यादिप्रयोज्यकर्त्तर्यतिव्याप्तेः। तत्र पारिभाषिकमनुशासनोपयोगि कर्मत्वं वचनबलाद्व्यवस्थितमिति चेत्॰ अपादानेऽपि तर्हि तन्नास्तीत्यवधेहि। एकसंज्ञाधिकारे अनवकाशया सावकाशाया बाधात्। अत एव ।।राम

ऽत्मानमात्मा हन्तीत्यादौ परया कर्त्तृसंज्ञया कर्मसंज्ञा बाधमाशंक्याहंकारादिविशिष्टात्मभेद ।।५६

माश्रित्य समाहितं भाष्ये। रामेणेति। इह यद्यपि विभक्त्युपस्थितानां कारकाणां क्रियां प्रति विशेषणतैव तथापि कृदुपस्थितानां विशेष्यतैव। सत्वप्रधानानि नामानीत्युक्तेः। धातूपस्थाप्ययोः फलव्यापारयोरपि कर्मकृत्समभिव्याहारे विशेषणविशेष्यभावव्यत्यासः। तथा च रामनिष्ठो यो व्यापारस्तद्विषयीभूतबाणव्यापारसाध्यप्राणवियोगाश्रयो वालीति बोध्यार्थः। यत्तु वाजपेयाधि

(192)

करणेमीमांसकैरुक्तं काष्ठैःपाकइत्यपिस्यादितितदिष्टापत्तिग्रस्तम्।कर्तृ[illegible]णाक्कृताबहुलंकर्तृ
करणयोःकृतीत्यादिसूत्राणां।कृत्यत्रकृत्यर्थेनकारकान्वयंविनाउक्तिसंभवस्यैवाभावादितिसुधी
भिराकलनीयम्।अनभिहितेकिम्।हरिःकरोति।जीवंत्यनेनजीवनः।शा।छिकः।शाब्ददर्दुरंकरोती
तिठक्।कृतंविघ्नंयेनकृतविघ्नः।विघ्नकर्मककृत्याश्रयइत्यर्थः।अषष्ठ्यर्थबहुव्रीहौव्युत्पत्त्यन्त
रस्वीकारात्।यथाचैतत्तथावक्ष्यते।घञ्कृत्यादिभ्यइति।आकृतिगणोऽयम्।नाम्नसुतीक्ष्णाश्चरि
तेनदान्नइत्यादिबोध्यम्।द्वयोर्द्रोणयोःसमाहारःद्विद्रोणम्।पात्रादित्वात्स्त्रीत्वाभावः।द्रोणद्वयसं
बंधिधान्यमित्यर्थः।वादिति।करणसंज्ञानुवृत्त्यापरिक्रयणेसंप्रदानमित्युत्तरसूत्रस्थान्यतरस्यां
ग्रहणापकर्षणेनवासंज्ञयोःपर्यायेलब्धेसमावेशार्थश्चकारः।तेनमनसादीव्यतीतिमनसादेवइ
त्यत्रकर्मण्यण्।करणेतृतीयाचेत्युभयंसिध्यति।मनसःसंज्ञायामित्यलुक्।किंच।अक्षैर्दैवय
तेयज्ञदत्तेनेत्यत्रसकर्मकत्वादणिकर्तुर्णौकर्मत्वंन।अणावकर्मकादितिपरस्मैपदंचनेतिसि

त्या१

थे३

ह्यान्तः। यत्तु प्राचा कर्मसंज्ञं वा स्यादिति व्याख्यातम्० तदाकरविरोधादुपेक्ष्यम्। स्यादेतत्। करणसंज्ञाया
अवकाशः देवनाअक्षाः। करणे ल्युट्। कर्मसंज्ञायास्तु दीव्यंतेऽक्षाः। कर्मणि लट्। अक्षैर्दीव्यती
त्यत्र तु संज्ञाद्वयप्रयुक्तकार्यद्वयप्रसंगे परत्वात्तृतीयैव स्यात् न तु द्वितीयेति चेत्० अत्राहुः। कार्यका
लपक्षे कर्मणि द्वितीयेत्यत्र यदस्योपस्थानं तस्यानवकाशत्वात् द्वितीयेति। ननु दीव्यन्तेऽक्षा इत्य
त्र कर्मण्यभिहितेऽपि करणत्वस्यानभिधानात्तृतीया स्यात्। तथा देवना अक्षा इत्यत्र ल्युटा क
रणस्याभिधानेऽपि कर्मणोऽनभिधानात् द्वितीया स्यात्। मैवम्। एकैव ह्यत्र शक्तिः संज्ञाद्वययोगि
नी तथा च उभयत्राप्यभिधानमेव नत्वनभिहितत्वम्। सहयुक्ते। पुत्रेणेति। पितुरत्र क्रियासंबंधः
शाब्दः पुत्रस्य तु आर्थ इति तस्याप्राधान्यम्। अप्रधानग्रहणं शक्यमकर्तुम्। न चैवं पितुरपि तृ
तीयाऽपत्तिः। तत्र प्रातिपदिकार्थमात्रे अन्तरंगत्वात्प्रथमोपपत्तेः। पितुरागमनमित्यादौ कारकवि
भक्तेः प्राबल्याच्च। येनांगविकारः। अंगशब्दः अर्शआद्यजंतः तदाह अंगिन इति। येनेति सर्वनाम्ना

शक्यमकर्तुमित्य का०१
न हेतिरमेतत्०१

।।रा
।।ए

प्रकृत्यैर्थ भूतोऽवयवए वगृह्यते॰ सन्निधानात्। सचार्थादिकृत एवान्यविकृतेनावयवेनशरीरस्य
विकारः संभवति। तदेतदाह्य येनांगेन विकृतेनेति। संजानीत इति। संप्रति भ्यामना ध्यान इति तत्सू कृ
द्योगेपरत्वात्षष्ठी। पितुः संज्ञाता। यत्तु हरदत्तेनोक्तम् ॰ आध्याने परत्वाद धीगर्थेति षष्ठी। तन्न। तत्र
शेषाधिकारात्। द्रव्यादीति। उक्तं च। द्रव्यादि विषयो हेतुः कारकं नियत क्रियमिति। अनाश्रिते
तु व्यापारे निमित्तं हेतुरिष्यत इति। फलमपीति। एतच्च प्रत्यय इति सूत्रे कैय्यटे स्पष्टम्। एवं च
तादर्थ्य चतुर्थ्या सहेयं तृतीया विकल्पते। अध्ययनाय वसति। अयं तु विशेषः। अध्ययन
स्यफलेन सहाभेदः संसर्गः। उपकारकत्वेन सह तु निरूपकतेति॰ गम्यमानेति। ननु श्रूयमा
णेव इत्याग्रह इति भावः। साधनेति। साध्यमित्यत्र प्रकृति भागस्यार्थं प्रतीति भावः। माचाप
लायेति गणानूव्यनैषीदित्यत्र तु यतध्रुमिति शेषः। अशिष्टेति। एतच्च दाणश्चसा चेच्चतुर्थ्यर्थे
अध्ययनेन वसतीति वाक्ये अध्ययनरूपंयत् फलं तत्साधनं वासः। अध्ययनाय वसतीत्यत्र तु अध्ययनोपकारकं वनमित्यर्थादध्य
नस्योपकारकत्वेन सह निरूपकता संसर्गमर्यादया प्रतीयते। २

म०स्तु०

इत्यनेनज्ञाप्यते॥ ॥इतितृतीया॥ ॥अन्वर्थसंज्ञाबलेनाहदानस्येति।तेनअजांनयतिग्रामम्।हस्तंनिद
धातिवृक्षेइत्यादौनातिप्रसंगइतिभावः।दानंचअपुनर्ग्रहणायस्वत्वनिवृत्तिपूर्वकंपरस्वत्वापादनम्
अतएवरजकस्यवस्त्रंददातीत्यादौनभवति।तत्रहिददातिर्भाक्तः।एतच्चवृत्तिमतम्।भाष्यमतेतुना
न्वर्थतायामाग्रहः।खंडिकोपाध्यायस्तस्मैचपेटांददातीतिप्रयोगात्।रजकस्यददातीतितुशे
षत्वविवक्षायांबोध्यम्।नचैवमजांनयतिग्राममित्यत्रापिप्रसंगः।यमभिप्रैतीत्युक्त्याक्रियमिति ।।र
निर्दिष्टस्यशेषित्वंकर्मणश्चशेषत्वंलभ्यते।ग्रामस्यचअजांप्रतिशेषित्वंनास्ति।दानीयइति।बा ।।ए
हुलकात्संप्रदानेअनीयर्।रुच्यर्थानांप्रीयमाणः।प्रीञ्तर्पणे।अस्माकर्मणिलट्।हरयेरो
चतेइति।हरिंप्रीणयतीत्यर्थः।कर्मसंज्ञायांप्राप्तायांवचनम्।प्रीयमाणः।किम्।देवदत्तायरोचते
मोदकःपथि।अत्रपथेमाभूत्।श्लाघह्नुङ्।श्लाघास्तुतिः।कृष्णायश्लाघते।कृष्णंस्तौतीत्यर्थः।

अन्येत्वाहुः। ह्नुलायात्मानंपरंवाश्लाघ्यंकथयतीत्यर्थइति। तत्राऽऽद्यपक्षेकर्मत्वेप्राप्तेद्वितीये
तुकारकशेषत्वात्षष्ठ्यांप्राप्तायांवचनम्। ह्नुतइति। सपत्नीभ्यःह्नुतेनुवानात्मेवार्थंह्नुते
बोधयतीत्यर्थः। यस्यकस्यचित्ह्नुतिमितिवा। तिष्ठतइति। स्थित्यास्वाभिप्रायंबोधयतीत्य
र्थः। प्रकाशनस्थेयाख्ययोरितितङ्। धारेरुत्तमर्णः। षष्ठ्यांप्राप्तायांवचनम्। स्पृहेरीप्सितः
परत्वादिति। तेनपरस्परेणस्पृहणीयशोभंस्पृहणीयगुणैर्महात्मभिः। इत्यादिसिद्धम्
। यद्वातुशेषत्वविवक्षातदाषष्ठी। तेनकुमार्यइवकान्तस्यत्रस्यन्तिस्पृहयन्तिचेतिसिद्धम्।
एतच्चसर्वंहरदत्तादिरीत्योक्तम्। वाक्यपदीयहेलाराजीयग्रंथयोस्तुस्पृहयतियोगेक
र्मसंज्ञायाःशेषषष्ठ्याश्चबाधिकेयंसंप्रदानसंज्ञेतिस्थितम्। तन्मतेस्पृहणीयमित्यत्र
दानीयइतिवत्संप्रदानेकृत्यः। कुमार्यइवेत्यत्रतुविभक्तिविपरिणामेनकान्तायस्पृहयन्ती

शोभाइत्यस्यकर्मत्वात्कर्मणिअनीयर्संप्रदानेतुनस्यात्। एवंस्पृ
यगुणैरित्यत्रापि। ५

म०सु०

तिव्याख्येयम्॥ क्रुधद्रुह॰। क्रुध कोपे। द्रुह द्रोहे। ईर्ष्य ईर्ष्यायाम्। असूयति कंड्वादियगंतः। एषामर्थ
एवार्थो येषां धातूनामित्यर्थः। तत्र क्रोधोऽमर्षः। द्रोहोऽपकारः। ईर्ष्या असहनम्। असूया गुणेषु
दोषारोपः। क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठी प्राप्ता। अंत्ययोः सकर्मकत्वात् द्वितीया प्राप्ता। रा
धीक्ष्योः। कारकमिति। कर्मकारकमिति तु प्राचः प्रमादः। एकसंज्ञाधिकारात्। नवप्राथमि
कप्राप्तिमात्राभिप्रायेण कर्मत्वव्यपदेशः। कृष्णसंबंधि शुभाशुभं पर्यालोचयतीत्यर्थाभ्युप ॥राम
गमेन षष्ठ्या एव प्राप्तेः। अनुप्रतिगृणश्च इति। आत्तस्यानुकरणात् षष्ठी। होत्रे इति। कर्मत्वे प्राप्ते। ॥एणु
परिक्रयणे॰। क्रयो धनाद्यर्पणेनाऽत्यंतिकस्वीकरणम्। तस्य समीपं परिशब्दाचष्टे। तच्च नि
यतकालम्। ततो न्यूनत्वादिति व्याचष्टे। नियतेति। भृत्या वेतनादिना। तादर्थ्ये इति। तस्मै कार्या
येदं तदर्थं कारणम्। तस्य भावस्तादर्थ्यम्। षष्ठ्या उपकारकत्व[illegible]प्रतीयते। क

अस्वपदविग्रहोऽयम्।७

प्रकृतिर्भक्तिर्विकृतिर्ज्ञानं तयोर्भेद इत्य

त्तद्धितसमासेभ्यः संबंधाभिधाने भावप्रत्ययेनेति सिद्धान्तात् । उपकारकं चैवं च अनेकधा । तेन ब्राह्म
णायदधीत्यादावपि भवति । भक्तिर्ज्ञानायेति । ज्ञानात्मना परिणमत इत्यर्थः । प्रकृतिविकृत्योर्भेद
विवक्षायां विकृतिवाचकाच्चतुर्थी । अभेदविवक्षायां तु परत्वात्प्रथमैव । भक्तिर्ज्ञानं कल्पत इति
। यदा तु जनिकर्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदा ज्ञानस्याभिहितकर्तृत्वात्प्रथमैव । भक्तेर्ज्ञानं
कल्पते । क्लृपीत्यर्थग्रहणमित्याशयेनाह संपद्यत इत्यादि । प्राणिनां शुभाशुभसूचको भूतवि
कार उत्पातः । तेन ज्ञापिते ऽर्थे वर्त्तमानाच्चतुर्थीत्यर्थः । वातायेति । वातस्य ज्ञापिकेत्यर्थः । हितेति
। समासविधानाज्ज्ञापकादिति भावः । एवं सुखयोगे ऽपि बोध्यम् । तुमुण्वुलौ क्रियायामिति
सूत्रमहिम्ना क्रियार्थकमुपपदं क्रियावाच्येव फलतीत्याशयेनाह क्रियेति । क्रियाफल
कक्रियावाचकप्रकृतिकमित्यर्थः । तुमुन इति । ण्वुलो ऽप्युपलक्षणम् । फलेभ्यो यातीत्यस्य फ
लान्याहारक इत्यपि विवरणे बाधकाभावात् । कर्मणीति । तथा च द्वितीयापवादो ऽयमिति भा

म०सु०

वः।यत्तुप्राचाव्याख्यातम्।अप्रयुज्यमानस्यैवकर्मणियथास्यात्।प्रयुज्यमानस्यमाभूदितिनिय
मार्थंसूत्रमितितन्न।अप्राप्तस्यनियमायोगात्।नचतादर्थ्यइतिप्राप्तिः।नहिफलार्थायानक्रिया
किंत्वाहरणार्था।आहरणंतुफलकर्मकमित्यन्यदेतत्।तुमुनोभावएवविधानात्तदर्थस्यभा
ववचनत्वेसिद्धेपुनर्भाववचनग्रहणंसूत्रविशेषपरिग्रहार्थमित्याहइतिसूत्रेणेति।नचता
दर्थ्यइत्येवगतार्थताशंक्या।भाववचनेनैवतुमुनेवतादर्थ्यस्यद्योतितत्वात्प्रातिपदिकार्थमा ।।राम।
त्रेप्रथमाप्रसंगात्।यत्तुप्राचोक्तंस्।भाववचनादेवयथास्यात्।पाचकोव्रजतीतिण्वुलंतान्मा ।।१००
भूदितिनियमार्थमिदंसूत्रमिति।तन्न।ण्वुलंतेकर्तुःप्राधान्यात्।कर्तारंप्रतितादर्थ्याभावात्
।गुणीभूतपाकस्यचविभक्त्यर्थानन्वयात्।ननुषष्ठ्यपीतिकुतः।षष्ठ्येवास्तु।अलंशब्दस्तुपर्या
प्तीतरार्थकएवग्रह्यतामित्याशंक्याहतस्मैप्रभवतीति।नत्वांतृणमित्यादि।ननुतृणादिवद्बु
षब्बह्वादपिपक्षेचतुर्थ्याभाव्यम्।मैवम्।अनादरइतिहिकर्मणोविशेषणम्।अनादरद्योतकं
नहिव्रजनंपाकार्थम्।

(200)

यत्कर्मेतितादृशंवत्तणमेवनतुयुष्मदर्थः॥ ॥इतिचतुर्थी॥ ॥ध्रुवमितिगतिस्थैर्ययोः॥ अस्मात्कु
टादेः पचाद्यच्। ध्रुवस्थैर्ये इतिपाठेतु इगुपधलक्षणः कः। ध्रुवंस्थिरम्। प्रकृतधात्वुपात्तगत्य
नाविष्टत्वेसतितज्जन्यविभागाश्रयत्वंतत्त्वार्थादवधिरेवइत्याह अवधिभूतमिति। धावतइति। इ
हक्रियाविशिष्टस्याप्यश्वस्यप्रकृतधात्वुपात्तक्रियांप्रत्यवधित्वंनविरुध्यते। परस्परस्मा
न्मेषावपसरतइत्यत्रतुधातुनागतिद्वयस्याप्युपादानात्एकनिष्ठांगतिंप्रतिइतरस्यापाद
नत्वंनविरुध्यते। उक्तंच। अपायेयदुदासीनंचलंवायदिवाऽचलम्। ध्रुवमेवातदावेशात्तदपा
दानमुच्यते॥१॥ पततोध्रुवएवाश्वोयस्माद्श्वात्पतत्यसौ। तस्याप्यश्वस्यपतनेकुड्यादिध्रुव
मिष्यते॥२॥ मेषान्तरक्रियापेक्षमवधित्वंपृथक्पृथक्। मेषयोःस्वक्रियाऽपेक्षंकर्तृत्वंचपृ
थक्पृथगिति॥३॥ पर्वतात्पततोऽश्वात्पततीत्यत्रतुपर्वतावधिकपतनाश्रयोऽश्वस्तदव
धिकंदेवदत्तादिनिष्ठंपतनमर्थः। पंचम्यर्थोऽवधौअभेदेनसंसर्गेणप्रकृत्यर्थोविशेषणम्।

कर्तृर्यतिव्या
प्तिवारणाय
सत्यन्तम्। ता
वत्युक्तौग्रामे
ऽव्याप्तिस्तदर्थं
सर्वम्। २

धावतिरह्नि
।

अपादानम्ः नतु अपादानत्वम्।१ प्राप्तं उदकं यमित्यादेः।१

म०सु०

प्रत्ययार्थस्तु क्रियायाम्। स च धर्मी न तु धर्ममात्रम्। विभक्त्यर्थे विहितस्य वकुव्रीहेर्धर्मिपरतायां नि
र्विवादत्वात्। उद्धृतौदनास्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूतेत्यर्थः। जुगुप्सेति। भाष्य
कारस्तु ० जुगुप्सादीनां तत्पूर्वकनिवृत्तिलक्षकतामाश्रित्य सूत्रेण सिद्धिमाहुः। एवमुत्तरसूत्रे
ष्वपि। भीत्रा०। कथं तर्हि कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे इति रामायणम्। अत्राहुः। क
स्य संयुगे इति ० न त्वेवं संयुगस्यैवापादानसंज्ञापत्तिः। परया अधिकरणसंज्ञया बाधात्। अधि
करणत्वाविवक्षायां विष्टापत्तेः। अध्ययनादिति। अध्ययनसंबंधिनी ग्लानिरित्यर्थः। जनि
कर्तुः। जननं जनिः। उत्पत्तिः। इन्नजादिभ्य इति जनेर्भावे इञ्। जनिघसिभ्यामिण् इत्युणादिसू
त्रेण इण् वा। जनिवध्योश्चेति वृद्धिप्रतिषेधः। तस्याः कर्तेति शेषषष्ठ्यासमासः। तथा च धात्वन्त
रयोगेऽपि भवति। अंगादंगात्संभवसीति यथा तदेतदाहु जायमानस्येति। एतेन इकुश्तिपौ
धातुनिर्देश इति इका निर्देशोऽयमित्याश्रित्य गमहनेत्युपधालोपप्रसंगमर्थासंगतिं समा

नहि धातुं प्रति कर्तृत्वम्। किंतु तद्वाच्यानि यां प्रति।१

॥राम॥१०१

सानुपपत्तिं वोद्भावयंतो मीमांसावार्त्तिककाराः समाहिता इति भावः। इह सूत्रे प्रकृतिग्रहणं हेतुमात्रपर मिति वृत्तिकृन्मतम्। पुत्रात्प्रमोदो जायत इत्युदाहरणात्। उपादानमात्रमिति तु भाष्यकैयटमतम्। यदु भयंसाधारणमुदाहरणमाह ब्रह्मण इति। ब्रह्मा हिरण्यगर्भः सर्वहेतुरेव न तूपादानम्। किंच। ब्रह्म मायाशबलं तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः। भुवः। भवनं भूरिति संपदादित्वाक्षावे क्विप्। पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्त्तते स्वरितत्वादित्याह भूकर्तुरिति। प्रभवत्य स्मादिति प्रभवः। ल्यब्लोप इति। ल्यबंतस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः। यतश्चेति। यदवधित्वे नाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते तत इत्यर्थः। तेन पंचम्यंतार्थेनार्थद्वारा यु क्तान्निर्मीयमाणाध्ववाचिनः प्रथमासप्तम्योस्तः। कालादिति। तद्युक्तादित्यपेक्ष्यते। प्रपंचार्थमि ति। नन्व इतरस्त्वन्यनीचयोरित्यमरोक्तेर्नीचार्थकस्येदं ग्रहणमिति वाच्यम्। अस्मान्नारो मंदो वे त्यादाविव पंचमी विभक्त इत्यनेनैव सिद्धत्वात्। यत्तु इतर इति निर्दिश्यमानप्रतियोगिक एव प्रयुज्य

नारः उ
नीच

फल्गुति २ इतरः कातर इति वदन्यः कातर इत्यपि वकुशाक्यत्वात्।१

म॰ सु॰

ते। तद्यथा। चैत्रः शूरः इतरः कातर इति। अतो नायमन्यार्थ इति तन्मंदम्। प्रतियोग्याकांक्षायाः उभयत्र तुल्य
त्वात्। उदाहृतकोशविरोधाच्च। ऋते कृष्णादिति। कथं तर्हि पुरुषाराधनमृते इति। प्रमादोऽयमित्येके। अ
न्ये तु उभसर्वतसोरित्यत्र द्वितीयग्रहणाच्चैवं यावच्चीतमित्यादावविवक्षते योगे द्वितीयापि साधुरित्या
हुः। युक्तं चैतत्। ऋते द्वितीया चेति चांद्रसूत्रात्। प्रभृतियोग इति। ~~वचनग्रहणसामर्थ्या~~ प्रभृत्यर्थे
योग इत्यर्थः। तथा च कार्त्तिक्याः प्रभृतीति भाष्यं विवृण्वन् कैयटः प्रायुंक्त। तत आरभ्येत्यर्थ इति। ।।राम।
वचनग्रहणादिति। वचनग्रहणसामर्थ्यादवधिमात्रं विवक्ष्यते। तेन विनेति विशेषणं शास्तुनेतिभा ।।१०२।
वः। यद्वा। मर्यादेति शब्द उच्यते। स्मिंस्तु मर्यादावचनं आ। आङ् मर्यादाभिविध्योरिति सूत्रम्। तत्र य
आङ् दृष्टः स उक्तसंज्ञ इत्यर्थः। परिहरेति। परेर्वर्जने वा वचनमिति वार्त्तिकात् पक्षे द्विर्वचनाभा
वः। परिरत्रेति। अत्र पंचमी विधौ वर्जनार्थेन अपेन साहचर्यादिभावः। प्रतिनिधिप्रतिदाने। अस्मा
देव निर्देशादाभ्यां योगे पंचमीत्याहुः। मुख्यस्याभावे तत्सदृश उपादीयते स प्रतिनिधिः। दत्तस्य

203

प्रतिनिर्यातनं प्रतिदानम्। अकर्त्तरि पंचमी स्यादिति। तृतीयापवादोऽयम्। शतेनेति। शतमिह उत्तमर्णाय धार्यमाणत्वादृणम्। तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञं च। योगविभागादिति। एतच्च हेतुमनुष्येभ्य इति सूत्रे हरदत्तग्रंथे स्पष्टम्। स्त्रियां चेति। बाहुलकं प्रकृतेस्तनुदृष्टेरिति वार्त्तिकनिर्देशोऽपीह ज्ञापकः। पृथग्विना। समुच्चयार्थमिति। निपातानामनेकार्थत्वादिति भावः। पंचमीति। तत्र मंडूकप्लुत्या पंचमी। द्वितीया तु सन्निहितैव। दूरं दूरात् दूरेणवेति। इह सप्तम्यपि वक्ष्यते। किंच। दूरांतिकार्थेभ्य इति सूत्रस्योत्तरत्राप्यनुवर्त्तमानादधिकरणेऽप्येभ्यो विभक्तिचतुष्टयं बोध्यम्। तथा च प्रयुज्यते। दूरादावसथान्मूत्रमिति। आवसथस्य दूर इत्यर्थः। असत्वेति

प्रातिपदिकार्थोऽस्तित्वदर्थः॥

। सत्ववचनत्वं वर्तद्विशेषकत्वम्। एवं च सामानाधिकरण्येन प्रातिपदिकार्थविशेषकं व्युदस्यते तदाह दूरः पंथा इति। एते करणे च स्तोकेति सूत्रे। करणे किम्। क्रियाविशेषणे कर्मणि मा भूत्। स्तोकं चलति। क्रिया न द्रव्यमिति प्राचां ग्रंथोऽपि व्याख्यातः। यत्तु तमन्तरा क्रियाया विशेष

असत्त्वं तदर्थः। २ तथाऽयं न इति व्यधिकरणे दृष्टान्तः। २

म० सु०

त्वेन द्रव्यत्वावश्यंभावाच्चिंत्यमित्यूचुस्तदेव चिन्त्यम्। धातुवाच्यायाः क्रियाया असत्त्वरूपत्वस्या
करे प्रसिद्धत्वात्। न च विशेष्यत्वे तदनुपपत्तिः। कृदभिहित भाववद्‍ लिंगसंख्याद्ययोगित्वमात्रेण
तदुपपत्तेः। यद्यपि हस्तत्राायिकाः शय्यन्त इत्यादौ भाष्ये संख्यान्वयः स्वीकृतः। पचति भवतीत्या
दौ कर्तृकर्मत्वान्वयश्च तथाऽपि लिंगस्य कारकान्तरस्य वा भावो निर्बाध एव। क्रियान्युज्य

कर्मकर्त्रादि क्रियाऽधारो तद्भिन्नाधिकरणादीनि तैर्लिंगैश्च न युज्यते। ५

ते लिंगक्रियाधारकारकैः। असत्त्वरूपतातस्याऽयमेवावधार्यताम्॥ १॥ ॥ इति पंचमी॥ ॥ रा
राज्ञः पुरुष इति। प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्याद् अप्रधानादेव षष्ठी तदर्थश्च पुरुषे वि ॥ १०
शेषणम्। प्रधानात्तु न षष्ठी। उक्तन्यायविरोधात्। शेषत्वाभावाच्च। पुरुष शब्दो हि यथा
यथं प्रातिपदिकार्थमात्रवृत्तिः। कारकार्थको वा। यदा तु नैवं तदा पुरुषशब्दादपि षष्ठी
भवत्येव। यत्तु अप्रधानं शेष इति तन्न। प्रातिपदिकार्थमात्रे प्रयुक्तो घट इत्यादौ विशेषणे
षष्ठी प्रसंगात्। न च प्रथमया बाधः तस्याः प्राधान्येन विवक्षितार्थत्वात्। कर्मादीनामपीति। यथा

संबंधस्य राजार्थं प्रति ५ प्रकृत्यर्थस्यैव प्रत्ययार्थं प्रति प्राधान्यापत्तेरित्यर्थः। ४

विशेषाविवक्षायां रूपवानिति तद्विवक्षायां तु नीलः पीत इत्यादि प्रयुज्यते तथेदमपि न्यायसिद्ध
मिति भावः। सतामिति। एवं च नपुंसके भावे क्तस्य योगे शेषविवक्षायां चेति तृच्यर्थानां करणे ष
ष्ठी वेति च प्राचां ग्रंथे पठ्यमानं नापूर्ववचनमिति भावः। सर्पिष इति। ज्ञो विदर्थस्य करणे। अधी
गर्थदयेशां कर्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानामज्वरेः। आशिषि नाथः। जासि
निप्रहणनाटक्राथपिषां हिंसायाम्। व्यवहृपणोः समर्थयोः। कृत्वोऽर्थप्रयोगे कालेऽधिक
रणे। इत्यष्टसूत्री तु नेह व्याख्याता। तस्याः समासनिवृत्तिफलकत्वात्। तथाहि। तत्र शेष इ
त्यनुवर्तते। शेषत्वेन विवक्षितेष्वकरणादौ षष्ठी सिद्धैव। तदयमर्थः। इह षष्ठ्येव न तु तल्लुक्।
तथा च लुकः प्रयोजकीभूतः समास एव नेति। तथा च वार्त्तिकम्। प्रतिपदविधाना चेत्यादि
। हरिश्चाह। कारकैर्व्यपदिष्टेषु श्रूयमाणक्रियेषु नः। प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्त
ये इति ॥१॥ तेन शेषत्वविवक्षायां सर्पिषो ज्ञानं मातुः स्मरणमित्यादीन्यसमस्तान्येव साधूनि।

स्मरणमिति करणे ल्युट्। अतः अनाभावकमवचनात् ...

म०सु०

हरिस्मरणमित्यादीनितु शेषत्वविवक्षायां कृद्योगषष्ठ्यासमासे बोध्यानि। तत्र च कारकपूर्वकत्वात् कृदुत्तरपदप्रकृतिस्वरः। शेषषष्ठ्यासमासेत्वंतोदात्तत्वंस्यात्तच्चानिष्टम्। तथाच स्वरार्थ्यमष्टसूत्रीति परमनिष्कर्षः॥ किंच। मातुः स्मृतमित्यादौ समासाभावोऽपिफलम्। नहि तत्र कारकषष्ठी लभ्यते। नलोकेति निषेधात्। आह च। निष्ठायां कर्मविषयाषष्ठी वक्तिति षिध्यते। शेषलक्षणयाषष्ठ्यासमासस्तत्र नेष्यत इति॥१॥ एवं स्थिते वृत्त्यादिबहुग्रंथेषु इह प्रकरणे उदाहरणं प्रत्युदाहरणं च यद्यत्रि...तं दृश्यते। तत्सर्वमुपलक्षणतयानेयमिति हरदत्तादयः। सर्वनाम्नस्तृतीयाच। इह सर्वनाम्न इति षष्ठी। तदाह सर्वनाम्नः प्रयोगे इति। पंचम्यांतु हेतुशब्दात्षष्ठीतृतीयेन स्यातामिति भावः। निमित्तपर्यायेति। पर्यायग्रहणस्य फलमुदाहरति। एवमित्यादिना। प्रावातु किमर्थमित्युदाहृतम्। तत्र किमः क्लीबत्वं दुर्लभम्। सामान्येन पुंसकतां समासं वा आश्रित्य कथंचिद्वानेयम्। सर्वनाम्न इतिः निमित्तकारणहेतु

॥२॥ ॥१०

अर्थमिति द्वितीयांतम्। तद्विशेषणे किमः शब्दः पितदुचितम्। विशेष्यात्वात्। कमिति वाच्ये किमित्यनन्वितम्॥२

षुसर्वासांप्रायदर्शनमितिवार्त्तिकंवृत्तिकारेणयद्यपीत्योक्तंतथाऽपिभाष्यकृताहेताविव्यत्रपठितम्।
तेनसर्वनामाप्रयोगेऽपिप्रवर्त्तते।किंतुप्रायग्रहणात्तत्रतृतीयादयएवेत्यर्थः।वर्द्धमानस्तुप्रथमामपीच्छ
ति।षष्ठ्यतसर्थप्रत्ययेन।पंचम्याइति।कथंतर्हिततःपश्चादिति।ततःपश्चात्स्रंस्यतेध्वंस्यतेचेतिभाष्यप्र
योगात्पश्चाद्योगेपंचम्यपि।प्रत्ययग्रहणंचिंत्यप्रयोजनम्।एनपा।कथंतर्हितत्राऽगारंधनपतिगृहाद्दुत्त
रेणास्मदीयम्।ति।उत्तरेणेतितृतीयान्तम्।तोरणेनेत्यनेनसामानाधिकरण्यंबोध्यम्।दूरांतिकार्थैःअ
न्यतरस्यांग्रहणंसमुच्चयार्थम्।तेनचविप्रकृष्टाऽपिपंचमीसमुच्चीयते०व्याख्यानात्।नतुषष्ठीद्विती
यात्तृतीयाः।तदेतदाहपंचमीचेति।दिवस्तदर्थस्य।तच्छब्देनव्यवहृपणोपरामृश्यते०तौचद्यूतेक्रय
विक्रयव्यवहारेचतुल्यार्थौपूर्वसूत्रेगृहीतौइत्याशयेनाहद्यूतेति।कर्मणीति।इहशेषइतिनेसंबध्य
तेउत्तरसूत्रद्वयाऽरंभादितिभावः।अतएवेहत्रिसूत्र्यांतिङंतमुदाहरति।रातस्यदीव्यतीति।प्रेष्यब्रुवोः
इष्यतेदैवादिकस्यगत्यर्थस्यलोण्मध्यमपुरुषैकवचनंप्रेष्येतितत्साहचर्याद्ब्रुविरपितथाभूतएव
गृह्यते।अतएवेहशेषग्रहणंनसंबध्यते०तिङंतेनसहसमासस्याप्रसक्तत्वात्।५०।र्तृकर्मणोःकृति।

म॰सु॰

गुणेति। तदुक्तम्। प्रधाने नियता षष्ठी गुणे तूभयथा भवेदिति। कृतपूर्वीति। पूर्वं कृतमनेनेति विग्रहः। पूर्वं कृ
तवानित्यर्थः। अविवक्षितकर्मकतया भावे क्तः। सुप्सुपेति समासः। पूर्वादिनिः। सपूर्वाच्चेति कर्त्तरि इनिः
तद्धितौ श्राद्धमनेनेति सूत्रादनेनेत्यनुवृत्तेः। अथ कथं ध्येयेरामादमुत्तममिति भट्टिः। अत्राहुः। अनित्य
मिदम्। तदर्हमिति निर्देशात्। स्त्रीप्रत्ययपयोरिति। कथं तर्हि सुद्विषोरिति सूत्रे सुटासीयुटो बाधा नेति वृ
त्तिः। करणत्वविवक्षायां तृतीयेति गरुत्मान्॥ नलोकाव्ययनिष्ठा। उश्च उकश्च ऊकौ। लश्च ऊकौ चेति विग्र ॥ रा
हः। उकारेण कृते। विशेषणात्तदन्तविधिस्तदाह। हरिं दिदृक्षुरलंकरिष्णुरिति। शेषषष्ठी त्विति। एतेन ॥ ९
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः। अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयमित्या
दिव्याख्यातम्। यद्वा। इक्ष्वाकूणां सिद्धय इत्यन्वयः। न तु इक्ष्वाकूणां दुराप इति। तथा वागधिपस्य वि
स्मयमित्यन्वयः। न तु वागधिपस्य दुर्वचमिति। तुल्यार्थैः। कथं तर्हि तुलां यदारोहति दन्तवाससा इ श्री
ति कालिदासः। स्फुटोपमं भूतिसितेन शंभुनेति माघश्च। उच्यते। सहयुक्तेऽप्रधाने इति तृतीया। स्व
वालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिण इत्य[illegible] ऊक्तौ हि विना। पितृयोगं तृतीये

२१०

ति॰व्याख्यानादिति। सूत्रे॰ र्थशब्दो॰पि पृथङ्निमित्तम्॰ तथा च द्वंद्व एवायम्॰ न तु अर्थशब्देन बहुव्रीहिरि
ति भावः॥ ॥इति षष्ठी॥ ॥आधारस्त्रिधेति। एतच्च संहितायाम् इति सूत्रे भाष्ये स्पष्टम्॰ च तस्र इति। प्रा
तिपदिकार्थमात्रे इति भावः। किंच॰ दूरान्तिकेति सूत्रस्य इहाप्यनुवर्त्तनादधिकरणे॰प्येता बोध्याः॥
क्रस्येति। इनू इत्रंतः शब्दो विषयो वृत्तिर्भूमिर्यस्य क्रान्तस्येत्यर्थः। हेतुतृतीयेति। तादर्थ्ये चतुर्थी॰त्यपि
बोध्यम्॰ सीमेत्यादि॰ एतच्च दुर्गवाक्यप्रबोधे कुलचंद्रेणोक्तम्॰ मेदिनीकारो॰प्याह। सीमाघाटस्थि
तिक्षेत्रेषु च उत्कोशेषु च स्त्रियामिति। अथ पुष्कलको गंधमृगे क्षपणकीलयोरिति च। हरदत्तादयस्तु
पुष्कलकः शंकुः सो॰न्निसीमज्ञानार्थं हतो निहतः निखात इत्याहुः। यस्य च। निर्ज्ञातकाला क्रियाश्र
निर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणम्॰ तदाश्रययोः कर्तृकर्मणोर्बोधकादि
यं सप्तमी। तत्र ब्राह्मणेष्वधीयानेषु गत इति कर्त्तर्युदाहरणम्॰ कर्मण्याह। गोष्विति। इहाधीयाना
नां ब्राह्मणानां दुह्यमानानां गवां च प्रतीयमानं लक्षकत्वं विशेषणीभूतयोरध्ययनदोहनक्रिययो
र्विश्राम्यति। भेद एवेति। न तु शब्दान्तरोपात्तसामान्यरूपाक्रान्ततेति भावः। माद्गुराइति। न ह्यत्र गवां

(२१२)

म॰ सु॰ कृष्णेत्यादावविवसामान्यविशेषभावः॥ किंतु शब्दोपात्तयोर्धर्मयोर्विरोध एव। निप्राणेः राज्ञ इति। साधुश
ब्दप्रयोगे तु अर्थं विनाऽपि सप्तमी भवत्येव। साध्वसाधुप्रयोगे चेति वार्त्तिकात्। प्रसित इति। तत्परे प्रसिता
सक्तावित्यमरः। मूलेनेति। नक्षत्रेण युक्तः काल इत्यणो लुबविशेष इति लुप्। पर्यायेणेति। ईश्वरशब्दो भा
वसाधनः। यस्य स्वामिनः ईश्वरत्वमुच्यते इत्येकं व्याख्यानम्। यस्येति स्वं निर्दिश्यते। यस्य स्वस्य ईश्वर उ
च्यते इत्यपरम्। एवं च व्याख्याभेदात् पर्यायेण विभक्तिः साच विशेषणात् षष्ठीवत् इति भावः॥ ॥इति सप्त ॥राम॥
मी॥ ॥समर्थाश्रित इति। सूत्रे समर्थशब्दो लाक्षणिक इति भावः। कतिपयेति। यद्यपि उदात्तवता ग ॥१०६॥
तिमताचेति ज्ञापकेन समासो नित्याधिकारे वार्त्तिककृतोक्तः तथाऽपि नासो नियतः। यत्रानयत्। अभिप्र
भरद्धृषतेत्यादौ समासदर्शनाभावात्। अत एव भाष्यकृता सहेति योगविभागेनायं साधितः। यथोत्तरं
मुनीनां प्रामाण्यमिति भावः। सवेति। एतदपि योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यते। छंदस्येवेति
। एतच्च संप्रदानसंज्ञासूत्रे पदमंजर्यां स्पष्टम्। यदि हि लोकेऽपि स्यात्तर्हि अभि प्रेतीत्यादौ समासात्क्त्वा
दयः स्युः। पवति कल्पमित्यादौ तद्धितांतात् यथा। न च लिंगसर्वनामनपुंसकताऽभ्युपगमेन निर्वाहः।

यत् प्रकुरुते इत्यादौ ह्रस्वापत्तेः प्रकुर्वीरन्नित्यादौ नलोपापत्तेश्च। निर्देशादिति। अन्यथा हि
प्रथमादिनिर्दिष्टत्वाविशेषे पि उपसर्जनसंज्ञाया अन्वर्थत्वेन पूर्वशब्दस्यैव पूर्वनिपा
तः स्यादिति भावः। इवेनेति। अयमपि समासः पूर्ववत् क्वाचित्क एव। तेन जीमूतस्येव त्या
दौ तैत्तिरीयाणां पृथक्पदत्वेन पाठः। उदाकुरिव वामनः इत्यादौ व्यस्तप्रयोगश्च संगच्छते।
गोस्त्रियोः उपसर्जनमिति। यत्तु प्राचा गोस्त्रीप्रत्ययांतयोरुपसर्जनयोरित्युक्तम्। त
न्न। चित्रगुरित्यादौ गोशब्दस्योपसर्जनत्वे पि तदन्तस्यातथात्वात्। गौरीपतिरित्यादौ व
तिप्रसंगाच्च। कथं गोकुलं राजकुमारीपुत्र इति चेत् शृणु। उपसर्जनत्वस्य समासंबंधिक
तया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति ह्युत्तरपदभूतया गोस्त्रियोर्गुणीभा
वे ह्रस्वत्वम्। दिशायोरिति। दिशोरिति हलंतेन विग्रहे प्येतदेव रूपम्। दिशाशब्दस्य शारद
दिषु पाठाट्टच्। वचनसामर्थ्यादिति। विभक्तीत्यनेनाव्ययेन सुबंतेन सह समासः तद्घटकी
भूतैव विभक्तिर्गृह्यते सन्निधानात् तदर्थद्योतकश्चाधेरिति भावः। परिशिष्टे तु प्रथमांते

म०सु०

नायं समासः षष्ठ्यंतेनैवत्यपि पक्षद्वयं स्थितम्। यत्तु प्राचोक्तम्। हरौ अधिकृत्येति विग्रहे हरा
वधि स्थित इति। तन्न। नित्यसमासत्वेन विग्रहायोगात्। यदाहुः। अविग्रहो नित्यसमास इति
। ननु अस्वपदविग्रहोपि स्वीक्रियते कुंभकारो तीति यथा। अयमपि तथास्तु। अधिकृत्येति ल्य
बंतस्य समासाप्रविष्टस्य सत्त्वादिति चेत्। न। समासार्थलेशमपि अबोधयतस्तस्य विग्र
हत्वे शास्यैवासंभवात्। यत्तु व्याचख्युः। विग्रह इव विग्रहः। अर्थकथनमात्रम्। तेन। विग्रह
नित्यसमासत्वमविरुद्धम्। अत एव समासप्रकृतिभूतमलौकिकं वाक्यांतरं दर्शयति हरौ
अधीति स्थित इतीति। अत्रेदं वक्तव्यम्। विग्रह इवेत्यसंगतम्। अर्थकथनवाक्यस्यैव विग्रह
त्वेन ततो भेदाभावात्। अर्थकथनमात्रमित्यपि न। ल्यबंतेन समासार्थासंस्पर्शात्। हरौ अधी
ति अलौकिकमित्युक्तं तदपि न। तत्र हरि ङि इत्यस्यैव प्रवेशात्। अंतरंगानपि हीति न्यायात्। अ
न्यथा समासे हरिशब्देकारकस्य दुर्लभत्वापत्तेश्च। यदपि व्याचख्युः। अलौकिकत्वादेव अधि
शब्देनाभिहितेऽपि सप्तमी। अन्यथा सा न स्यात्। अनभिहिताधिकारादिति। तदप्यापाततः। अ ।।रा
लौकिकत्वं हि नित्यविध्यंतरप्राप्तिविषयत्वेनापरिनिष्ठितत्वम्। न त्वेतावन्मात्रेणानुशिष्टा ।।१०

याःसप्तम्यास्तत्र प्रवेशाःसूपपादः॥ अतिप्रसंगात्॥ यत्तुतत्पौत्रेणव्याख्यातम्॰ तिङ्कृत्तद्धितसमा
सैरितिपरिगणनादधिनाःभिहिते॰पिसप्तमीति। तन्न। परिगणनस्याकरेप्रत्याख्यातत्वात्॥ कर्म
णिद्वितीयेतिसूत्रेस्वयमपितथैवोक्तत्वात्॥ क्रमादमुंनारदइत्यबोधिसइत्यादिप्रयोगविरो
धाच्च। द्वितीयापंचम्यारिति। एतच्चरक्षितग्रंथेस्पष्टम्॥ यत्तुवदंति॰वैत्रस्यवनादारादित्यादौ।
सापेक्षत्वादसमासेवरितार्थत्वाद्विधानसामर्थ्यंनास्तीति॰तच्चिंत्यम्॥ नित्यसमासस्यन्याय्य
त्वेसतिवैत्रस्येत्यादिविशेषणप्रयोगस्यैवासंभवात्॥ उक्तंहिभाष्ये। वृत्तस्यविशेषणप्रयोगोन
ति। ननुसविशेषणानांवृत्तिर्नत्यपिभाष्यउक्तमितिचेत्॰सत्यम्। अनित्यसमासविषयंतत्॥ नित्य
समासस्यापिसविशेषणोपप्रवृत्तौमहतःकुंभस्यउपइत्यापद्येत। यत्तुप्रावाहकस्यापत्यु
क्तम्॰यच्चव्याचख्युःईदृशेप्रक्रियावाक्येस्थितेइतितदुभयमपिप्रागुक्तरीत्याग्रामादिकमेव।
संप्रतिनेति। संप्रतीत्यव्ययमिदानीमित्यर्थे॰एतर्हिसंप्रतीदानीमधुनासांप्रतंतथेत्यमरः। तच्चा
धिकरणशक्तिप्रधानत्वात्॥ क्रियापदेनैवान्वयार्हं। निषेधोःपिक्रिययाएव। तदेतदाहयुज्यत

म॰सु॰

इति। असंप्रतीतिर्वृत्तौ तु युजि क्रियांतर्भवति। दध्योदन इत्यत्रोपसेचनक्रियायथा॥ यत्तु प्रागेवो
क्तम्। असंप्रतीति संप्रत्यभाव इत्यर्थः। अनेनोपभोग्यवस्तुनो यो वर्त्तमानः कालः तस्यैव नि
षेधः क्रियत इति तन्न। अधिकरणस्य निषेधं प्रति प्रतियोगित्वेनान्वयस्य सर्वतंत्रविरुद्धत्वात्
न हि भूतले घटो नास्तीत्यनेन भूतलं निषिध्यत इति कश्चिदभ्युपैति। तच्चायुक्तिसहमित्या

नवाइत्य
पिपाठः॥

स्तांतावत्। इति हरीति। स्वरूपपरेण षष्ठ्यंतेन हरिशब्देन सह प्रकारार्थस्येति शब्दस्य समासः।
प्रतिशब्दस्येति। यत्त्वाकुः। ग्रामस्य वृक्षं वृक्षं प्रतीत्यत्र सापेक्षत्वेन समासाभावे द्वितीया विधानं
सावकाशमिति तत्प्रागेव दूषितम्। हरदत्तस्त्वाह। अर्थमर्थं प्रतीति भाष्यकारप्रयोगाद्वाक्यमपि
साधुः। यद्वा॰ नात्राव्ययं वीप्सावृत्ति किं तर्हि कर्मप्रवचनीयत्वात्संबंधमवच्छिनत्ति वीप्सा तु द्विर्वच
नद्योत्येति। सहपूर्वांक्तमिति। साकल्येऽव्ययीभावः। गुणभूतेऽपीति। यदि सादृश्य इति नोच्येत
ततो यत्र सादृश्यं प्रधानं तत्रैव स्यात्। अव्ययार्थप्राधान्यस्याव्ययीभावे औत्सर्गिकत्वादिति
भावः। अन्त इति। इदानीमेतावान्प्रदेशोऽध्येतव्य इति यावतः प्रदेशस्य परिग्रहः कृतः तदपेक्षा

॥राम॥
॥१०८॥

216

समाप्तिरिहान्तो विवक्षितः। स चासकलेऽप्यध्ययने भवतीति साकल्यात्पृथगुच्यते। साग्नीति। अग्निश
ब्दस्तदर्थे ग्रंथे वर्त्तते स तृतीयान्तः समस्यते। यद्यप्यग्निना सहेति प्रतियोगार्थमेव तथापि साहित्य
मात्रं तथा। अन्तत्वविवक्षायां तु समासो नित्यः। अत एवाग्निग्रंथपर्यंतमित्यस्वपदविग्रहो दर्शितः
। यत्तु अग्निरन्तोऽस्येति प्रथमं। तेनाग्नेरन्तत्वमिति षष्ठ्यन्तेन वा विग्रह इति प्रथमान्तेन षष्ठ्यन्तेन वा स
मास इति। तन्न। सहशब्दस्यान्तवाचकत्वाभावात्। अन्तत्वस्य तु सुतरामलाभात्। तस्याध्ययनेः
नन्वयाच्च। सहयुक्ते तृतीयाया न्याय्यत्वाच्च। सतृणमत्तीत्यत्र साकल्यस्येव साग्नीत्यत्र अन्त
त्वस्यापि साहित्यद्योत्यतया तत्र तृतीयान्तेन समासं स्वीकृत्य सहतत्परित्यागस्य निर्मूलत्वाच्च
। यावच्छ्लोकमिति। यावदित्यव्ययं समस्यते। विग्रहस्तु तद्धितेनेति। अस्वपदत्वं बोध्यम्। विभाषा। एतदि
ति। न्यायसिद्धेऽर्थे लिंगदर्शनमिदम्। टिघुभादिसंज्ञानामिव समाससंज्ञाया अपि नित्यप्राप्तत्वात्
। वचनं विना विध्यन्तराणामिव संज्ञानामपि विकल्पालाभात्। स्यादेतत्। सुप्सुपेत्यपि तर्हि नित्यं स्या

म०सु०

त्।नचेष्टापत्तिः अपसिद्धान्तात्।तथाहि।चरट्सूत्रेवृत्तिकृतोक्तं पूर्वं भूतो भूतपूर्वः सुप्सुपेतिस
मासइति।तथाशाकलसूत्रेसिन्नित्यसमासयोःशाकलप्रतिषेधः इत्यत्र नित्यग्रहणेननार्थः
।इदमपिसिद्धं भवतिवाप्यामश्वोवाप्यश्वः इति भाष्यंकैयटोव्याख्यत्।वाप्यश्वइतिसुप्सुपेतिस
मासः।संज्ञायामितिसमासस्य नित्यत्वात्सिद्धःप्रतिषेधइति।तथाअनुदात्तंपदमेकवर्जमिति
द्धवदत्रेत्यादिसूत्रेष्वपिकैयटेस्पष्टम्।अतआह।सुप्सुपेति।विति।समासेति।योगविभागेनैव
सिद्धेसमासेउत्तरसूत्रेः पुनर्विधानंप्राचीनस्यक्वाचित्कतांज्ञापयति।एवंचइवेनसमासस्या
पिक्वाचित्कत्वादुद्वाकुरिववामनइत्यादिसिद्धम्।इवेनेतिवार्त्तिकंतुयद्यपिकुगतीत्यत्रपठ्यते
तथापिसुप्सुपेत्यत्रत्यमेव नित्याधिकारस्मारितमितिकैयटः।एवंस्थितेइवेनसमासस्यबाद्द
सत्वंकल्पयंतःप्रत्युक्ताः।जीमूतस्येवेत्यत्रबद्ध्वैवसमासाभ्युपगमेऽपितैत्तिरीयेव्यस्तस्यैवपा ॥रा
ठादितिदिक्।अपपरिबहिः।अतएवज्ञापकाद्बहिर्योगेपंचमी।ज्ञापकसिद्धंनसर्वत्र।तेनकर ॥१०

219

स्यकभोबहिरितिसिद्धम्। आबालमिति। यत्तु आपरमाणोरावन्हगोलकमितिकिरणावल्यां प्रयुक्तं तत्प्रामादिकम्। समासमध्ये चकारप्रयोगासंभवात्। वन्हगोलकादितितु पाठस्तु यंप दार्थमिति। सूत्रे तु यदिति सामान्येन नपुंसकम्। अव्ययं विभक्तीत्यनेन सिद्धे विभाषार्थं सूत्रम्। तेन पक्षे वनस्यानु इत्युदाहार्यम्। अनुगंगमिति। इत्यादिषु यामोलक्षणत्वं चानुनाद्योत्यते। लक्ष्यं तु समासार्थः। अत एव च वाराणस्या सामानाधिकरण्यम्। एवं स्थिते फलितमाह। गंगा दैर्घ्येति। वाराणसीति। वरं च तदनश्च वरानः श्रेष्ठोदकं तस्यादूरं भवा। अदूरभवश्चेत्यण्। आदिवृद्धिः। पूर्वपदात्संज्ञायामिति णत्वम्। नदीभिश्च। स्वरूपस्य संज्ञानघात्वने रूपग्रहणम्। बहुवचननिर्देशात्। किंत्वर्थस्यानवतस्य समासः संभवति। अतस्तद्वाचिनामयं समासः। तेन केवलं विशेषशब्दा एव किंतु सामान्यशब्दोऽपि। नित्यसमास इति। एतच्च वृत्तौ स्पष्टम्। शाकलसूत्रे कैयटस्वरसोऽप्येवम्। नन्वेवं न्यायसाम्याद्बहुव्रीहेरपि नित्यसमासत्वं स्यादिति चेत्। मैवम्। यस्येत्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्रतीतेः। अत एव हि संज्ञा

म॰स्तु॰ नवगमादित्युक्तम्।नत्वन्यपदार्थानवगमादिति।संज्ञायांकिंशीघ्रगंगोदेशः।अथाव्ययी
भावेसाधारणान्समासान्तानाह।अव्ययी।समासान्तइति।समासस्यसमासाधेत्तरपद
स्यवानरमावयवइत्यर्थः।तेनोपशरदमित्यत्रनाव्ययीभावादित्यम्।द्विपुरीत्यादौद्विगोरि
तिङीब्वासिद्ध्यति।जरायाइतिगणसूत्रम्।प्रतिपरेतिव।अक्ष्णःपरमिति।अविषयइत्यर्थः।
वृत्तिविषयेअक्षिशब्दइंद्रियमात्रपरः।समक्षमिति।अक्ष्णोयोग्यम्।नदी।इहस्वरूपस्य
वग्रहणंनसंज्ञायाः।पौर्णमास्याग्रहायण्योःपृथक्ग्रहणात्।उपनदीति।टजभावेनपुं
सकह्रस्वः।इदंत्ववधेयम्।नदीभिश्चेतिसूत्रेविशेषाणामिवस्वरूपस्यापिग्रहणम्।विशेषा
णामेवेत्यत्रमानाभावादित्युक्तम्।तेनपंचनदमितिसिद्ध्यति।अत्रचनित्योऽच्।तदुक्तम्।गोदा
वर्याश्चनद्याश्चसंख्यायाउत्तरेयदीति।एतच्चअचप्रत्ययचवेत्यत्रअजितियोगविभागात्सि
द्धम्।पूजार्थमिति।अन्यतरस्यांग्रहणस्यप्रकृतत्वादितिभावः॥ ॥इत्यव्ययीभावः॥ ॥द्वि ॥रा
गोस्तत्पुरुषाद्वेफलमाहसमासान्तइति।पंचराजमिति।राजाहःसखिभ्यष्टच्।उत्तरपदस्यानका ॥११

कारान्तत्वात्स्त्रीत्वाभावः। समासार्थोत्तरपदान्ताः समासान्ता इतिपक्षेतुपात्रादिषु बोध्यम्। काशिकायांतु पंचराजीति क्वाचित्कः पाठः। अपपाठः सइति हरदत्तः। श्रितादीति। श्रितादीनां यद्यपि संबोधने सुबन्तत्वं संभवति तथापि अन्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्घटितसमुदाये लाक्षणिकाः। प्रायेण समासतद्धितप्रकरणे एवमेव। खट्वाक्षेपे गम्यो द्विगुर्योयज्ञ इत्यादि सामान्यापेक्षज्ञापकात्। न हि खट्वेत्यस्य द्वितीयान्तत्वं गम्यादीनां षष्ठ्यन्तत्वं वा संभवति। येन विधिरिति सूत्रस्थभाष्यवृत्तिग्रंथोपीत्थमानम्। तत्र कैयटहरदत्तादीनां तु महान्प्रमाद इति शब्दकौस्तुभे प्रपंचितमिति भावः। यत्तु वदंति। श्रितादीनां कृदन्तत्वेन गतिकारकोपपदानामिति सुबुत्पत्तेः प्रागेव समास इष्टः। अन्यथा काष्ठश्रितेयो न सिद्ध्येत्। अतएव किल प्राचा श्रितादिभिरित्येव व्याख्यातम्। न तु सुबन्तैरितीति। तन्न। प्रधानस्त्रीप्रत्यये तदादिनियमाभावेन काष्ठश्रितेयस्य निर्बाधत्वात्। यदपि श्रिताशब्दादपि कदाचित्स्यादिति तदपि न। सापेक्षत्वेनासामर्थ्यात् गतिकारकेत्यादिस्तु नायं विषयः। कर्तृकरणे कृता सा

श्रितशब्दस्य आबन्तत्वेपि समुदायस्य अतथात्वात्।

म॰ सु॰ धनंक्तेतिवत् द्वितीया श्रितेतिसूत्रे कारकतद्विशेषयोरनुपादानादिति दिक्‌ ॥ क्रुसमिति। इह श्रि
तादिषु गत्यर्थत्वात्कर्तरि क्तः। अयणं प्राप्तिरापत्तिस्त्वेह गतिरेव न तु फलं अत्यस्तस्तु व्यतिक्रमः सो
ऽपि गतिविशेष एवेति प्राञ्चः। यद्वा श्रित इत्यादौ आदिकर्मणि क्तः। ग्रामं गमीति। गमेरिनिरित्यौणा
दिक इनिः। सवनं भविष्यत्कालेऽनविष्याति गम्यादय इत्युक्तेः। अकेनोरिति कृद्योगलक्षणषष्ठीनि
षेधात्कर्मणि द्वितीया। यत्तु गत्यर्थकर्मणीतिसूत्रे द्वितीयाग्रहणस्य कृद्योगलक्षणषष्ठीबाध
नार्थतामाहुस्तद्भाष्यविरुद्धम्। भाष्ये तत्सूत्रप्रत्याख्याय कृद्योगषष्ठ्या एव स्वीकारादित्यन्य
त्र विस्तरः। खट्वारूढ इति। जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः। वेदं व्रतानि वसमाप्य समावृ
त्तेन हि खट्वारोढव्या ब्रह्मचर्य एव [illegible]मित्यायनाः हे प्रिय खट्वामारोहति स जाल्मः। रूढ्यायं
तेन खट्वामारोहतु मा वा निषिद्धानुष्ठानपरः सर्वोऽपि खट्वारूढ उच्यते। अत एवाह नित्येति। ॥राम।
मासत्रमित इति। माङ् माने। आदिकर्मणि कर्तरि क्तः। इह प्रतिपच्चंद्रेण नास्त्यत्यंतसंयोगः मुहू ॥१११

मू३

त्रमिति। मुहूर्त्तं व्यापीत्यर्थः। कालाध्वनोरत्यंतसंयोगइति द्वितीया। तृतीयातत्कृतार्थेनगुणवचने
न। तच्छब्देन तृतीयान्तपरामर्शिना तदर्थो लक्ष्यते। तदर्थकृतत्वं च गुणवचनस्यार्थद्वारकं विशेषणम्।
एवं स्थिते फलितमर्थमाह तृतीयान्तार्थेत्यादि कृतो या गुणस्तद्वचनेनेत्यर्थः। धान्येनेति। करणे तृ
तीया। अर्थ्यत इत्यर्थः प्रयोजनम्। अर्थनमर्थः अभिलाषो वा। अर्थशब्दस्य रूढत्वे तु धान्येनेति
हेतौ तृतीया। पूर्वसदृश०। इह समसदृशाभ्यां योगे तुल्यार्थैरिति तृतीया। अन्ययोगे तु हेतौ वि
ति। अत एव वचनाद्वा। इह सदृशग्रहणं व्यर्थम्। षष्ठीसमासेन गतार्थत्वात्। न च तत्पुरुषे तुल्यार्थ
तृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यम्। सदृशप्रतिरूपयोः सादृश्य इति सूत्रेण तत्सि
द्धेः। ऊनार्थेति। पूर्वसूत्रे ऽर्थशब्देन समासस्य साधितत्वादिहार्थग्रहणमभिधेयपरम्। तच्च ऊनश
ब्देनैव संबध्यते। न तु पूर्वादिभिः। समसदृशयोः पृथगुपादानादिति भावः। श्लक्ष्णेण मिश्रीकरणम्।
खरविशदमभ्यवहार्यं श्लक्ष्णं खरं कठिनं विशदं विविक्तावयवम्। यत्प्रत्ययान्तस्य एरजन्तस्य व

म०सु० भज्यते यश्चैतत्रैव प्रयोगात् गुणान्तरेणेति। एतच्चवार्त्तिकं सर्वं गुणकार्त्स्न्ये इति सूत्रे पठितमून्येणा
मिति। अत्र द्विजशब्देन समासप्रसंगस्तदपेक्षा हि षष्ठी। श्रेष्ठत्वं च द्विजेतरमनुष्येभ्यः। तेषां सामा
न्यशब्देनोपस्थितत्तया तान्विहाय अनुपस्थितकल्पनायाः अन्याय्यत्वात्। अथ कथं पुरुषोत्त
मइति। यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुः। एतत्त्रितयसन्निधौ सत्येवा
यं निषेध इति द्विवचनविभज्येति सूत्रे कैयटः। यद्वा पुरुषेषूत्तम इति निर्धारणसप्तम्याः संज्ञाया
मिति समासः। न चैवं न निर्धारण इति व्यर्थः स्वरभेदात्। सप्तमीसमासे हि पूर्वपदप्रकृतिस्वरः।
षष्ठीसमासे तु अन्तोदात्तत्वं स्यात्। पूरणगुण०। अत्र प्रस्तावोक्तं एतदर्थैः षष्ठी न समस्यत इति तन्न
नम्। एवं हि सुहितानामेव ग्रहणं स्यात्। तावतामेवार्थशब्देन समस्तत्वादिति ध्वनयन्नाह सदा
दिभिश्चेति। अत्र व्याचख्युः। पूरणार्थशब्दः प्रत्यय एव गृह्यते कृत्रिमकार्यसंप्रत्ययादिति तन्म
दम्। न हि प्रत्ययविशेषाणां पूरणार्थत्वं टिघुभादिवत्संज्ञासूत्रैर्लब्धमस्ति येनोक्तपरिभाषावका

संज्ञाया।
मित्यस्य
नित्यल
पुरुषेषू
इतिविग्र
भ्रस्यः

॥राम॥

॥११२॥

शमासादयेत्। कुतस्तर्हि पूरणप्रत्ययान्ताः षष्ठादय एव गृह्यन्ते। ननु पूरणो भवा दिशब्दा इतिवत्
लोपे वेत्यादपूरणमिति निर्देशादित्यवेहि। तेन कुम्भपूरणं भवः पटुरुच्चैरित्यादि सिद्धम्। कथं तर्हि ता
न्युञ्छषष्ठाङ्कितसैकतानीति। प्रमाद एवायमित्येके। वस्तुतस्तूञ्छेषु षष्ठः उञ्छात्मकः षष्ठ इति वा
व्याख्येयम्। यत्तु पूरणेति स्वर्यते तेनाधिकारगतिः। अयं तु भागार्थक अन्प्रत्ययान्त इति तन्न। अन्
प्रत्ययान्तेनापि निषेधस्य द्वितीयतृतीयेति सूत्रभाष्य एव स्पष्टत्वात्। अत एव भिक्षाद्वितीयमित्या
दौ अन्यतरस्यां ग्रहणसामर्थ्यात्समास इति तत्रोक्तम्। ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसं
ग एव नास्ति। ब्राह्मणशब्दस्य दन्तैरेवान्वयात्। ब्राह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थादितत्राहुर्यद
ति। शुक्लशब्द एव हि विशेष्यसमर्पक इति भावः। यत्तु भावप्रत्ययान्तो गुणवाची यत्र निषिध्यते इति प्रा
चोक्तं तन्न। उक्तोदाहरणस्य भाष्यारूढस्यासंगतिप्रसंगात्। यदपि सदा गुणवाचिनो न निषेध

सदागुणवाचिनोनेत्यस्यप्रतीकम्।२

न०सु०

इतितदपिन।भावप्रत्ययान्तस्यसदागुणवाचित्याभावेग्रंथविरोधात्।यत्तुव्याचक्षते।भावेत्यादेर्भावप्रत्ययान्तएवनिषिध्यतइतिनार्थः।किंतुभावप्रत्ययान्तएवसन्योगुणमाह।तदभावेतुगुणंगुणिनंचसशुक्लादिरेवनिषिध्यते।सदेति।अन्तरेणापिभावप्रत्ययंयोगुणमेवव्यक्तिगंधादिशब्दस्तस्यननिषेधइत्यर्थइतितदपिक्लिष्टम्।पुनरुक्तिग्रस्तंच।काकस्यकार्ष्ण्यमित्यादावव्याप्तंचाउक्तव्याख्यायाहिशुक्लादीनामेवनिषेधोलभ्यतेनतुशौक्ल्यादीनाम्।नहिशौक्ल्यादिशब्दाःभावप्रत्ययंलब्ध्वागुणमाहुः।नवातदभावेगुणंगुणिनंच।किंतुअन्तरेणापिभावप्रत्ययंगुणमात्रपरत्वाद्रूपरसगंधादिशब्दैरलब्धत्वात्।अन्यथातदभावेत्यादिस्वग्रंथेनैवसह विरोधापत्तेरितिअवहितैराकलनीयम्।यदितुप्रावोग्रंथो।पियोऽयइत्यायह।तदित्थंयोज्यताम्।सदेत्यादितावद्यथाश्रुतम्।चंदनगंधइत्युदाहरणंच।अस्यापवादंप्रथममाह।भावेति।ननुअस्तु

भावधौनेत्यर्थः२

॥राम॥

॥११३॥

×शब्दतुल्याएव।नचशौक्ल्यमितिकार्ष्ण्यमितिभावप्रत्ययो।स्त्येवेतियाच्यम्।तस्यशुक्लकृष्णादिशब्दैर्लब्धत्वेपिशौक्ल्यादि४

नामैयंयोजनाआकरग्रंथात्तुकथमेतावान् सिद्धान्तोलब्धइतिचेत्॰ शृणु॰ रक्तेगुणार्थइत्यनेन
केवलगुणस्यगुणोपसर्जनद्रव्यस्यचप्रतिपादकोगृह्यते॰ व्याप्तिन्यायात्। काकस्यकार्ष्ण्यं
ब्राह्मणस्यशुक्लाइतिद्वेधाभाष्येउदाहरणाच्चचंदनगंधइत्यादौतुनिषेधेप्राप्तेतत्स्थैश्च
गुणैरितिवचनेनसमासःप्रतिप्रसूयते।गंधत्वेनप्रतीयमानोह्ययंगंधोनकदापिगुणिसमा
नाधिकरणः। किंतुस्वप्रधानइदमेवतात्पर्यम्। ननुबहतिजलमियंपिनष्टिगंधानितिप्रयो
गदर्शनाद्युक्तमिदमितिचेत्। न। तत्रह्ययंगंधानितिनगुणशब्दः मालतीकुसुमादिष्वदर्श
नात्। किंतुचंदनत्वादिजातिनिमित्तकोऽन्यएवसः। तस्माच्चंदनगंधइत्यत्रतत्स्थत्वंसुस्थमे
व। एवंघटरूपमित्यादावपि। सुरभिशुक्लादयःशब्दास्तुनतत्स्थगुणप्रतिपादकाः। एवाम्
पि रौक्ष्यसौरभादिभिःशब्दैःसहसमासोदुर्वारइतिचेन्मैवम्। तैर्हिशुक्लत्वादिप्रकार
कएवगुणबोधः तद्रूपापन्नानांचद्रव्यसामानाधिकरण्यमस्त्येव। शुक्लःसुरभिरित्यादा

२५९

म०सु०

वितिरिकू। फलानामिकरणस्यशेषत्वविवक्षायांषष्ठी। ब्राह्मणस्यकृत्वेति। तादर्थ्यरूप संबंधस्यसामान्यरूपेणविवक्षायांषष्ठी। ब्राह्मणसंबंधिनीयाक्रियातदनंतरमित्यर्थः। इत्यादीति। तथाचभट्टिः। यत्कृतेऽरीन्निगृह्णीमः। आदेयाःकिंकृतेभोगाः कुंभकर्णत्वयाविनेत्यादि। अनेकमन्यपदार्थइतिसूत्रेसर्वपश्च्यादिदितिभाष्यप्रयोगाः। पिदृत्वानुकूलःरत्नितइति। कैय्यटहरदत्तौतुअव्ययप्रतिषेधेदृष्टस्योपरीत्युदाहरंतौतुअकृद्व्ययेनापिप्रतिषेधंमन्येते। स्वरभेदइति। कृदुत्तरपदप्रकृतिस्वरेण। तत्स्वरस्यैवावस्थानात्। अंतःस्वरितइष्टस्तव्येनतुमध्योदात्तत्वंस्यादितिभावः। तत्तकस्येत्यादि। यत्तुप्राचामुदाहरणंसज्ञोनलस्येत्यादि। यत्रसमर्थनंस्मृतिसमासेपूर्वनिपातानियमःस्यात्। विशेषणसमासस्तुस्यादेवेति। अत्रेदंवक्तव्यम्। विशेषणविशेष्यभावेकामचारादव्यवस्थायांप्राप्तायांअप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्यद्रव्याश्रितत्वेनगुणादीनामप्राधान्यात्तद्व्यापदेशया

॥राम
॥११६

गुणादीनांविशेषणातेतिव्यवस्थेष्यते।तद्वषष्ठीसमासेपिसुवचमिति।किंतन्निषेधेन।क्तेनचपू
जायाम्।पूजायग्रहणमुपलक्षणमितिव्याचष्टेमतिबुद्धीति।भूतइति।नचतक्तकौऽन्यन्याये
नमत्यादिन्यः क्तस्यवर्त्तमानकालेभूतकालतोबाधतइतिवाच्यम्।तेनेत्यधिकारेउपज्ञा
तइतिनिर्देशेनतद्बाधज्ञापनात्।नचज्ञानार्थएवज्ञापकम्।पूजितायः सुरासुरैरित्यादिप्र
योगानुरोधेनसामान्यविषयकत्वस्यैवन्याय्यत्वादित्यनुन्यासकारः।अन्येतुकारकषष्ठ्या
एवसमासनिषेधोऽयम्।शेषषष्ठ्यातुसमासइत्याहुः।एतेनकलहंसरामसहितः कृतवा
नितिनद्विप्रयोगोव्याख्यातः।इदमेषामिति।क्तोऽधिकरणेचेतिक्तः।अधिकरणवाचिनश्चेति
कर्त्तरिषष्ठी।अधिकरणेचेत्येवसिद्धेसूत्रद्वयेपिवाविग्रहणंस्पष्टार्थम्।कथंतर्हिकिंवृत्तं
यद्वृत्तमिति।नायमधिकरणेक्तः किंतुकर्त्तरि।किमावृत्तंनिष्पन्नमित्यर्थः।कर्मणिवा।यद्यत्र
याकावनकर्मणिषष्ठीगृह्येततर्हिविज्जकाभ्यांनिषेधोव्यर्थः स्यात्।तस्मादव्ययानामनेका
र्थत्वादितीत्यर्थेवशाद्बोऽयंतदाहकर्मणीतियाषष्ठीति।सप्तम्येकवचनान्तंपदमुच्चार्ययाषष्ठी

विहितापरिशेषितावेत्यर्थः।नियमसूत्राणांविधिरूपेणनिषेधरूपेणवेतिद्वेधाप्रवृत्तेःस्वी
कारात्।तृजकाभ्याम्।इहकर्त्तरीत्येकस्यैवविशेषणंनतुतृचः।अव्यभिचारात्।तथापिउप
रंजकत्वमात्रमभिप्रेत्याहकर्त्रर्थेति।जयादित्यस्तुकर्तृषष्ठ्याःइतिव्याचष्टेतन्मतेतृजुत्तरा
र्थइतिकल्प्यंस्यात्।किंचकर्तृग्रहणंतृजकयोरेवविशेषणमित्युक्तम्।तयोःश्रुतत्वा
त्।नतुषष्ठ्याइतिभावः।शेषषष्ठ्येति।केचित्तुजनिकर्तुःप्रकृतिस्तत्प्रयोजकोहेतुश्चेतिनिर्दे
शादनित्योऽयंनिषेधइत्याहुः।न्यासकारस्त्वाहतृन्नन्तमेतत्।नलोकेतिषष्ठीनिषेधस्त्वनि
त्यः।त्रकाभ्यामितिवक्तव्येतृचःसानुबंधकस्यग्रहणाज्ज्ञापकादिति।पूर्वापरा०।एकदेश
श्चोऽवयवेरूढः।अतएवचतस्यकर्मधारयत्वेपिततोमत्वर्थीयः।कृष्णसर्पवान्वल्मी
कइतिवत्।यद्यपीहएकगोपूर्वादितिठञ्प्राप्तस्तथापिअतएवनिर्देशादनित्यस्तदा
वयविनेति।ननुकिमनेनसूत्रेणकर्मधारयेणैवपूर्वकायइत्यादयःप्रयोगाःसेत्स्यंति ।।राम।
ऊर्ध्वकायवत्समुदायेवृत्ताःशब्दाअवयवेष्वपिवर्तंतइतिन्यायादतआहषष्ठीइत्यादि ।।११५।

याचकायपूर्वइत्यादिप्रयोगव्यावृत्तयेसूत्रमितिभावः।नचेहषष्ठीदुर्लभा।अन्यारादितिपं
चमीप्रसंगात्।तत्रहिदिग्निर्दिष्टःशब्दोदिक्शब्दइतिव्याख्यानेनसंप्रत्ययदिग्वृत्तिनापि
योगेपंचमीस्वीकृतेतिचेत्सत्यम्।अवयववृत्तिभिर्योगेषष्ठ्येवेष्यते।तस्यपरमाम्रेडितमि
तिलिंगात्।पूर्वंनाभेरिति।नाभेर्यःपूर्वोभागःसकायस्यावयवइत्यर्थः।नाभेरितिदिग्यो
गलक्षणापंचमी।अत्रपूर्वस्यभागस्यनाभिरवधिःनत्वेकदेशिनी।अतोनाभ्यासहस
मासोनेत्यर्थः।कायेनतुस्यादेवपूर्वकायोनाभेरिति।पूर्वशब्दस्यनित्यसमासापेक्ष
त्वात्प्राधान्याच्च।पूर्वंछात्राणामिति।समुदायसमुदायिसंबंधेषष्ठीबहुवचनंतुउद्भूताव
यवभेदसमुदायविवक्षया।यथाछात्राणांपंचमइति।तच्छात्राणामेकदेशित्वेसत्यपिए
कत्वसंख्यावैशिष्ट्याभावान्नसमासः।सर्वोपीति।पूर्वादिभिन्नोपीत्यर्थः।ज्ञापकादिति।नह्य
न्यथासायपूर्वत्वमह्नस्योपपद्यते।नचोर्ध्वकायवत्सामानाधिकरण्येन।निर्वाहःशंक्यः।
अहःसर्वैकदेशेत्यादिनाविहितस्यसमासान्तस्यअह्नः।अह्नएतेभ्यइत्यन्हादेशस्यैवैकदे

एकदेशिसमासोधर्मैःसायाह्न इतिप्रयोग
धर्मसंख्याविशेषयतिसूत्रंधर्मिग्राहकमा
नम्।३

म०सु०

शिसमासंविनाऽनुत्पत्तेरितिभावः। इत्याकुरिति। नचैवंदिनमध्योरात्रिमध्यइत्यादिनसिद्धेर्दि
तिवाच्यम्। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। यत्तुप्राचोक्तंसर्वैकदेशेनाह्नःसमासइतितन्न
।एकदेशस्यतृतीयानिर्दिष्टतयापरनिपातापत्तेः।धर्मिग्राहकमानविरोधात्। यदपिपाठान्त
रंसर्वैकदेशिनाह्नइतितदपिन। अस्यैवह्येकदेशिनवत्तेनैवतस्यसमासइतिसंभवति। अर्द्धं
नपुंसकम्। नित्यंक्लीबइति। अर्द्धमितिनिर्देशादेवक्लीबत्वेलब्धेनिपुंसकग्रहणंनित्यनपुंसका
र्थमित्यर्थः। खंडमात्रवाचीतुत्रिलिंगः। भिन्नांशकलखंडेवापुंस्यर्द्धोऽर्द्धंसमेंऽशकेइत्यमरः। अत्र
वापुंसीतिपूर्वोत्तराभ्यांसंबध्यते। तत्रशकलखंडइतिरूपभेदात्क्लीबत्वेनिर्णीतेवचनाद्व
पुंस्त्वविकल्पः। स्त्रियामितिफलितम्। नचखंडइतिस्त्रीलिंगमेवकिंनस्यादितिवाच्यम्। भिन्नलिं
गानांद्वन्द्वइतितेनपरिभाषितत्वात्। शकलश्चास्त्रीतिनिर्देशेनैवनिर्णयात्। अर्द्धइतिरूपभेदात्पुं
स्त्वावगतोऽसत्यामपिवापुंसीतितद्विकल्पेनाविशेषात्स्त्रीनपुंसकेलभ्येतेप्राग्वदिति। अवय ॥राम॥
विनासमस्यतइत्यादीत्यर्थः। अर्द्धंपिप्पलीनामिति। इहत्वर्द्धपिप्पलीतिप्राप्तंपरवल्लिंगातिदेशो ॥११६॥

मा॰२ अर्द्धमरणमित्यर्थः॥६

पिवत्तनातिदेशाभावाद्विशेष्यैक्याद्वेतिभावः॥कथंतर्ह्यर्द्धपिप्पल्यइति॥अर्द्धानिपिप्पलीनामि
तिविग्रहेऽर्द्धमतःखंडसमुच्चयेतुमविष्यति॥अर्द्धपिप्पलीवार्द्धपिप्पलीवेत्यादिविग्रहात्॥एक
देशिनेतिकिम्॥अर्द्धपिशोर्देवदत्तस्य॥अत्रदेवदत्तःस्वामीनत्ववयवीति॥तेननसमासः
एतत्सूत्रंपरवल्लिंगमित्यत्रभाष्येप्रत्याख्यातम्॥तथाहि॥अर्द्धपिप्पलीतिकर्मधारयेण
सिद्धम्॥समुदायेदृष्टाःशब्दाअवयवेऽपिवर्त्तंतइतिन्यायात्॥समप्रविभागादन्यत्रापि
तवाप्येषैवगतिः॥अर्द्धहारः॥अर्द्धजरतीयम्॥अर्द्धवैशसम्॥अर्द्धंकिमर्द्धविलोकि
तमित्यादिदर्शनात्॥नचसमप्रविभागेषष्ठीसमासंबाधितुमिदंसूत्रमितिवाच्यम्॥ष
ष्ठीसमासस्यापीष्टत्वादिति॥तथाचकालिसंप्रायुङ्क्त॥प्रेम्णाशरीरार्द्धहरांहरस्येति॥
द्वितीयतृतीय॰॥निषेधंबाधित्वेति॥भाष्यकारास्तुपरवल्लिंगमितिसूत्रेतत्पुरुषग्रहणं
द्विगुप्राप्तेत्यादिवार्त्तिकंपूर्वापरेत्यादिसूत्रंचप्रत्याचख्युः॥तन्मतेभिक्षाद्वितीयादि
सिद्धयेपूरणेत्यादिनिषेधस्यानित्यत्वमाश्रयणीयंसंज्ञाप्रमाणत्वादित्यादिनिर्देशानां

म॰सु॰ सामान्यापेक्षयाज्ञापकता च। एवं सति तान्युक्तं षष्ठ्यन्त्यपि सिद्धम्। प्राप्तापन्ने॰। अपवादाभा
वे उत्सर्गस्यैव स्थितिरित्यस्यैव बाधकम्। यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्राप
वादेन विनिर्मुक्ते उत्सर्गोऽपि भवति। अत्र वकारेण विधेयसमुच्चयार्थेनाकारप्रश्लेषानुमा
नात्। प्राप्तापन्ने समस्येते॰ अ च अ त्वं च तयोः स्यादिति भाष्ये स्थितम्। अत्र वकारात्पूर्वम
व अकारं छित्वा सौत्रत्वात्प्रकृतिभावो नेति प्राञ्चः। इमं क्लेशं परिहरन्नाह द्वितीयाऽ इति
प्राप्तास्त्रीति। एकादेशस्य पूर्वांतत्वेन ग्रहणात्। लिंगविशिष्टपरिभाषया वा प्राप्तापन्नयो
ष्टावन्तयोरपि समासः। कालाः परिमाणिना। परिमीयते परिच्छिद्यते येन तत्परिमाणम्
परिच्छेदकं तद्वान्परिमाणी तदाह परिच्छेद्यवाचिनेति। कालाइति। कालविशेषवाचकाइ
त्यर्थः। कालसामान्यस्यापरिच्छेदकत्वात्। मासोजातस्येति। षष्ठीसमासे प्राप्ते वचनम्।
ननु जातः पुरुषस्तस्य वहस्तवितस्त्यादिकं परिच्छेदकं न तु कालः। तस्य क्रियामात्रपरि ॥राम॥
च्छेदकत्वादिति चेत्सत्यम्। साक्षात्क्रियां परिच्छिंदन्नपि कालः तद्द्वारा देवदत्तं परिच्छिन ॥११७॥

त्रियस्यहिजननादूर्ध्वंमासोगतःसमासजातइतिव्यवह्रियते।तत्रव्यवहारकालजननलक्षणयो
रन्तरालभावीमासोजननद्वाराजातमपिपरिच्छिनत्त्येव।इहविग्रहेषष्ठीनिर्दिष्टस्यापिवृत्तौ
प्राधान्यंबोधयितुंयस्यसइत्युक्तम्।अलौकिकेतुप्रक्रियावाक्येनास्यप्रवेशः।एवंबहुव्रीहा
वपि।एतावान्परोऽपिविशेषः।इहजातशब्दात्षष्ठी।चित्रगुरित्यादौतुद्वाभ्यामपिशब्दाभ्यां
प्रथमैवसमानाधिकरणानांबहुव्रीहिरितिवक्ष्यमाणत्वात्।विशेषणविशेष्यभावव्यत्या
सेनैकार्थीभावइतितुल्यम्।यत्तुमीमांसकाश्चित्राणांगवामयमितिविग्रहन्ति।तत्रेदंवक्त
व्यम्।उक्तरीत्यावृत्तिवाक्ययोःक्वचित्प्रधानार्थसाम्यलाभेऽपित्रिषष्ठ्यर्थबहुव्रीहौपंचवि
धेपिकर्मकरणादिप्राधान्यस्याभिमतस्योक्तविग्रहादलाभात्।वृत्तिवाक्ययोर्महान्विप्र
कर्षःस्यात्।कृतंविश्वःप्राप्तोदकोग्रामइत्यादौकर्तृकर्मणोःसमासेनाभिहितत्वान्नका
रकविभक्तिरित्यादिसिद्धान्तस्यानिर्विवादत्वात्।किंचालौकिकेप्रविष्टानामेवपदानान्तरेण

यत्कर्तृकैरणकर्मीभूतंविश्वम्।यत्कर्मकप्राप्तिकर्तृउदकम्।अयंवाक्येशाब्दबोधः।२

क१

म॰स्तु॰ रिनिष्ठितानांलौकिकेऽपिप्रवेशासंभवेदुपस्थितपरित्यागेनानुपस्थितकल्पनंअन्याय्यम
सांप्रदायिकंच।तदनुगुणतयैवपदान्तरप्रक्षेपगौरवंतुफलमुखत्वान्नदोषावहम्।अतए
वाक्यार्थेतत्पदंदातुंप्रायेणविषयेऽपिति।लौकिकोवाक्यभेदेनविग्रहोवृद्धसम्मतः।अथ
वामाऽस्तुतच्छब्दः।प्रधानार्थसाम्यमपिऔत्सर्गिकमित्याश्रीयताम्।तथाहरिणाक्वचिद्गुण
प्रधानत्वमर्थानामविवक्षितमित्युपक्रम्य।आख्यातंतद्धितार्थस्ययत्किंचित्पददर्शकम्।गुण
प्रधानभावस्यतत्रदृष्टोविपर्ययइत्युक्तम्।तद्धितग्रहणंकृतामप्युपलक्षणम्।तेनआह्निकः
वैयाकरणःयावकःइध्मव्रश्चनइत्यादीनांविग्रहवाक्यादीन्युदाहरणम्।स्यादेतत्।चित्रगु
देवदत्तइतिसमासतद्धितवृत्त्योरलौकिकेप्रक्रियावाक्येऽपिचित्रागोदेवदत्त।एतेशब्दाःषष्ठ्यन्ताएवेति
मीमांसकाशयइतिचेन्नैवम्।शेषोबहुव्रीहिः।त्रिकतःशेषः।अस्तिसामानाधिकरण्येमतु ।।राम।।
प्।समर्थानांप्रथमादित्यादिसूत्रभाष्यविरोधेनवृत्तेरेवतत्रदुर्लभत्वादितिदिक्।प्रकृतमनु ।।११८।।

(236)

सरामः। उत्तरपदेनेति। परिमाणयुत्तरपदहेतुकद्विगुसिद्ध्यै बहूनां तत्पुरुषो वक्तव्य इत्यर्थः। सुप्सुपेत्ये
कत्वस्य विवक्षितत्वादप्राप्ते वचनम्। अक्षादेश इति। त्रिपदतत्पुरुषानन्तरमुत्तरसूत्रे परतो वान्तर
द्विगोः सतीति भावः। सप्तमी शौण्डैः। बहुवचननिर्देशाद्गणपाठसामर्थ्याद्वाद्यर्थावगतिरित्य
भिप्रेत्याह शौण्डादिभिरिति। शौण्डः प्रवीणः। इह आसक्तिरूपा क्रिया वृत्तावन्तर्भवतीति तद्द्वा
रकं च सामर्थ्यम्। यथा दध्योदनगुडधानादौ। तेन कारकाणां क्रियैव संबंध इति नियमस्य भ
गो नेति बोध्यम्। अधिशब्द इति। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्य तु अव्ययी
भाव एव। अधिहरीति यथा। अन्तःशब्दोऽप्यत्र पठ्यते स चाधिकरणप्रधानः मध्ये इत्यर्थस्तद्यो
गेऽवयविनः आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति। वनेऽन्तः वनान्तर्वसति। यस्तु अधिक
रणत्वमात्रवृत्तिरन्तःशब्दस्तस्य विभक्त्यर्थ इत्यव्ययीभावो नित्यसमासः। प्रनिरन्तरिति णत्वम्। अ
न्तर्वणम्। यत्तु हरदत्तेनोक्तम्। तत्पुरुषस्य वैकल्पिकत्वात्पक्षेऽव्ययीभाव इति। तच्चिन्त्यम्। तत्पुरुष
स्य वैकल्पिकत्वेऽपि अव्ययीभावस्य नित्यत्वाद्वनेऽन्तरिति त्वदुक्तविग्रहस्यासंगतेः। किं च। वि

१०सु० भक्त्यर्थमात्रवृत्तेरव्ययीभावः वचनग्रहणसामर्थ्यात्। अन्यथावृक्षस्योपरीत्यादावतिप्रसंगाच्च।
तत्कथं मध्यवाचिनः प्रसंगः। किंच। अत्र प्रक्रियावाक्यान्तर्गतविभक्त्यर्थवृत्तेरेवाव्ययस्य समासः
सन्निधानात्। तत्सामर्थ्यादेव निपातेनाभिहितेऽपि सप्तमीति स्थितम्। नचैतदिहास्ति अव्ययवि
नऽआधारत्वविवक्षायां सप्तमीति त्वयैवोक्तत्वादिति दिक्। यदप्याहुः। अन्तःशब्दोऽधिकरणप्रधा
नः तत्सामानाधिकरण्याद्वनात्सप्तमी वनरूपे मध्ये इत्यर्थात्। वनेऽन्तर्वनान्तर्वसतीति पूर्वपदार्थ
प्राधान्ये तु अव्ययीभावः वनस्यान्तरन्तर्वणमिति। अत्रेदं वक्तव्यम्। सामानाधिकरण्ये सप्त
मीत्यसंगतम्। व्यधिकरणसमासप्रकरणात्। विशेषणं विशेष्येणेत्यनेनैव गतार्थत्वात्। किंच।
मध्यवाचिनाव्ययीभावो दुर्लभः। लक्षणाभावात्। अथाव्ययमिति योगविभागेन कथंचिदुपप
त्तिं ब्रूषे ऽपदिशामिति यथा तर्हि तथैव रूपेऽपि नित्यसमासत्वादविग्रहत्वं स्यात्। तथा च वनस्यान्त
रिति त्वदुक्तिर्विरुध्येत। दिक्संख्ये संज्ञायाम्। नियमार्थमिति। कथं तर्हि त्रिलोकनाथेन सतां ॥राम।
मखद्विष इति कालिदासः। त्रिलोकशब्दस्यासंज्ञात्वात्। नच समाहारे द्विगुः द्विगोरितिङी ॥११९।

पूर्वसंगात्।नवपात्रादित्वंकल्प्यम्।यदित्रिलोकीगणनापरःस्यादितिप्रयोगविरोधात्।नवोत्तर
पदइतिसमासःत्रिपदतत्पुरुषस्येष्टदुर्लभत्वात्।अत्रोच्यते।लोकशब्दःऽत्रलोकसमुदायप
रःत्र्यवयवोलोकस्त्रिलोकःशाकपार्थिवादिः।एतच्चद्विगोर्लुगनपत्यइतिसूत्रेभाष्यएव।
स्पष्टम्।एतेननवरसरुचिरामित्यादिव्याख्यातम्।तद्धितार्थेएकापिसप्तमीविषयभेदा
द्भिद्यतइत्याशयेनाह।तद्धितार्थविषयेइत्यादि।सर्वनाम्नइति।एतच्चपूर्वापरोदाहरणान्व
यिायद्यपिस्त्रियाःपुंवदित्यनेनापिप्रकृतनिर्वाहःसिद्धःतथापिदक्षिणपूर्वेत्यादिसिद्ध्यर्थं
सर्वनाम्नइत्यावश्यकंप्रतिपदोक्तत्वादिरूपन्याय्यमितिभावः।षाण्मातुरइति।मातुरुत्संख्ये
त्युत्।अनपत्यइत्युक्तेद्विगोर्लुगितिलुङ्।विकल्पेप्राप्तइति।प्राचांग्रंथमनुसृत्योक्तम्।वस्तु
तस्तुत्रयाणांसमासेकृतेऽन्यपदार्थोपसंक्रमेणपरस्परसंबंधाभावात्द्वंद्वतत्पुरुषयोर
प्राप्तौसत्यांवचनमिदमितिबोध्यम्।तत्रतद्धितार्थेतिसूत्रेणोत्तरपदेपरेतत्पुरुषोवचन

दक्षिणस्
:पूर्वस्या
दिशोःअं
रालेदिक्

रितिपूर्वपक्षेरवयित्वातंत्रोपष्टंभकतयाकात्यायनवचनमिदमुपन्यस्तम्। यद्वनेरुद्धइतिसि

द्धान्तयित्वाकात्यायनवचनंतुसमासांतकृतविशेषमात्रविषयमित्युक्तेतदुभयमपिचिंत्यम्

उत्तरपदेइत्युक्तेर्द्वंद्वंकृत्वेत्यस्यासंगतेः। स्वरेविशेषस्यस्पष्टतयासमासांतपर्यंतमाग्रहेबी

जाभावाच्चानित्यसमासवचनमितिवार्त्तिकस्यसंकोचेप्रमाणाभावाच्च। संख्यापूर्वोद्विगुः।

अत्रोक्तइति। अयंभावः। पूर्वसूत्रविषयएवेयंसंज्ञा। अनंतरस्येतिन्यायात्। एतदर्थमेवसूत्रयो

गविभागःकृतः। अन्यथादिक्संख्येसंज्ञातद्धितार्थोत्तरपदसमाहारेइत्येवब्रूयात्। तेनसप्त

ऋषयइत्यत्रइगंतकालेतिपूर्वपदप्रकृतिस्वरोनभवति। किंतुसमासान्तोदात्तएव। तथाचल

क्ष्यम्। सप्तऋषयस्तपसेयेनिषेदुः। सप्तऋषीणांसुकृतांयत्रलोकइत्यादि। सनपुंसकमिति।

एतच्चमूलेएवव्याख्यास्यते। कुत्सितानिकुत्सनैः। कुत्सअवक्षेपणे। मत्यादिसूत्रेचकारस्यानु

क्तसमुच्चयार्थत्वात्। वर्त्तमानेक्तइत्यात्रायेनाह। कुत्स्यमानानीति। तदर्थकानीत्यर्थः। वैयाक

द्विगुसंज्ञाश्रितम्।०७

250

म०सु०

रणखसूचिरिति। सूचयते खङ्गः। यः पृष्टः सन्नुत्तरमन्नं विस्मारयितुं खं सूचयति अन्यो निर्मत्लं गगनमिति स एवमुच्यते। दुर्दुरूट इति। दुल उत्क्षेपे। दुः पूर्वः। औणादिकः कूटप्रत्ययः। बकुलमन्यत्रापीति णिल्लुक्। रलयोरेकविषयत्वस्मरणाड्डः। विशेषस्य पूर्वनिपातार्थं सूत्रम्। प्रायेणाग्रे ऽप्येवमेव। शब्दप्रवृत्तिनिमित्तकुत्सायामेवायम्। संनिधानात्। तेनेह न। मीमांसको दरिद्रः। पूर्वसूत्रेति। पापाणकशब्दौ कुत्सनाभिधायिनौ तयोः पूर्वसूत्रेण समासे परनिपातः स्यात्

मिदं६

त्। तस्मात्पूर्वनिपातार्थं सूत्रमिति भावः। लाक्षणिकमिति। अत एव सामानाधिकरण्यान्मृगीव चपला मृगचपलेत्यादौ पुंवद्भावः। उत्तरपदोपस्थिता श्यामत्व चपलादिद्वारकमेव हि सादृश्यं गम्यते। सन्निधानात्। वागर्थाविवेत्यादावपि हि संनिहितसंपर्कादिद्वारकमेव सादृश्यं प्रतीयते। कथं तर्हि उपमानपरतेति चेत्। भूतपूर्वगत्या वाक्यार्थमादायेत्यवेहि। सामान्यवचनत्वं ॥राम॥ चोपमानोपमेयसाधारणधर्मविशिष्टोपमेयपरत्वं बोध्यम्। उपमितम्। केथं भाषाज्ञिः क्वाति ॥१२१॥

भाषां... छिरिवा१

गंभीर इति कैयटः। सामान्यप्रयोगस्त्वेनास्याप्राप्तेः। उच्यते। इह गांभीर्येण सादृश्यं न विव
क्षितम्। किंतु विततदुरवगाहत्वादिना तस्य चाप्रयोगोऽस्त्येवेति निर्बाधः समासः॥ विशेषणम्
ननु विशेषणविशेष्यभावे कामचारात् पावकपाठकादाविव नीलोत्पलादावपि अव्यव
स्थितः पूर्वनिपातः स्यादिति चेन्न। अत्राहुः। जातिशब्दस्य गुणक्रियाशब्दयोः समभि
व्याहारे विशेष्यसमर्पकत्वैव। तेन नीलोत्पलं पावकब्राह्मण इति व्यवस्थित एव प्रयोगः।
गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम एव। खंजकुब्जः कुब्जखंजः पा
वकपाठकः पाठकपावकः खंजपावकः पावकखंज इति। अत्र च मूलम् उपसर्जनमिति
महासंज्ञा अप्रधानं ह्युपसर्जनं गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। यद्वा विशे
षणविशेष्ययोः ससंबंधिकतया अन्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोपादानं निरू
ढविशेषणपरिग्रहार्थम्। निरूढिश्च प्रागुक्ता भाष्यकारादिव्यवहारादवसीयते। पूर्वापरा॰। निश्चीय
अपरस्येति। एतच्च पश्चादिति सूत्रे भाष्ये स्थितम्। बाहुलकादिति। एकेषु मुख्येषु वीरायते इत्यर्थः

म॰सु॰

॰समानं अधिकरणं ययोस्तौ समानाधिकरणौ। समानाधिकरणत्वो ऽस्येति समानाधिकरण॥४॥

पराक्रमते इति वा बोध्यं। श्रेणिकृता इति। एकेन शिल्पेन पण्येन वा ये जीवंति तेषां समूहः श्रेणिः। कृता कृतमिति। एकदेशाधिकरणत्वकृतम्। एकदेशांतरस्याकरणात्तदेवाकृतम्। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। सत्

मिति। एकदेशाविकरणत्वकृतम्। एकदेशांतरस्याकरणात्तदेवाकृतम्। सन्महत्परमगुणक्रियाशब्दैः सत्

समासे सदादीनां सर्वं निपातनियमार्थं सूत्रं। तत्पुरुषः समानाधिकरणः कर्मधारयः। अद्यंतम्। ओपवा

रिकं वा। समानाधिकरणश्च सधर्थः। भावित पुंस्कादित्यादि। एतत्त्वस्त्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते। ननु तेनै

व कर्मधारये सिद्धम्। जातीयदेशीययोस्तु तसिलादिष्विति सिद्धम्। तत्किमनेन सूत्रेणेत्याह पूरणीत्यादि।

तथेत्यादि च पुंसलक्षणे ति। स्तनकेशवत्यादियुक्तास्त्रीपोटेत्यमरस्यो व्याख्यातारः। हरदत्तस्तु नपुंसके पोटेत्याह।

तत्र मूलं मृग्यम्। अमरेण नपुंसकपर्याये ष्वस्यः पृथगेवास्य पाठात्। कठधूर्त्त इति। नाच कठत्वं कुत्स्यते ऽतः कु

त्सिता निकुत्सनीति गतार्थतानशंक्या। प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्तेः। कथं तर्हि जनयति कु

सुदृष्टां ति धूर्त्तको बालमत्स्यानामिति। कवधूर्त्त इति युक्तम्। सत्यम्॰ प्रमाद एवायमिति प्रामाणिकाः।

प्रशंसावचनैश्च। वचनग्रहणं रूढिशब्दपरिग्रहार्थम्। यत्तु यौगिकाः प्रशस्तशोभनरमणीयादयः। ॥राम॥

ये च विशेषवचनाः सुविमृद्धादयः। ये च गोण्यावृत्त्या प्रशंसां गमयन्ति सिंहो माणवक इत्यादयः ते ॥१२२॥

सर्वैर्युदस्यन्ते।कुमारश्चएतदेवेति।एवकारस्फुटसिद्धत्वद्योतनार्थः।ज्ञापकात्तरस्यापि संभवात्तथाहि।
युवाजरतीतिसूत्रेजरतीग्रहणंलिंगम्।नहियुवशब्दस्यपुंस्त्वेजरतीसामानाधिकरण्यंन्याय्यम्।यत्तुश्र
श्वादिभ्यःफञ्विधौसुपुंसिजातइतिगणसूत्रेपुंसीत्युक्तिरपीहज्ञापिकेति।तन्न।एकदेशेपूर्वोत्तरग्रहणे
नज्ञापकस्यमूलशैथिल्यात्।चतुष्पादोगर्भिण्या।मंडूकप्लुत्यानातिरित्यनुवर्त्तते।तेनेहन।कालाक्षीग
र्भिणी।चतुष्पा।किम्।ब्राह्मणीगर्भिणी।प्रत्युदाहरणेतुविशेषणमितिसमासःस्यादेवपूर्वनिपातेवि
शेषः।मयूरव्यंसकादयश्च।चकारोवधारणार्थः।समासांतरंव्यावर्त्तयति।धूर्त्तइति।तथाचगुणवचन
त्वात्पूर्वनिपातेप्राप्तेइदंवचनमितिभावः।अन्येत्वाहुः।मयूरइवव्यंसकोमयूरव्यंसकः।उपमाना
निसामान्यवचनैरितिसिद्धेपुनर्विधानंतत्पुरुषतुल्यार्थेतिस्वरोमाभूदिति।सत्युपमानसंशब्दने
नविहितेसमासेप्रवर्त्तते।अश्नीतपिबतेति।इहक्रियारूपस्यान्यपदार्थस्यप्राधान्यात्स्त्रीत्वाट्टाप्।
एवयेऽपि।राजान्तरमिति।अंतरशब्दोभिन्नवाची।मात्रंकार्त्स्न्येऽवधारणे।अंतरमात्रशब्दाभ्यां

म०सु०

सहनिसस समासः। नञ् उत्तरपदार्थप्रधानोऽयं समासः। तद्यथाहि। आरोपितत्वं नञा द्योत्यते। आरोप
मात्रं वा। विषयत्वं तु संसर्गः। तथा च अब्राह्मण इत्यत्र आरोपितो ब्राह्मण इति बोधे अर्थाद् ब्राह्मण
भिन्न इति पर्यवस्यति। अत एवानुपसर्जनत्वात् तस्मिन्नित्यादौ सर्वनामकार्यं सिध्यति। त
त्पुरुषस्यौत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं संसति निर्बाधम्। एतत्तदोरिति सूत्रेऽनञ्समा
सग्रहणं चेह लिंगम्। मीमांसकादयस्तु ब्राह्मणभिन्न इत्यादिः शाब्दबोध एवेत्याहुः। तन्मतेऽ
स इत्यादेः अतिसर्व इत्यादि समकक्षत्वात्सर्वनामसंज्ञाकार्यं गणकार्यं च न स्यात्। तत्तु तत्सा
दृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता इति
पठित्वा अब्राह्मणः। अपापम्। अनश्वः। अनुदरा कन्या। अपशवो वा अन्ये गोअश्वेभ्यः।
अधर्मः इत्युदाहरंति। ननु यथायथं आर्थिकार्थमस्ति चेत्स्य कथं विन्नेर्यम्। तर्न्थापि नञ्समा ॥राम॥

॥१२२॥

समस्योत्तरपदप्राधान्यं भाष्योक्तं नान्यथयितव्यम्। अत एवानेकमन्यपदार्थ इत्यत्रानेकशब्दस्येव बहुवचनं प्र
युक्तम्। माघेऽपि। सेव्यतेऽनेकया सन्नपांगयेति। कथं तर्हि पतंत्यनेके जलधेरिवोर्मय इति। उच्यते। अधारोपि
तिकत्वानां प्रत्यर्थं तया तया तत्र वास्तवबहुत्वाभिप्रायं बहुवचनम्। यद्वांऽशसमुदायबहुत्वेन बहुवच
नम्। रथोऽश्वोऽश्वोगजश्च एकमनेकस्ततः अनेकश्चानेकश्चेत्येकशेषात्। यत्तु प्राचीनप्रक्रियायां
लक्षणा आहुः। नञ्विशिष्टेनोत्तरपदेन सादृश्यादयो लक्ष्यंत इत्यादि। तत्स्वकीयग्रंथसंदर्भविरुद्धं
च। यदपि विचारचिंतामणावुक्तम्। समासे तत्तरपदप्राधान्यं मा भज्ज्ञातवत्। नञैवार्थमिलितं तत्सदृशा
दीनि लक्षयेदिति॥१॥ तदप्युक्तरीत्या भाष्यविरुद्धमिति स्पष्टमेव। यदि तु स्वातंत्र्यमेवावलंब्यते तर्हि कथंचित्समर्थयितुं
शक्यम्। तथाहि। अस्तु लक्षणैव० तथापि नञ्समासे उत्तरपदप्राधान्यप्रयुक्तकार्याणि लक्ष्यार्थे ते। अनञ्समास इ
ति ज्ञापकात्। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्था इति न्यायात्। समासे त्विति वदन्नवाक्येनोऽसमस्तत्वात् कि
ययैवान्वय इति ध्वनयति। यतः। संबोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो वतिः। धातुसंबंधाधिकारे निष्पन्नेमसम
स्तन ञ्१ तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्। साधुत्वमष्टकस्यास्य क्रिययैवाभिधारितम्॥२॥ युक्तं चैतत्।

आधारे
तं एकत्व
षु ते आ
पिकत्वा

=यथाब्राह्मणे ब्राह्मणत्वं सामान्यम्। तत्र ऋग्वेदित्वादिको विशेषः।

सु०

त्वं पचसि युवां पचथ इत्यादौ न ञ्समासमभिव्याहारे क्रियापाएव निषेधप्रतीतेरनुभवसिद्धत्वात्। भवति प्रयोगेऽपि तथैवन्याय्यत्वात्। घटो नास्ति पटो नस्तः। अहं तत्र नास्मीत्यादौ वचनपुरुषव्यवस्थादर्शनाच्च। अन्यथाऽर्थाभावेऽव्ययीभावस्य दुर्वारत्वाच्च। यत्तु भ्रूतलाधेयस्वभाववान् घट इत्यर्थवर्णनम्। तन्न। क्रियानन्वये कारकविभक्तेर्दुर्लभत्वात्। तस्मात्कारकविशिष्टक्रियाया नञर्थेऽन्वयः शाब्द इत्येव तत्त्वम्। भाष्यवार्त्तिके सुपलक्षणं। सांप्रदायिकरीत्या पूर्वपदार्थप्राधान्येऽव्ययीभावः। अभावविशेषविवक्षायां तत्पुरुष एव। तस्य नञर्थलाभावेन पूर्वपदार्थप्राधान्यासंभवादिति। तत्र। पापाभावोऽपापमिति स्वोक्ततत्पुरुषोदाहरणेऽपि अभावत्वेनैवाभावभानेनाव्ययीभावस्य दुर्वारत्वात्। यदपि विशेषस्य नयर्थत्वं नास्तीति तदपि न० निर्विशेषस्य सामान्यस्याभावात्। विशेषरूपेण वाच्यत्वं नास्तीति चेत्। तर्हि यत्र अविघ्नमित्यादिरव्ययीभावे दत्तजलांजलिरेव स्यादिति न किंचिदेतत्। न ञो नलोप इति। विङ्‌तेन समासाभावाद्द्वयाप्तेर्वचनम्। अपचसीति। कुत्सितं पचसीत्यर्थः। नशब्देनेति। नञा समासे त्वनेकधेदं स्येवभवतीति भावः। उर्यादिच्विडा वश्च। च्विडाचौ क्त्वं स्त्रियोगे विहितौ उर्यादयो पि स्वभावात् तत्रैव प्रयुज्यन्ते। तत्रापि आविः प्रादुःशब्दौ मुक्त्वाऽन्येषां करोति नैव योग इति माधवादिग्रंथे स्थितम्। तथैवोदाहरति। उरीकृत्य ... सात्तु साक्षात्प्रभृतिषु पाठात् कृञ्योगे गतिसंज्ञाविकल्पः। भ्वस्तियोगे तु ... मिति विशेषः। तथा तर्हि ...

॥राम॥

॥१२४॥

247

विषं किमथाऽविश्वस्तुषोऽभवदसाक्विरामइतिमाघः। अभवन्युगपद्विलोलजिह्वा युगल [illegible] गमा
विरितिच। निरंकुशाः कवय इति हरिदत्तः। वस्तुतस्तु नेशाग्धातोरितिसूत्रस्य प्रयोगनियमार्थत्वे प्रकृतेऽनुपपत्ता
वपि संज्ञानियमार्थत्वपक्षे दोषलेशोऽपि नास्तीति प्रपंचितं शब्दकौस्तुभे। एतेन पुरो रामस्य जुहवांचकार ज्वलने
वपुरिति भट्टिर्व्याख्यातः। हतं परिगृह्येति। हत्वा गमनं द्विधा हतं त्यक्त्वा परिगृह्य चेति। आद्युदाहरणं द्वितीयं प्रत्युदा
हरणम्। अपरिग्रहे इति च। प्रयोगपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति। अतिशयेनाभिलष्य
तन्निवृत्तिपर्यन्तं पिबतीत्यर्थः। पुरस्कृत्येति। तत्र अस्य द्वायां अपगमान्वस्ति घातो गम्यते। प्रत्युदाहरणं तु क
णेहत्यागतः। सूक्ष्मस्तंडुलावयवः कणस्तस्मिन्हत्वेत्यर्थः। पुरस्कृत्येति। नमस्पुरसोरिति सत्वम्। कथं तर्हि
अमुं पुरः पश्यसि देवदारुमिति। स्थितिमित्यध्याहारेण द्वितीं प्रत्यगतित्वात्। एतेन तस्य स्थित्वा कथमपि पुरः
कौतुकाधानहेतुरिति व्याख्या। अस्तं च। अव्ययमिति किम्। अस्तं कांडं क्षिप्तमित्यर्थः। अदः कृत्येति। यदा
त्स्वयमेव पर्यालोचयति तदेदमुदाहरणम्। तिरोऽन्तर्द्धौ। अन्तर्द्धौ किम्। तिरोभूतो भूत्वा स्थितः। पार्श्वतो भूत्वेत्य
र्थः। विभाषा कृञि। तिरः कृत्वेति। गतित्वाभावपक्षे सत्वमपि न। तिरसोऽन्यतरस्यामिति सत्वविधौ गतिग्रह
णानुवृत्तेः। केचित्तु परा भवेति रस्कारस्य प्रयोगमनुरुंधानाः सत्वविधौ गतिग्रहणं निवर्त्तयंतीति माधवः। वार्तं

य

म॰सु॰

नियम्येति। निर्वचनवचनाभावः। अर्थाभावेऽव्ययीभावः। इह अविशेषेण एदन्तता निपात्यते तेन तु संज्ञासन्नियोगेन। प्रगत आचार्य इति। अनेन गतार्थवृत्तिं अस्वपदविग्रहेण नित्यसमासतां च दर्शयति। अतिमाल इति। एवं अभिगतो मुखं अभिमुखः। उद्गतो वेलां उद्वेलः। प्रतिगतोऽक्षं प्रत्यक्षः। उपपदमिति। तिङ्। अतिङिति नोपपदस्य विशेषणम्। किं तु समासस्य। एतच्च अनवक्लृप्त्यमर्षयोरिति सूत्रे भाष्ये एव स्पष्टम्। तर्हि किं वृत्तस्यानधिकारादिकं वृत्तग्रहणानर्थक्यमित्युक्त्वा उपपदसंज्ञार्थं तर्हीत्याशंक्यातिङिति समासप्रतिषेधात्संज्ञाऽनर्थक्यमिति सिद्धांतितम्। तदेतदभिप्रेत्याह अतिङन्तश्चेति। ननु सुपेत्यधिकारात्तिङन्तेन न भविष्यति तत्राह अतिङ्ग्रहणमिति। पूर्वसूत्र इति। कुगतिप्रादयः सुबन्ताः सुबन्तेन समस्यन्ते। ततः गतिः। गतिः सुबन्तोऽतिङन्तेन समस्यते इति व्याख्येयमित्यर्थः। तथा चेति। यद्यप्युक्तरीत्या गत्युपपदयोरेव केवलाभस्तथाऽपि त्रितयविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा इहापि स्थाप्यत इति भावः। यद्वा। कारकांशो कर्तृकरणे कृतेतिसूत्रस्थं बहुलग्रहणमुक्तार्थसाधकं बोध्यं। प्रागिति। कृदन्तादुत्तरपदात्सुबुत्पत्तेः प्रागित्यर्थः। प्रथमांतं तु सुब्ग्रहणमिहानुवर्त्तत एव। अजएवराजदशीत्यादौ पूर्वपदेन लोपादिपदकार्यं सिध्यति। परिभाषायाः फलं दर्शयन्नुदाहरति व्याघ्रीति। व्याजिघ्रतीति व्याघ्री। आतश्चोपसर्गे इति कः। पाघ्राध्मेति शप्रत्ययस्तु संज्ञायां ते निवक्ष्यते। व्याङोर्घ्रा इत्येन गति

॥राम॰

॥१२५॥

समासः। स यदि घटाद्युत्स्य सुबंतनामपेक्ष्येत न हि सुबुत्पत्तये संख्याद्यपेक्ष्यंते। ततः प्रागेव लिंगयोगः लिंग
निमित्तश्च प्रत्ययष्टाबेव स्यान्न तु ङीष्। घटाद्यमात्रस्य जातिवाचित्वाभावात्। ततो घटाद्येन समासे सति अदंतत्वा
भावाज्जातिलक्षणो ङीष् न स्यादिति भावः। उपपदमुदाहरति। कच्छपीति। कच्छेन पिबतीति कच्छपी। व्याघ्रीवत्सुपीति पी
योगभागात्कः। न तु आतो उपपदमतिङंतरमिति व्याख्याते तन्त्र। तथा सति प्रथमांतेन सुब्ग्रहणनिवृत्याबहुवि
पूर्वापत्तेः। तथाहि। निर्गत इत्यत्र निसो रुत्वं संयंते स्य त्र मोऽनुस्वारः। राजदर्शी त्यादौ न लोपश्च स्यात्। प्राटिति त्यादौ
आतो गुण इति पररूपं च स्यात्। तिङ्क्ष्म। एधानाहारको व्रजतीति प्रसुदाहरणमपि प्रयुक्तम्। यदपि कुगतीति सूत्रे
उक्तम्। अत्र सुप्सुपेत्यननुवृत्तेस्तिङापि समासः। ऊरीकरोतीत्यादि तदपि सत्। तत्र शेषी कृते नातीङ्ग्रहणेनैव वि
रोधात्। तिङः समासस्तु सयेति योगविभागबललभ्यश्छान्दस श्चेति प्रागेवोक्तम्। लोके तु प्रभवतीत्यादौ उपसर्गपृ
थक्पदमेव काव्यादिपाठिनामेकपद्यं च मे तु धातूपसर्गयोः संहिताया नित्यत्वं मूलम्। कथं तर्हि अत्र आया
हीत्यादौ पदपाठे उपसर्गेष्ववसानमिति चेत्। पदपाठस्यापि व्याख्याविशेषतया तत्रानुकरणशब्दत्वेनोपसर्गत्वाद। आवा३
प्रकृतिवदनुकरणमित्यतिदेशस्य वैकल्पिकत्वाद्य तदेतेभ्य इति सूत्रे स्यदाद्यत्वं कुर्वता एकशेषं चाकुर्वता सूत्रकृतैव त
था ज्ञापितत्वादिति दिक्। अमैवाव्ययेन। तुल्यविधानमिति। एतच्चाप्याहारेण लभ्यम्। तदेवेति। नियमस्वभावलब्धा य

म० सु०

र्थकथने परोऽयमेवकारः। न तु सूत्रस्थः। अव्ययेनेति किम्। कुंभकारः। असति ह्यव्ययग्रहणेऽमैवयत्तुल्यविधानं तदेव
समस्येत। पूर्वसूत्रारंभसामर्थ्यादव्ययविषयक एवायं नियम इति चेत्। तर्हि अमन्तविषयक एव किं न स्यात्। अयं तेन
यः समासः सोऽमैव तुल्यविधानस्येति। तथा च अग्रेभोजमित्यत्र माभूत्। अग्रेऽभुक्त्वा कालाभोजंभित्यत्र तु स्यादे
वेति भावः। तृतीयाप्रभृतीन्यन्यतरस्याम्। उभयत्रविभाषेयम्। अमैव तुल्यविधानस्य प्राप्ते यथा। उपदंशस्तृती
यायामिति। यत्तु अमा चान्येन च तुल्यविधानं मूले। तस्याप्राप्ते यथा। अव्यये यथाभिप्रेताख्याने इति। उच्चैः कारमाचष्टे।
इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः। आदिर्णमुल्यन्यतरस्यामित्याद्युदात्तत्वम्। असमासे तु तु उच्चैरित्यंतोदा
त्तं। स्वरादिषु तथापाठात्। अमैवेत्यनुवृत्तिमपि प्रेत्याह अमन्तेनेति। तेनेह न। पर्याप्तो भोक्तुम्। न तु रुषस्यांगुलेः स
मासांतोपेक्ष्याऽवयवषष्ठी। द्व्यंगुलमिति। द्विगोर्नित्यमिति द्वयसचो लुक्। द्वंद्वार्थमिति। न तु रुषस्या संभवादि
ति भावः। ननु अहश्चासौ रात्रिश्चेति कर्मधारयोऽस्तु। पूर्वोत्तरपदयोरन्यतरस्य गौणत्वसंभवादिति चेत्। मुख्य
संभवे गौणग्रहणायोगात्। हेमंतशिशिरावहोरात्रे च छंदसीति सूत्रे द्वंद्वसमासांतदर्शनाच्च। अहोरात्र इति।
जातिरप्राणिनामिति समाहारद्वंद्वः। रात्राह्नाहाः पुंसीति पुंस्त्वम्। यत्तु प्राचोक्तम्। एकवद्भावात् क्लीबतेति तन्न।
स नपुंसकमित्यस्य रात्राह्नाहा इति पुंस्त्वेन परत्वाद्बाध इति वक्ष्यमाणत्वात्। आकरविरोधाच्च। द्विरात्रमिति। संख्या ॥राम॥
॥१२६॥

२४१

खो॰ १ पूर्वरात्रं क्लीबमिति वक्ष्यते। अह्नष्टखोरेवेति। न स्त्रा द्वितद्वये वसिद्धे नियमार्थमिदम्। एवकारस्तु स्पष्टार्थः। अह्न एव टखयो
रिति विपरीतनियमस्तु न भविष्यति। आत्माध्वानौ ख इति प्रकृतिभावविधानाल्लिंगात्। अनि सखादिति। अत्र च
लिंगमत्र ज्ञापकं लिंगं लोकुशो सत्रघटीयहणम्। अह्नोऽह्न एतेभ्यः। अहः सर्वैतिसूत्रे अहरादयो निर्दिष्टाः। चकारेण
च संख्यायेनुकृष्टेन च सर्वेषां बुद्धिस्थत्वाविशेषेऽपि अहः शब्द इत न ग्रहणेऽसंभवादिसान्नाये नाहः सर्वादिभ्य
इति। समासांतपरइति। प्रकरणबललभ्यमेतत्। प्राचा तु टचि परत इति व्याख्यातं तदपि सामर्थ्यलभ्यमिति क
थंचिन्नेयम्। भाष्ये तु अह्नादेशः प्रत्याख्यातः। अह्न एभ्यः अचु स्यात् टचोऽपवादः। अह्नष्टखोरेवेति नियमादि

=अह्नांलस्य इति विग्रहः। ६

लोपो न। अह्नलोपोऽन इति व्युत्पादनात्। अह्नोदंतात्। रेफादिति। यदि लक्ष्याह्नमित्यपि प्रयोगोऽस्ति तर्हि बादिस्य
पि बोध्यम्। रषाभ्यामित्यधिकारात्। अत्रपांचः। अह्न इति षष्ठ्याः स्थाने व्यत्ययेन प्रथमा। अदंत निर्देशानैन्ने ह।
दीर्घाह्नी प्रावृडिति वदंति। तत्र व्यत्ययादिवर्णनक्लेशो व्यर्थः। दीर्घाह्नी सत्र प्रातिपदिकांतेति णत्वव्यावर्तयितुं दी
र्घाह्नादित्वस्यैव वक्तव्यत्वादाकार एव तथोक्तत्वाच्चे सात्रायेना ह्ह्नोनस्येति। प्राचस्तु अह्नोनस्येत्युक्त्वा अदंत निर्दे
शादिति वदतो व्याघातः स्पष्ट एव। कालाद्द्विगुश्चेज्जिति। एतच्च संख्याविशायेति सूत्रे न्यासपदमंजर्योः। ओहाङ्
धातौ माधवग्रंथे च स्पष्टम्। यत्तु न संख्यादेः समाहार इति सूत्रे ह्यह्न इत्यत्र णो लुगिति वृत्तिकारादिभिरुक्तं तद

२५२

म०सु०

युक्तमिति भावः। प्रसंगादिह स्त्रियामिति। टाविति। यत्तु प्राचा कालनिर्णयदीपिकायां ग्रहणं सर्वस्यान्तवर्मास्तुभाथ दशमीका
लास्पृग्याप्याथ साद्यह्नी काल युगादिमो न्तरयुक्तावाथो न्तरैकादशीति श्लोके द्व्यह्नीति प्रयुक्तम्। सादशमीद्वयोर्द्व
र्णवाद्यह्नीत्यादि वनाद्विवरणे व्याख्यातं तत्सर्वं प्रमादिकमिति भावः। तथा हि। इह टिड्ढेति ङीप्प्रद्विगोरिति वा। आद्ये
ऽपि। अणन्तत्वादुत्पन्नत्वाद्वा टृजन्तत्वाद्वा। नाद्यः। टत्तिकाराद्युक्तेः स्याणद्वयसमाणादिकत्वात्तु कालुप्रत्वाच्च। न च प्रत्यय
लक्षणेन। अण्योऽकार इति व्याख्यानात्। नापि द्वितीयः। ठञोयोऽकालैरस्तनं तादिति व्याख्यानात्। अत एव हि
द्विनिष्केत्यत्र क्रीतार्थे प्राग्वतीयस्य ठञो लुकि टाबेवाकरेठदाहृतः। द्विविस्तेत्यादावप्येवम्। नापि तृतीयः। टचः
समासान्तत्वात्तदन्तस्य तद्धितार्थसर्ज्जनत्वात्। अत एव हि आपिशलिनाप्रोक्तमधीयाना ब्राह्मणी आपिशली। सुदाहृ
तम्। नाद्यमते अत्र चाटकोवधानात्। नापि चतुर्थः। अपरिमाणेत्यादिना ङीपो निषेधात्। तस्माट्टाबेव युक्तः। स्या
देतत्। टाबथ युक्तः। स्त्रीत्वस्यैव दुर्लभत्वात्। तथा चाह्नोऽह्न एतेभ्य इति सूत्रे कैयटहरदत्तावाहतुः। रात्र्याह्नाहाः पुं
सीति वचनात् स्त्रियां वृत्त्यभावात्। जटच्चो न्यास्तीह विशेष इति। मैवम्। भावानवबोधात्। इत्थं हि कैयटाद्या
शयः। सर्वादिषष्ठ्यपूर्वादह्नष्टजपवादोऽभिहिताः। तत्र संख्यापूर्वस्य तद्धितार्थद्विगोर्विशेष्यनिघ्नत्वे न स्त्री
त्वसंभवेऽपि जन्तस्य तद्धितं प्रत्युपसर्ज्जनत्वात्। अनुपसर्जनाधिकारोक्तः स्याट्टिड्ढेति ङीपः प्राप्तिरेव नास्तीति

॥रा॰
॥१२

283

तत्र जडयोरविशेषः स्पष्ट एव। पुण्याहं इत्यत्र तु अत्रैमैकाभ्यां चेत्यत्र यो निषेधः अह्नादेशस्य चेति मतभेदेन व्यव
स्थितम्। इतरेषां चतुर्णां तु रात्राह्नाहाः पुंसीति वचनात् स्त्रियां प्रतिनिषेधोऽस्तीति। स्यादेतत्। भवेदेवं वृद्धानामाश
यः। यद्युत द्विगोर्विशेष्यनिघ्नत्वे प्रमाणं स्यात्। तदेव किमिति चेत् उच्यते। अमरसिंहेन पुंस्त्वे सप्तेदानुचराः
सपर्यायाः सुरासुरा इति पुंस्त्वाधिकारे अह्नाहांताः द्वंद्वेकभेदाः रात्रान्ताः प्राक् संख्यकाः इत्युक्तम्। अर्थान्ताः शा
द्युलं प्राप्तापन्न पूर्वाः परोपगाः तद्धितार्थे द्विगुः संख्यासर्वनाम तदंतका इति च ततः परमुक्तम्। एवं चेह अह्ना
न्ता इत्यनेन पुंस्त्वं प्राप्तं तद्धितार्थे द्विगुरिति परोपगत्वे न परत्वादेव बाध्यते। तथा च तेनैव परिभाषितम्। परं विरोधे शे
षं तु ज्ञेयं शिष्टप्रयोगत इति। तस्मादमरग्रंथः उक्तार्थे प्रमाणम्। किं चापरवल्लिंगमिति यस्य रात्राह्नाहाः इत्यपवा
दः। यत्र तु द्विगुप्राप्तेत्यादिनोत्सर्गो निषिद्धः तत्र तदपवादस्याप्रवृत्तिः स्पष्टैव। एतच्च माधवेनापि ध्वनितमित्यनुपद
मेव वक्ष्यामः। किं चाभावाद्यर्थतद्धितांतं परोपगमिति निर्वादम्। तद्धितलोपे तु यः शिष्यते स लुप्यमानार्थाभि
धायी इति न्यायेनाभावाद्यर्थवत्त्वस्त्रीत्वादेरणपि धानं न्याय्यमेव। प्रकृते लिंगानुशासनस्य केवलायां प्रकृ रात्राह्नाह
तावुपक्षीणस्य लुप्ततद्धितायां अप्रवृत्तेः। लुपि युक्तवदिति लिंगातिदेशोऽपि अत्र प्रमाणम् [illegible] पुंसि [illegible]

म०सु

नानां लुमनुष्येषु प्रवृत्तेनोत्तरपदेन सामर्थ्यापत्तेः। अत एव लवणः सूपः। लवणा यवागूः इत्यादौ न स्त्रीवत्त्वम्। अत एव चकु-
मारी ब्राह्मण इत्यादिषु आचारक्विबन्तप्रकृतिककर्तृक्विबन्तेष्वपि विशेष्यनिघ्नतैवाकरेऽस्पष्टा। ष्यङीति ङीपं वदता
पा चापि स्त्रीत्वं स्वीकृतमेवेत्यलं बहुना। यदि समर्थनीयमेवेत्याग्रहस्तर्हि आधाराधेयभावव्यत्यासेन समर्थ्यतां वे
अहनीयस्यामिति। दिनद्वयाधारभूते सर्थलाभात्। उपांत्यस्यापीति। यथाक्रमयोरिति प्रथमाद्वितीययोर्ग्रहणम्।
द्विवचननिर्देशात्। तथेहापि उत्तमग्रहणसामर्थ्यादेतयोर्ग्रहणम्। उत्तमौ च एकश्चेति विग्रहे सौत्रं मे द्विवचनमि-
ति तेषामाशयः। खार्याः प्राचाम्। द्विगोरिति। खारीशब्दान्ताद् द्विगोरित्यर्थः। द्व्यंजलमिति। समाहारे द्विगुः। आन्मह-
तः। पदाधिकारे तदन्तस्यापि ग्रहणान्महच्छब्दान्तस्यापि। कथं तर्हि परममहत्परिमाणमिति। परममहतो द्रव्यस्य प-
रिमाणमिति षष्ठीतत्पुरुष इति वृद्धाः। यत्तु वर्द्धमानेनोक्तं। इष्टकेषीकामालानामित्यत्र तदन्तविध्युपसंख्यानसामर्थ्या-
दुत्तरपदाधिकारे तदन्तविधिर्नास्तीति तद्भाष्यकैयटविरुद्धम्। तथाहि। पदाधिकारे प्रयोजनम्। इष्टकचितम्। पक्वे-
ष्टकचितमित्यादि भाष्ये उदाहृतम्। कैयटेन च पदशब्देनोत्तरपदं गृह्यते इति व्याख्यातम्। एतदेवार्थतः काशिका-
यामुपनिबद्धम्। न तु इष्टकेषिकेत्यत्र तदन्तत्वमुपसंख्यानमस्ति। महतीशब्दस्येति। यत्तु प्राचोक्तं जातीयघासादौ ॥राम
॥१२९

२५५

नीशब्दस्याप्याद्युदात्तत्वं वक्तव्यमिति तन्न जानीयेति तावदर्थः। पुंवत्कर्मधारयेति ॥ आन्महत इति चस्रत्वाभ्यामेव रूपसिद्धेः।
नीशब्दस्येत्यपि अपाणिनीयत्वादुपेक्ष्यम्। अष्टन इति। कपालेत्युत्तरपदे हविषि वाच्येऽष्टन आत्वं वक्तव्यमित्यर्थः। अष्टा
कपाल इति। संस्कृतं भक्षा इत्यणः। यत्तु अध्यर्धपूर्वेति लुगिति व्याचख्युः। तदृतिरभसात्। द्विगोर्लुगनपत्य इति तु बो
ध्यम्। व्यधिकार इति। एतच्च वार्तिकारूढमित्युक्तम्। यत्त्विह पूर्वपदप्रकृतिस्वरसिद्धये विस्पष्टादेराकृतिगणत्वं शर
णीकृतं तच्चिन्त्यम्। उपलभ्यमानस्य तादृशस्वरस्य द्वंद्वेन निर्वाहात्। स्वरान्तरेऽपीष्टे पत्नीबाधकाभावादिति दिक्।
एकादिः। अदुक्तिः आकारोच्चारणसामर्थ्यात्सवर्णस्य च। केचित्तु स्पष्टत्वार्थमादुक्तं दीर्घादिमादुः। रात्राह्नाहाः पुंसि।
परत्वादिति। यत्तु भाष्ये एकवद्भावात्क्लीबत्वे सुखरात्र्यहोरात्रमित्युदाहृतं तन्नेत्यवोचाम। यत्तु वदन्ति। रात्रादीना
मेवानेन पुंस्त्वं विधीयते तदन्तस्य तु परवल्लिंगमित्येव सिध्यति। अत एव भिन्नविषयत्वान्न विप्रतिषेधः। उक्तं।
एवं च समाहारे नपुंसकमित्येव भवति परवल्लिंगापवादत्वादिति। तन्न। उक्तरीत्या द्व्यहत्र्यहादावपि क्लीबत्वस्या
तो न चेष्टापत्तिः। भाष्यादिषु द्व्यहत्र्यहादिपूदाहृतत्वात् कोशकारविरोधाच्च। अमरो ह्याह। ते तु त्रिंशदहोरात्राः इति। मासे
न स्यादहोरात्र इति च। तस्मात्तदन्तस्यापि अयं पुंस्त्वविधिः। द्वंद्वतत्पुरुषयोरिति प्रक्रमणादिति स्थितम्। संख्या

म०स्तु०

पूर्वकमिति। तथा च लिंगानुशासनमिति सूत्रम्। अपथपुण्याहो नपुंसकौ। संख्यापूर्वं रात्रिमिति तीरे। अमरोप्याह। रात्रं प्राक्संख्ययान्वितमिति। गणरात्रं निशा बह्व्य इति च। पुंस्त्वाधिकारेऽपि चैवमेवाह। रात्राः ताः प्राक् संख्यका इति। एवं स्थिते द्विरात्रस्त्रिरात्र इतीयं तत्कारहरदत्तादिरुक्तं पुंस्त्वं प्रामादिकमेवेत्यवधेयम्। अर्द्धर्चाः पुंसि च। इह केषांचिदर्थभेदेन व्यवस्था। तथा च शाश्वतः। मकरंदस्य मधुस्यमाक्षिकस्यापि वाचकः। अर्द्धर्चादिगणे पाठात् तु नपुंसकयोर्मधु इति। अमरस्तु माध्वीकं मधुनद्यो रित्याह। पात्राद्यं तस्य नेति। स्त्रीत्वमिति शेषः। सुदिनाहमिति। सुदिनशब्दः प्रशस्तपर्यायः। तथा च प्रयोगः। सुदिना सुसभा सुकार्यमेतत्प्रविविच्यतीत विशेषतः स्वयं वेति। पथः। कथं तर्हि व्यध्वो दुरध्वो विपथः कदध्वा कापथः समास इत्यमरः। व्यध्वो विपथ कापथा वितिर्भस कोशश्च। अत्राहुः। प्रमाद एवायमिति। वस्तुतस्तु पथेगता विद्यमानस्य वाच्यविपथते व्याप्नोतीति पथः। अकारांतोऽयम्। तथा च त्रिकांडशेषः। वाटः पथश्च मार्गस्यादिति। तेन समासे पुंस्त्वम्। न चैवं विपथसिद्धावपि कापथो न स्यात् कादेशस्य दुर्लभत्वादिति वाच्यम्। ईषदर्थे चेति तत्संभवात्। कुत्सायामेव तत्पर्यवसानात्। इदं त्ववधेयम्। परवल्लिंगतापवादरूपत्वात् तत्पुरुष एवेदं प्रवर्त्तते नान्यत्र। विपथा नगरी। बहुव्रीहिरयम्। पंथानमितिक्रांता अतिपथा इहापि न। द्विगुप्राप्तापन्नादिना परवल्लिंगतायाः प्रतिषेधादिति माधवः। एवं च न्यायसाम्येनार्द्धर्चेऽपि रात्राह्नाहा इत्यस्य प्रवृत्तिर्नेति माधवेनोक्तप्रायम्। मृदुपचतीति। क्रियाविशेषणा ॥२

॥१

म०सु०

तेन दाहस्त्र प्रथमेति। समानैति। एतच्चशेषपदाल्लब्धम्। प्राप्तमित्यादि। ग्रामकर्मकप्राप्तिकर्तृ उदकं विग्रहार्थः। उदककर्तृ
कप्राप्तिकर्म्मेति समासार्थः। विग्रहे सइति प्रयोगे तु तस्यापयमेवार्थः। यद्यपि क्त प्रत्ययार्थस्य कर्तुर्धात्वर्थं प्रति विशेष्यतो वि
नातथाऽपि व्यपेक्षावादिभिरगत्या समासे भिन्नैव व्युत्पत्तिः स्वीकार्या। किंच। कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्यैव नामार्थ
तयोदकस्य तदभेदो वाच्यः। स च बाधितः। न हि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति। अपि च व्यस्ते समीचीनमुदकमि
ति वत्समस्तेऽपि उदकविशेषणप्रयोगः प्राप्तः। समस्ते तस्य विशेषणयोगो नेति वचनेनैव वारणीयः। सिद्धांते तु० बहूनां वृ
त्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आस्थितः। चकारादि निषेधोऽथ व्युत्पत्तिसंजनम्।
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितम्। ऊढेत्यादि। अनडुत्कर्तृकोद्वहनकर्मीभूतो रथः। रथकर्मकोद्वहनक
र्ता तु समासार्थः। रुद्रसंप्रदानकोपहरणकर्म पशुः। पशुकर्मकोपहरणसंप्रदानम्। स्थाल्यवधिकोद्धरणकर्मत्वौदनः। औ
दनकर्मोद्धरणावधिः स्थाली साहित्यर्थः। इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा। प्रथमार्थे त्विति। दृष्टे देवत्र नपी
र्नसमासोऽशेषत्वात्। इत्यत्र तात्पर्यम्। व्यधिकरणानामिति। अन्नापुक्त एव हेतुः। इत्थं शेषग्रहणफलमुपनिबद्धम्।
न चोन्मत्तगंगमित्यादिव्यावृत्तिरेव तत्फलम्। एकसंज्ञाधिकारेणैव तत्सिद्धेरिति भावः। अनेकं किम्। बहूनामपि य ।।राम
थास्यात्। तानडुद्धहरणं तु मूलएव स्फुटीभविष्यति। एवं चात्र सुब्विसे वानुव[illegible]निन्नुसुपेति। [illegible] ।।१२०

(२५८)

त्वात्तद्द्वितीयान्तम्। धात्वर्थानुपात्तभावनां प्रति हि फलांशः कर्मीभूतः। तथा च फलसामानाधिकरण्ये द्वितीया। अत एव सल्लू
विस्यादौ कारकपूर्वकत्वाद्घञ्। यत्र तु भावनां प्रति करणतया धात्वर्थत्वे विशेषणत्वेति तत्र तद्विशेषणानां तृतीयान्ततैव।
ज्योतिष्टोमेन यजेयेति यथा। एतच्च करणे यज इति सूत्रे वृत्तिपदमञ्जर्योः स्पष्टम्। न चैवं ज्योतिष्टोमेन भक्तिपूर्वं यजे
तेति न सिध्येदिति वाच्यम्। भावनाविशेषणत्वेन तदुपपत्तेः। तत्रापि संदर्शनप्रार्थनादिक्रियाव्याप्यमानत्वात् क्रियायाः कृ
त्रिमकर्मत्वविवक्षायां तद्विशेषणत्वात्तद्द्वितीया। अन्यथा तु प्रथमैवेति विवेकः। सामान्ये नपुंसकमिति च। अनियतं
लिंगविषयकम्। तेन त्र्यादिः प्रवृत्तिः प्रातरादिरिति पुंस्त्वमेव। विस्तरस्तु शब्दकौस्तुभे बोध्यः। पर्यायस्येवेति। कथं त
र्हि नृपतिसभामगमन्नेवपमाना इति कीचकवधे। गजपतिवत्तराजविशेषत्वादिति रक्षितः। विभाषा सेना। स्वनित्वा
मिति। कृष्णचतुर्दश्यां साकुः तस्यां किल केविच्छान उपवसन्तीति। तथा च तिर्यगधिकरणे शावरभाष्यम्। स्वनश्चतुर्द
श्यां उपवसन्तः श्याम इति॥ ॥इति नपुंसक॥ पस्य त्रि कस्येति। यद्यपि प्रादयो गताद्यर्थे प्रथमयेत्युक्तं तथाऽपि द्विती
याश्रितादिभिरिति वत्प्रथमान्तेन विस्तरसमस्यत इति नोक्तमित्यर्थः। वार्तिककृता प्रथमयेत्युक्त्वाऽपि सूत्रकृता
नोक्तमिति वा। अन्यस्य पदस्येति। पदेन हि प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयते। तथा च द्वितीयाद्यर्थे इति फलि

259

नेकं सुवं तं सुपास्त्व हेति व्याख्यातम्। न म। न्न० द्विपदबहुव्रीहि सिद्धप्रसंगात्। प्रादिभ्य इति। प्रादिभ्यः परं यद्धातु
जं तदंतस्य पदांतरेण सह समासो व्याख्येयः। सूत्रसिद्धार्थानुवादोऽयम्। वा चेति। इदं तु वा तान्निषेधे। पूर्वपदांतर्ग
तस्योत्तरपदस्य धातुजस्येति यावत् लोपो वाच्यः। एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थवृत्तितामाश्रित्य सुसज्जम्
स्त्रियाः पुंवत्तानुऊ भाव इति। यदि तु ऊङोऽन्योऽनङि। तिप युदासः स्यादित्त हिंटा वा घंतमेव गृह्येत ततः किमिति
चेत्० इजविडोऽपसंऊ नपदत्वा द्वात्यत्र लक्षणविया दृष्टं न्र एडविडः दरदोपसंख्यानमगधेत्यणा। दारदः। तयोः स्त्रिया
मत स्त्रेति लुक्। इडविडू दरत्। सा चासौ वृंदारिका च एडविड वृंदारिका। दारद वृंदारिकेति न सिद्ध्येत्। न चात्र स्त्रीप्र
त्ययः कस्तिदस्तीति भावः। निपातनादिति। एतच्च पूर्वेणापि योज्यम्। वैयधिकरण्ये न स्वरसतो बहुव्रीहिर्हेतुर्ल
भत्वात्। अलुगिति। इह भाषितपुंस्कमनतीति भाषितपुंस्कात्। अतस्ततः किं। एवं च समानाधिकरणे एव बहुव्री
हिः। अलुगर्थं च यत्नो मास्त्विति यद्यपि सुवचं तथापि भाष्यानुरोधेन क्लिष्टं व्याख्यातमिति सर्वधेयम्। षष्ठ्या
श्चेति। एवं च सत्येकेषां वितृष्ण्यन्तपाठेऽनाकरं हरदत्तादिग्रंथविरोधादिति भावः। तुल्ये इत्यादि। अयं भावः।
भाषितः पुमान् यस्मिन्नर्थे तद्भाषितपुंस्कं प्रवृत्तिनिमित्तम्। तदस्यास्तीति अर्शआद्यच्। तेन तुल्ये प्रवृत्तिनिमि
त्ते उक्तपुंस्कं शब्दरूपं लभ्यत इति। स्त्रीवाचकेति। एतेन स्त्रियाः इत्यस्य स्त्रीप्र[illegible]परतां वारयति। तथा हि सति इदं स्थं

०सु०

सूत्रार्थस्यात्। अनूङः स्त्रीप्रत्ययस्य पुंसीव पुंवत्। निवृत्तिरित्यर्थः। यथा मन्त्रमिदस्मिन्यामेजलमित्युक्ते अभाव एवा-
ऽतिदिश्यते तद्वत्। न च यमेव वाक्यार्थोऽस्तु। यथोक्तं भाष्ये उक्तपुंस्कात्परस्यानूङः स्त्रीप्रत्ययस्य पुंसीव पुंवत्स्यात्। पुंसि-
वन्नावा स्त्रीप्रत्यय इति लोपः प्रतीयेत। मैवम्। अस्यार्थस्याक्षरेष्वश्रवणेन कथाद्यं दूषितत्वात्। तथा हि। अस्मिन्पक्षे पट्वी भार्या-
ऽस्येत्युत्तरपदनिमित्ताया ङीषो निवृत्तेः अच्च परस्मिन्निति स्थानिवत्त्वे सति यणू स्यात्। किं च वतंड्या अपत्यं स्त्री वातंडी(
वतंडाच्चेति यञ्। तस्य लुक्स्त्रियामिति तस्य परे लुक्। शार्ङ्गरवादित्वात् ङीन्। वातंडी चासौ वृंदारिका च वातंडवृंदारिके-
तीष्यते। अत्र ङीनो निवृत्तावपि अर्थगतस्य स्त्रीत्वस्यानिवृत्तत्वात्लुक्स्त्रियामिति प्रवर्तेत। अपि चैवं एङ्विडवृंदारिकेत्या-
दि प्रागुक्तं न सिध्येत्। किं च। निवृत्तावपि अर्थगतस्य। गार्ग्यश्चासौ वृंदारिका च गर्गवृंदारिकेति ङीपि निवृत्तेऽपि यञ-
ञोश्चेति लुक्स्यात्। अस्त्रियामिति निषेधात्। तस्माद्यथाकारमेव व्याख्येयम्। लौकिकेति। यत्तु चित्राणां गवां मयमिति मी-
मांसकैर्विग्रहीतं न लौकिकालौकिकबहिर्भूतत्वादुपेक्ष्यमिति भावः। एतच्च मासजात इत्यत्र प्रपंचितम्। चित्रभा-
सितिः। अंतरंगानपीतिन्यायादित्यहूर्वस्य वर्णदीर्घो न प्रवर्तते। अन्यथा एकादेशस्य परादिवत्त्वेन सुपो लुकि चित्रगु-
रित्यत्र अकारो न लभ्यतेति भावः। नेहेति। दृष्टसिद्ध्यनुरोधेन पूर्वपदं क्वचिदाक्षिप्यते न तु सर्वत्र। तथा चोञ्सहो-
ऽभ सद्दातिसूत्रे हरदत्तेनेत्थमेवोक्तमिति भावः। आनङिति। तथा च समर्थसूत्रे भाष्ये होतृपोत्रे नेष्टोद्गातार इत्यत्र चतु-

॥राम॥
॥१३१॥

र्णं द्वंद्वे त्वतीयस्य स्त्रिया नतु दाहृतः । पूर्वपदाक्षेपे तु सनसिद्ध्येत । नह्यत्र नेष्टा पूर्वपदं नापि तदंतं स्त्रीहो तु रेव पूर्वपदत्वा
दिति भावः । अतएवेति । पूर्वपदानापेक्षोपादेव इत्यर्थः । चित्राजरदिति । नचेह द्वंद्वात्मकस्य पूर्वपदस्य पुंवद्भावोऽस्तु ॰ तथा
च टाबपि निवर्तेतेति वाच्यम् । द्वंद्वान्तर्गतयोः स्त्रीप्रत्ययप्रकृत्योः प्रत्येकं भाषितपुंस्कत्वेऽपि उदाहृतद्वंद्वस्यातथात्वात् । तथा
च पट्वीमृद्व्यौ भार्ये यस्येति विग्रहे पट्वीमृदुभार्य इत्युदाहरता भाष्यकारेण सर्वमिदं ध्वनितमिति भावः । द्वयोरपीति । पू
र्वपदांतर्गतं उत्तरपदमाश्रित्य प्रथमस्यापि पुंवद्भाव इति भावः । जरच्चित्रेति । पूर्वकाले इति सूत्रे जरच्छब्दस्य प्रथमानिर्दि
ष्टत्वादुपसर्जनत्वे सति लिंगविशिष्टपरिभाषया जरत्याः पूर्वनिपातः । कर्मधारयोत्तरेति । एतेनाद्दृष्टसद्दृशाग्रजमिति
प्रयोगो व्याख्यातः । इह प्रघट्टके बहूनां बहुव्रीहौ पूर्वपदे न पुंवदित्युक्त्या रूपे विशेष उक्तः । आनिर्जिधावपि विशेषांत
रं वक्ष्यति । यत्तु सा चानिलो द्भल वपुरित्युदाहृतं तत्र स्वरे विशेषो बोध्यः । तथाहि । बहुव्रीहिः पूर्वपदे नीलत्राद्व्यस्य प्रकृति
स्वरः । कर्मधारयपूर्वपदे तु कर्मधारयस्यान्तोदात्तः इति महान्भेदः । स्त्रीप्रमाणी यस्येति । करणार्थल्युडन्तत्वात्प्रमाण
शब्दो विशेष्यलिंगः । टित्वाङ्ङीप् । कथं तर्हि प्रमाणायां स्मृतावितिशावरभाष्यम् । भावे ल्युडन्तात्करोतीति णिचि
पचाद्यचि टाप् । यद्वा ॰ । प्रमाणमिवाचरतीति आचारक्विबन्तात्पचाद्यच् । भट्टास्तु । प्रमाणमयते याति मूलभूतां श्रु
तिं यतः । क्विबंतादयतेस्तस्मात्प्रमाणा स्मृतिरुच्यते ॥१॥ इत्यादिग्रंथेन अयतेः क्विबन्तस्येदं रूपमित्याहुः । तत्र ह्रस्वस्य

।।म०सु०

त्पितीति तु दुर्वरः। आगमशास्त्रमनित्यमिति तु अगतिकगतिः। इह तु गसन्नरमुत्क्रमे वा। यदृप्याद्युः। व्योर्लीति लोपोऽ
पि हि वेलोपौ दि प्रत्ययाश्रय इति। तदप्यापाततः। तत्र ऽस्य ग्रहणस्याप्रकृतत्वात्। गोधेरः पर्वते इत्याद्युदाहरणविरोधा
च्चेत्याहुस्तांतावत्। परिगणिता इत्तत्र सादीन् क्रमेणोदाहरति विकीषिति। यद्यपि वह्व्यादिषु ङीषो वैकल्पिकेऽपि कृत्वा तद
भावे बहुत्रेत्यादि सिद्ध्यति तथापि पाक्षिकानिष्टवारणायेदम्। यत्तु प्राचा ततस्त्ये त्युदाहृतं तत्सर्वनाम्नो वृत्तिमात्रे इत्यने
न गतार्थत्वादुपेक्षितम्। दर्शनीयतरेति। यत्तु प्राच्यापटुतरापटुतमेत्युदाहृतं तत्समादिकमिति ध्वनयन्नाह घरू
पेति। बहुर्थेति। प्रकारवचने थाल् तत्राह किं सर्वनामबहुभ्य इत्यधिकृतम्। ष्टकरितिष्टकृज्येष्ठाभ्यामिति लताति
लोरच्छंदसीति तिल्। अजथ्येति। अजाविभ्यां थ्यन्। शासीति। बह्वल्पार्थादित्ययमपि शास्त्रतसिलादिषु द्रष्टव्य
इत्यर्थः। त्वतलोरिति। आ च त्वादिति। जातिसंज्ञाव्यतिरिक्तं धर्ममात्रं गुण इति। एवं च क्रियाशब्दानामग्रहणेन न पुंवद्भा
व इति भावः। अत एव प्राचा नकोपधाया इति सूत्रे पाचिकात्। पाचिका त्वमित्युदाहृतं तत्सौत्रेण त्वतलोरिति व्या
ख्यातम्। तदेतत्सर्वं भाष्यादिविरोधादुपेक्ष्यम्। तथा हि एकतद्धिते चेति सूत्रे एकता एकत्वमित्युदाहृत्य पुंवद्भावे नसि
द्धमित्याशंक्य त्वगवानाहत्वमेतत्त्वतलोर्गुणवचनस्येति। अत्र कैयटः। एकशब्दस्य संख्या। ख्यावाचितायां गुण
वचनत्वेऽपि अत्र सहायवाचिनोऽतथात्वादिति भाव इति। एवं हि वदता हस्त्यादय एव गुणा इति ध्वनितम्। अत एव

।।राम।।
।।१३२।।

शहरतिशुक्लं त्वंशुक्लेतेति। अत एव स्वपसुदा हरतिकर्न्त्र्याइति। कर्त्री त्वमिति। तथावस्त्रियामिति सूत्रे व्यापिनि त्वात्प्रव
र्त्तेरितिकैयटेनप्रयुक्तम्। तथाउं योगादितिसूत्रेस्त्रियाः संविधात्री त्वादितितेनैवप्रयुक्तम्। प्रग्टह्यसंज्ञाप्रकरणेपिवि
भक्तेरेव संज्ञिनीत्वादित्युक्तम्। स्यादेतत्। निरीक्ष्यमेनेशरदः कृतार्थताम्। क्षीवतामुपगतास्वनुवेलं धृष्टतारहसित
र्त्तृषुताभिः। सानुमानरइतिदुःखशीलताम्। इत्यादिप्रयोगाणां का गतिरित्यत आह त्वारदइति। सामान्येइति। तथाव
पसुर्नौयत्तसंयोगइतिसूत्रे पत्न्याःफलशतियहीत्वादितिरत्तियंथमुपादायकर्त्त्रत्वमात्रंविवक्षितम्। ननुस्त्री
त्वमितिङीम्नकृतइतिहरदत्तोव्याख्यत्। परःसन्निकर्षइतिसूत्रेप्येकेकवर्णवर्त्तित्वाद्वाच इति भाष्येकैयटोऽप्येवं
माह। एतेन नेष्टं पुरोद्धारवतीत्वमासीदितिमाघो व्याख्यातः। रौहिणेयइति। रोहितशब्दाद्वर्णादनुदात्तादितिङीप्नकौ
रोपुंवद्भावेतु सति तयोर्निवृत्तौ रौहितेयस्यादितिभावः। गन्ध्यतइति। व्याख्यातमेवाचरारणम्। त्राज्ञुपर्यायादि
ति। अत्र तव्यत्वस्य पलइति निर्देशो लिंगम्। रिपौवैरिसपत्नारिद्विषद्द्वेषणदुर्हृदइत्यमरः। विवाहनिबंधमिति। त
ज्जन्यसंस्कारविशेषेरूढमित्यर्थः। सापत्यइति। भाषितपुंस्कत्वात्पुंवद्भावे कृते यस्येतिलोपः। एतच्चस्वस्ध्यातुरतौ
स्पष्टम्। यत्तुपारक्षणइति धोलोमाघवेनोक्तं भाव्रमर्णोऽपर्यत लक्षणेयक्तिसापत्न्यम्यैयम्। अभाषितपुंस्क
त्वात्पुंवद्भावो नेति। तत्तु द्वितीयंसपत्नीशब्दमाश्रित्यैवाविरोधः। यत्तु नित्यंसपत्न्यादिष्विसत्र न्यासकृतोक्तमसत्

४

म०सु०

दायोच्चारणं पुंवद्भावो नैतिवाधनार्थमिति। तन्नास्त्रमानस्य सभावार्थरूपत्वं च निपातनाश्रयणेन सत्तु दायोच्चार
णस्य तावतैवोपक्षयात्। अन्यथा संबुद्धित्वस्वादीनामपि बाधापत्तेः। किंच। तसिलादिष्विति सूत्रे भाष्यकारेण
सपत्नीशर्शाच्छ्रे वा द्यणिश्च स्यादिति पुंवद्भावेन सापत इति शपप्यशिवादिषु केवलयौगिकस्य ग्रहणं नेत्यत्रासे
न सापत इति प्रयोगो वारितः। निपातनस्य पुंवद्भावनिवृत्त्यर्थत्वे तु तत्सर्वं विरुध्येतेति दिक्। भावकोइति। तव
स्यायामेवाभत्वेऽपि पुंवद्भावो विधीयते। अन्यथा हि हलन्तेद कादेशे भत्वा पुंवद्भावे सन्निपातपरिभाषया कादेशो
नास्यान्मा थितिकवतो भाष्यकारेष्टेति। अनेन सूत्रवार्त्तिकयोरुक्तिसंभवोऽपि ध्वनितः। अन्नरंदष्टा शर्वस्याम[illegible]
त्वात्। निष्कर्षे तु वैयर्थ्यं स्पष्टमेवेति भावः। इष्टेरुदाहरणान्याह। सर्वमयइत्यादिना। मयडादीनां परिगणितत
सिलादिवहिर्भावात् न सूत्रेण गतार्थता। न कोपे। अत एव सर्वतः सर्वत्रेत्यादिनोदाहृतम्। सर्वकभार्या इति। नन
स्त्रियाः पुंवदिति सूत्रेण गतार्थता। न कोपविधाया इति निषेधात्। न चास्यापि तेन निषेधः शंक्यः। स्त्रियाः पुंवदि
त्यादि प्रकरणोक्तस्यैव तेन निषेधात्। अस्या इष्टेस्तु तस्मिन्प्रकरणे समाविष्टत्वा सर्वे प्रियइति। अग्रणी प्रिया
दि चेतिपर्युदासादप्राप्ते। शर्वस्येति। वृत्तिघटकानेकभागमध्ये किंचिदपेक्षया शर्वस्येत्यर्थः। अत एव तादिनरे स्या
दो परस्य न पुंवद्भावः। लिंगादिति। अन्यथा एषा ह्या एतयो[illegible]कात्पूर्वस्य आप विधीय[illegible]मित्वं निर्विषयं स्यादि

तिभावः॥ यत्तु शाचोक्तम्॰ सर्वनाम्नः समासे पूर्वे पुंवदिति। यच्च व्याचख्युः वार्त्तिकार्थमनुवदति सर्वनाम्न इत्यादिना। सर्वनाम
शब्देन संज्ञोपसर्जनभिन्ना एव गणपठिता उपलक्ष्यन्ते। तेन सर्वा नाम काचिदिति तस्याः पुत्रः सर्वापुत्रः॥ अतिसर्वापु
त्र इत्यत्र च नातिप्रसंग इति। तदेतत्सर्वमापातरमणीयम्। तथाहि। समासे इत्यनाकारम्। वृत्तिमात्रे इति व्याख्याने मयडन्तेऽ
व्याप्तं च। तथा च श्रीहर्षः प्रायुंक्त। निजा मयोध्यामिति पावनीमयं भवन्मयोध्यायति नावनीपतिरिति। किं च ब्राह्मणी
पूर्व इत्यादावतिव्याप्तिः। न च जातेश्चेति निषेधः॥ सोऽत्र प्राप्तिमात्रविषयकः स इति सिद्धान्तात्। रूपवती पूर्व इत्यादौ जा
तिवाचकत्वाभावेनातिव्याप्तिर्दुर्वारा। वार्त्तिकार्थमित्यपि स्थविपः कौवार्त्तिकग्रंथे एतदभावात्। न चोच्चविवदितव्य
म्॥ ठकुक्कुसोऽपि स्यस्य निरालंबनतापत्तेः॥ सर्वनामशब्देनेत्याद्यपि न साधु उक्तोदाहरणयोर्लक्षणां विनापि सुस्थ
त्वात्। दक्षिणपूर्वायै इत्यादावुपसर्जनयाऽव्याप्तेश्च। ननु मात्रग्रहणसामर्थ्यात्सर्वनामता उपलक्षणं न तु विशेष
णम्। तेन वृत्तेः प्राक्सर्वनाम्नः संप्रत्यसर्वनामत्वेऽपि पुंवद्भावो लक्ष्यत इत्याकरे स्थितम् मयाऽपि स्वग्रंथे उक्तमिति चे
त्। तर्हि किं उपसर्जनान्ना लक्ष्यन्ते इति त्वदुक्तमस्तु दुक्तैव पराहतं इत्यवधीयताम्। न चैवमिति सर्वापुत्रेऽतिव्याप्ति
रतिसर्वा शब्दकदाऽप्यसर्वनामत्वेन न जातिव्याप्तेरुक्तिसंभवाभावादित्यास्तां तावत्। स्वभिन्नामिति। याता

266

१० सु० त्मानमेवदर्शनीयांमन्यतेत्रस्त्रियाःपुंवदित्येवसिद्धम्।एकस्याएवरूपभेदेनकर्मत्वकर्तृत्वयोःस
त्वेऽपिवास्तवाभेदेनसामानाधिकरण्याविघातादितिभावः।मद्रिकायतइति।मद्रेषुभवामद्रिका।मद्र
वृज्योःकन्।पाकाभार्येति।अर्भकपृथुकपाकावयसीतिकप्रत्ययान्तोऽयंउणादिषुनिपातितः।नवि
हृततद्धितः।नापिवुः।वयसिप्रथमइतिङीपंबाधित्वाअजादित्वाट्टाप्।वृद्धिनिमित्तस्य।वृद्धिशब्देनेतिकि
म्।तावतीभार्याअस्यतावद्भार्यः।आसर्वनाम्नइत्याकारविधौवृद्धिशब्दोनास्ति।फलोपधाभार्येति।निमि
त्तशब्दःफलोपहितपरःस्वरूपयोग्यपरत्वेतुवैयाकरणभार्येतिनसिद्ध्येदितिभावः।अकेशेति।स
हनञ्विद्यमानपूर्वाच्चेतिङीषभावः।जातेश्च।जातेःपरइति।जातिवाचकात्परत्वमात्रमिहविवक्षि
तंनतुजातेरित्येवंविधानपर्यन्तमाग्रहः।भाष्येहास्तिकमित्युदाहरणेऽपिसंख्यानिकस्यनायंनि
षेधइत्युक्तेः।तेनहस्तिनीभार्यइत्यादौनान्तलक्षणस्यापिनिषेधःसिद्ध्यतीतिभावः।यःप्रत्ययइति
टाबादेःप्राचांतुविशिष्यङीषिवोपात्तः।तन्निर्मूलम्।शूद्राभार्यइत्यादावव्याप्तंचेतिभावः।ब्राह्म ॥राम॥
णीति।शार्ङ्गरवादित्वान्ङीन्।यत्तुप्राचाङीषंनपुंवदितिव्याख्यायब्राह्मणीभार्यइत्युदाहृतम्तत्पर ॥१३४॥

स्पर्विरोधादुपेक्ष्यम्। सौत्रस्यैवेति। व्याख्यानमेवात्र शरणम्। संख्यया। सामानाधिकरण्यस्यान्यपदा
र्थवृत्तेश्च विरहात्पूर्वेण प्राप्तौ वचनम्। उपदशा इति। उपशब्दः समीपसमीपिनि वर्त्तते। आद्ये ऽव्ययीभावः
।द्वितीये तु बहुव्रीहिरिति विवेकः। सूत्रेतीति लुप्तषष्ठीकमित्याह तिशब्दस्येति। अन्येषामपि दृश्यते। अ
त्र प्राचोक्तं दृशिग्रहणात्कर्मव्यतिहारबहुव्रीहौ पूर्वपदान्तस्य दीर्घत्वमात्वं चानवीति। तत्रात्वं चेत्यपा
णिनीयम्। अत एव मुष्टामुष्टि बाहाबाहवीति उदाहरणमप्यप्रामाणिकमेव। भाष्यादिविसंवादात्।
अत एव दृशिग्रहणस्य दृश्यो ऽर्थतात्पर्यं न कल्प्यमिति प्रामाणिकः पन्थाः। अर्वाचीनास्तु आत्वमाहुः। त
था च पंजिकायां त्रिलोचनदासेनोक्तम्। नाम्यन्तपूर्वपदस्यात्वं दृश्यत इति। एवं च प्राचां केविदिति वक्तुमुचि
तं पाणिनीयसूत्राशयमध्ये निक्षेपस्त्वनुचित एवेति दिक्। ओर्गुणः। तद्धिते किम्। पट्वी। गुणोक्तिरिति। य
२ते द्यपि ओरोदितिसूत्रे ऽपि भस्य तद्धिते इति संज्ञाद्वयपूर्वकत्वमस्त्येव तथापि विधेयसमर्पकं पदं यत्र संज्ञारू
पं स एव संज्ञापूर्वको विधिरिति भावः। यद्यपि ओदिति तपरस्तत्कालस्य संज्ञैव। तथापीह तकार उच्चारणार्थ
ः। ओरो इत्येव वास्तु। स्वं रूपं शब्दस्येति तु प्रत्याख्यातमिति भावः। तेन सहेति तुल्ययोगे। तुल्ययोगे किम्।

म०सु० सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ।। विद्यमानतावाची सहशब्दः । दशपुत्रेषु विद्यमानेष्वित्यर्थः । वो
पसर्जनस्य । उपसर्जनस्येति न सहस्य विशेषणम् । अव्यभिचारात् । किं तूत्तरपदेन सन्निधापितस्य
समासस्य । तच्चावयवद्वारकम् । उपसर्जनसर्वावयवकस्य समासस्य । बहुव्रीहेरिति यावत् । व्यधि
करणे षष्ठ्यौ । तदेतदाह बहुव्रीहेरवयवस्येति । तेनेह न । सहकृत्वा सहयुध्वा । प्रायिकमिति । स
पूर्वयाः प्रथमायाः । उदश्वरः सकर्मकादित्यादिनिर्देशादिति भावः । स्वरे विशेष इति । उविसतिचि
त इत्यन्तोदात्तत्वं स्यात् । असति तु पूर्वपदप्रकृतिस्वर इत्यर्थः । संख्याया इति । संख्यान्तस्य तत्पुरुषस्य
अन्तावयवो ऽजू वाच्य इत्यर्थः । एकविंशतिरित्यादौ तु न । अन्यत्राधिकलोपात् इति वार्त्तिककारोक्तेः
स्थूलादेति । यत्तु प्राचा प्रत्युदाहृतं स्थूलाक्षिरिक्षुरिति तन्न । अक्ष्णो ऽदर्शनात् इत्यच्प्रसंगात् । यत्तु
व्याचख्युः । समासांतविधेरनित्यत्वात् सन्न कृत इति तदापाततः । एवं हि षजापि तथैव न भविष्यतीति प्रत्यु
दाहरणस्यासंगतिप्रसंगात् । नेतुर्नक्षत्र इति । नक्षत्रे यो नेता तत्र वाच्ये तदन्ताद्बहुव्रीहेरित्यर्थः । नेतानाय ।। राम
कः । न तु स्थूलपूर्वादिति । स्थूलपूर्वाद्बहुव्रीहेरवयवेनेत्यर्थः । खुरखराभ्यामिति । नासिकाया इत्यपेक्ष्यते ।। १३५

केवलादेशवचनं प्रत्ययनिवृत्त्यर्थम्। उपसर्गाच्च। उपसर्गग्रहणं प्रादीनामुपलक्षणम्। नासिका
शब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात्। तदेतदाह प्रादेरिति। तदुक्तं त्वकेति। प्रणो नय प्रतनं व
स्यो अच्छ प्रनः पूषा इत्यादावव्याप्त्यतिव्याप्तिप्रसंगात्। शोभनं प्रातरस्येति। प्रातःशब्देन प्रातस्त
नं कर्म लक्ष्यते। अन्यथा प्रातःशब्दस्याधिकरणशक्तिप्रधानतया सामानाधिकरण्यासंभवात्
इत्याहुः। एणीपदादिषु त्रिषु निपातनात्सद्भावः। धर्मादनिच्केवलात्। इह बहुव्रीहिणा पूर्वपदमा
क्षिप्यते इत्यनुपदमेव वक्ष्यति। तच्च केवलादित्यनेन विशेष्यते इत्याह केवलादिति। यत्तु प्राचा के
वलादित्युभयविशेषणतया व्याख्यातम्। तत्सौत्रेण केवलादिति धर्मशब्दस्य पूर्वपदस्य च विशे
षणमित्युक्तम्। पाणिनीयमतदर्पणे च केवलादिति कैवल्यं धर्मप्राक्पदयोर्मतमित्युक्तं तत्सर्वमा
पाततः। धर्मपदविशेषणे प्रयोजनाभावात्। धर्मशब्दान्तं यत्रोत्तरपदं तद्व्यावृत्तिः फलमिति चेत्
न। तत्र धर्मपदस्य बहुव्रीह्यवयवीभूतपूर्वपदात्परत्वस्याभावात्। त्रिपदे बहुव्रीहाविति। इहस

270

म॰सु॰

र्वनामसंख्ययोरुपसंख्यानमितिस्वशब्दस्यपूर्वनिपातोनभवति। आहिताग्न्यादेराकृतिगणत्वा
दितिहरदत्तमाधवौ। आपेक्षिकमिति। नचतएवकेवलग्रहणंव्यर्थम्। पूर्वपदशब्दस्यसमास
प्रथमावयवेरूढत्वेनैवमध्यमपदव्यावृत्तिसंभवात्। इतिचेत्सत्यमेवम्। पूर्वपदापेक्षेपतास्येग्राह
कत्वेनैवकेवलपदस्यसार्थकत्वात्। कर्मधारयेति। यत्वाहुः। साध्योधर्मोऽस्येतिसाध्यधर्मासंदि
ग्धश्चासौसश्चेतिविग्रहः। सचसंदेहःसाध्यधर्मद्वारकएवपर्यवस्यतीति। सोऽयंवृथाक्लेशः। उक्त
रीत्यैवसाध्यस्यसाक्षात्संदिग्धत्वलाभात्। ननुकर्मधारयपूर्वपदत्वेऽनिष्ठदुर्लभः। केवलादि
त्यस्यसमासानात्मकादित्यर्थादितिचेत्। नैवम्। त्वदुत्प्रेक्षितार्थस्याकरग्रंथानारूढत्वात्। अ
स्मदुक्तार्थस्तुभ्वादिगणेधृञ्धारणेइतिधातौमाधवग्रंथेस्पष्टः। निवृत्तिधर्मोहिस्थानीभवतीतिप्रा
चांप्रयोगोऽप्यस्माकमेवानुकूलइतिदिक्। दन्तैवेति। तथाचदृश्यते। इमंजंभसुतंपिबेतिदक्षि ॥राम
णेर्मालुब्धोव्याधः। अतआहव्याधेनेति। कवयस्तुहिंसामात्रेप्रयुंजते। वालीहमाऌममालीगुण ॥१२६

एवा१

निघिरिपुणा॥ निर्मितोदक्षिणेमेरौतियथा॥ केशाकेशीति। तत्रतेनेतिबहुव्रीहिः। तत्रेग्रहणप्रहरणयुद्धा
नीवकर्मव्यतिहारोऽपीतिशब्दाल्लभ्यते। इच्प्रत्ययस्यतिष्ठद्गुप्रभृतिषुपाठात्तदन्तस्याव्ययीभावत्वम्।
नन्वेवंअव्ययीभावसंज्ञयाबहुव्रीहिसंज्ञायाबाधात्समासस्वरेणैवांतोदात्तत्वंसिद्धम्तत्किमिच्विशि
ष्टत्वेन। अत्राहुः। विशेषणार्थंतत्। तिष्ठद्गुप्रभृतिष्विकारमात्रपाठेहिसुगंधिरित्यादावतिव्याप्तिःस्यात्।य
द्वा॰दंडादंडीत्यादौसंज्ञयोःसमावेशएवउपजीव्यविरोधस्यान्याय्यत्वात्। एवंचस्वरार्थमपिचित्
त्वम्। द्विदंडीति। द्विदंडाशालस्यत्रतुइच्न॰ समुदायनिपातनस्यविषयविशेषपरिग्रहार्थत्वात्।
उभाहस्तीति। निपातनादेवायंविनापिप्रयोगः। उभयाहस्तीतिपक्षेऽप्यत्र। उभयाहस्त्याभरा। प्र
संभ्याम्। जानुशब्दस्यैकत्वेऽपिअर्थगतमुपपदनिबंधनंवाद्वित्वमाश्रित्यजानुनोरितिद्विवचननि
र्देशः। तत्फलंतुस्थानषष्ठीत्वस्फुटीकरणम्। जानुनइत्युक्तेकिंपचनीयंप्रत्ययाधिकाराज्ज्ञुरपिप्र
त्ययइतिसंभाव्येत। तदेतद्ध्वनयन्नाहज्ञुरादेशइति। छंदसितुस्वतंत्रोऽपिदृश्यते। उपज्ञुवाधोनमसास
देम। धनुषश्च। धनुरन्तस्येति। धनुरन्तादितिप्राचःप्रमादः। अथकथंस्वलावण्याशंसाधृतधनुष

म०सु० मन्हायत्तणवदिति पुष्पदन्तः। समासान्तविधेरनित्यत्वात्। अनित्यत्वे प्रमाणं तु अंभ्वादिगणे राजन्श
ब्दस्यपाठः। सहिप्रतेरंभ्वादयस्तत्पुरुषे इत्यन्तोदात्ततार्थः। राजाहः सखीति टचो नित्यत्वे तु किं तेनेति दि
क्। अविभागेनेति। एवं च गुणवाचिन एव ग्रहणं न तु द्रव्यवाचिन इति फलितोऽर्थः। द्रव्याणीति। अस्ति
च गंधशब्दो द्रव्यवचनः। वहति जलमियं पिनष्टि गंधानियमियमुद्ग्रथते स्रजो विविधा इति दर्शनात्।
गंधस्तु सौरभे न्यूनत्वे गंधके गर्वलेशयोः। स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति कोशाच्च। एतेन मम
हीभृतः पुष्पसुगंधिराददे भग्नवालसहकारसुगंधो इत्यादि व्याख्यातम्। एतच्च सर्वं हरदत्तग्रंथे
स्पष्टम्। केचित्तु तदेकान्तशब्देन स्वाभाविकत्वं विवक्षित्वा आगंतुकस्य नेत्याहुः। तथा च भट्टिः। आ
घ्रायिवान्गंधवहः सुगंध इति व्याख्यातं च जयमंगलायाम्। गंधस्येदुत्पूतिसुसुरभिभ्य इतीकारः समा
सान्तेन। गंधस्यैव तदेकान्तग्रहणमिति वचनात्सुगंध आपणिक इति यथेति। अत एव भग्नवालसहका
रसुगंधाविल्यादीनां प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तम्। अल्पाख्यायाम्। सूपस्येति। व्यधिकरणपदो ॥राम॥
बहुव्रीहिः। अत एव ज्ञापकात्। यद्वा० सूपो गंधोऽस्मिन्नित्येव विग्रहः। गंधशब्दस्य विशेषणत्वेऽपि अ ॥१२७।

87B

स्मादेवज्ञापकात्परनिपातः। इति विभ्वइति। एतेनाल्पपर्यायोऽयंगंधशब्दइति प्राचोग्रंथोव्याख्यातः।
अल्पाख्यायामितिसूत्रस्यापीत्थेवस्वरसः। यत्तुवदंतिगंधोऽत्रलक्षणयाऽल्पत्वंगमयतीतितच्चिंत्यम्।
शक्तिग्राहकस्योक्तत्वात्। पादस्य। यद्यप्ययंलोपःसमासांतोनस्यात्तदादेःपरस्येत्यादेःस्यात्। औपश्लेषिकः
कथंप्रसज्येत। समासांतापेक्षस्यशेषस्याश्रयणात्। अतआह। अयंसमासांतइति। कथंपुनरभावो
भावस्यावयवःस्यात्। तत्राह। स्थानिद्वारेणेति। औपचारिकमवयवत्वंवचनबलादितिभावः। वयसि
कथंतर्हिसादक्षरोषासुदतीससर्ज्जेति। नह्यत्रवयोगम्यते। अतःसुदतीतिभाव्यम्। अत्राहुः। शोभना
दन्ताअस्याःसमस्ताजाताःनतुन्यूनाइतिकथंविदितापिवयोगम्यतएवेति। उरःप्रभृतिभ्यःकप्। लक्ष्मी
रिति। नद्युतश्चेतिसिद्धेनियमार्थमिहपाठः। एकवचनांतस्यैवनित्योयथास्यात्। अन्यत्रशेषादिति
विकल्पएवतेनअकृशमकृशालक्ष्मीश्चेतसांशांसितंसइतिसिद्धम्। अकृशालक्ष्म्योयस्येतिविग्रहः।
यत्तुप्राचोक्तंनद्युतश्चेतिकप्। बहुलक्ष्मीकइतितत्प्रामादिकमितिव्याख्यातारः। नियमशास्त्रस्यनिषेध
मुखेनप्रवृत्तेरितिपक्षमाश्रित्यवायोज्यम्। अनर्थकेनापीति। कथंतर्हिसुपथीनगरीतिप्राचामुदाह
द्वित्वेबहुत्वेचनित्यःकप्पूनभवति
थः।

म०सु०

रणं स्वयमप्यनुसृतम्। कपोदुर्वारत्वात्। नच नपूर्जनादिति निषेधः। एवं प्राचीनानामेव स इति वक्ष्य
माणत्वात्। सत्यम्। समासान्तविधिरनित्य इति कथंचित्समाधेयः। सुपथीति युवोरनाकस्त्रीय भा
ष्याद्धेत्युक्तम्। तंत्रादिनेति। एतच्च प्रकृतसूत्रस्य वृत्त्यादिग्रंथानां बहुव्रीहिप्रकरणे कब्भावार्थं चेति
पुनः पुनः भाष्यकारोक्तेश्च पर्यालोचनया लभ्यते। यत्तु वदन्ति प्रतिपदोक्ताः समासान्ताः स्वविषये
बाधका भवंति। न किं अनुक्तसमासान्तपरेण शेषग्रहणेनेति। तन्न। ऋक्पूरित्यादीनां समासान्त
रैरचरितार्थतया परेण कपा बाधापत्तेः। बहुना डिरिति। उपसर्जनह्रस्वः। सप्तमी विशेषणे। कंठेकाल
इति। यदा कंठे किंचिदस्तीति निर्ज्ञाते काल इति विशेषणम् तदेदं बोध्यम्। अन्यदा तु सप्तमीग्रहणं वि
नापि विशेषणत्वादेव सिद्धम्। चित्रगुरिति। यद्यपीह उपसर्जनं पूर्वमिति सिद्धम्। तथाऽपि बहुव्रीहौ स
प्तमी त्युक्ते तत्र कोऽन्यन्यायेन उपसर्जनपूर्वत्वं बाध्येत। अतो विशेषणग्रहणम्। सर्वनामेति। कथं त
र्हि तः परो यस्मात्स तपर इति। कथं वजहत्स्वार्थवृत्तिरिति। इह हि जहत्स्वं पदं यं स जहत्स्वः सोऽर्थो यत्रे ॥राम
ति बहुव्रीहिगर्भो बहुव्रीहिः। तथा च स्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातेन भाव्यम्। सत्यम्। सूत्रभाष्या ॥१३

878

द्विग्वयोगाद्राजदन्तादित्वाद्वा सिद्धम्॥ सारंगजग्धीति॥ स्वांगपूर्वपदाद्वेति ङीष्॥ कथं वा स्मितमिति॥ न
पुंसके भावे क्त इत्यस्य न पूर्वनिपातः॥ निष्ठाशब्देन विहितस्यैव ग्रहणादित्याहुः॥ ॥इति बहुव्रीहिः॥ ॥
चार्थे द्वंद्वः॥ चार्था इति॥ च शब्दद्योत्या इत्यर्थः॥ असामर्थ्यादिति॥ एकार्थीभावाभावादित्यर्थः॥ तथाहि
॥ बहुव्रीहि घटकपदानां कर्मधारयन्तर्भावेणेव द्वंद्वघटकपदानां चार्थान्तर्भावेण एकार्थीभाव आवश्य
कः समर्थः पदविधिरिति परिभाषितत्वात्॥ चार्थे द्वंद्व इत्युक्तेऽप्यन च एकशक्तिविषयाणां समप्रधाना
नां परस्परं विहाय इतरान्वयः संभवति॥ येन समुच्चयान्वाचयौ स्याताम्॥ किंतु मिलितानामेवान्वयो वा
च्यः॥ मेलनं च समुदायः स च वर्तिपदार्थं प्रति विशेषणं विशेष्यं चेति द्वैधम्॥ तत्राद्ये इतरेतरयोगद्वंद्वः॥ द्वि
तीये समाहारद्वंद्वः॥ उभयथापि समुदायस्य द्वंद्वेनोक्तत्वाच्च शब्दाप्रयोगः॥ न चैवं नीलोत्पलमित्यादा
वपि च शब्दान्तर्भावेण विग्रहदर्शनादेकार्थीभावसत्वाच्च द्वंद्वो दुर्वार इति वाच्यम्॥ सामानाधिकर
ण्ये विशेषविहितया विशेषणं विशेष्येणेति तत्पुरुषसंज्ञया द्वंद्वसंज्ञाया बाधात्॥ यत्तु केचित्कर्मधा

२७६

रयसंज्ञयाबाधइत्याकुस्तत्तुच्छम्।तस्याःएकसंज्ञाधिकारबहिर्भूतत्वात्संज्ञानांवक्तृकृत्यप्रत्ययादिषु
समासावेशस्यसुप्रसिद्धत्वान्न्याय्यत्वाच्च।सामानाधिकरण्याविवक्षायांतुद्वंद्वे इष्टापत्तिरितिदिक्।
होतृपोत्रिति।अनयोरुत्तरपदपरत्वाभावादानङ्।अजाद्यदन्तम्।कथंतर्हिसरसौष्ठवौदार्यविशेष
शालिनीम्।लोचनाधरकृताहृतरागेतिभारविः।अत्राहुः।अनित्यमिदंप्रकरणम्सत्समुद्रात्राघः
इत्यादिनिर्देशात्।द्वंद्वश्चप्राणितूर्य०।समाहारएवेति।विपरीतस्तुनियमोनभवति।समाहारेप्रा
ण्यंगादीनामेवेति।तिष्यपुनर्वस्वोरितिसूत्रेबहुवचनग्रहणात्।तद्भिसमाहारैकवचनस्यमाभूदि
तिकृतंतिष्यपुनर्वस्वितियथा।उदगादिति।इत्यदाकठेषुकालापेषुचउदितेषुप्रतिष्ठितेषुचाऽऽवा
भ्यांतत्रगंतव्यमितिसंवादंकृत्वातंचविस्मृत्यकश्चिदास्तेतंप्रतीदमुच्यते।कठेनप्रोक्तमधीयतेकठाःवै
शंपायनांतेवासित्वाणिनिः।कठचरकाल्लुक्।अध्येतृणांस्तुप्रोक्ताल्लुक्।कलापिनोऽण्।सब्रह्मचारि
त्याद्युपसंख्यानाट्टिलोपः।अध्वर्युर्नाम्नोयजुर्वेदंलक्षयतितदाहयजुरिति।पदान्यधीतेपदकः।क्रमादि

न्योवुन्। एवंक्रमकः। पदान्यधीत्यक्रमोध्येतव्यइतिस्पष्टाप्रत्यासत्तिः। अध्ययनतः किम्। पितापुत्रौ।
अविप्रकृष्टेति किम्। याज्ञिकवैयाकरणौ। जातिरप्राणिनाम्। कथं तर्हि रंजितानुविविधास्तरुशैला
इति भारविः। तरुसहिताः शैला इति व्याख्येयम्। विशिष्टलिंगोनदी। सूत्रेचत्वारोपिशब्दा अवय
वावयविधर्मेणावयविनिर्बोध्याः। नदीग्रहणमदेशत्वात्। जनपदोपिदेशः। अतएवपर्वतानां। कै
लासश्चगंधमादनंच कैलासगंधमादने॥ चकारेणबाध्यतइति। चकारः पुनर्विधानार्थइतिभा
वः। पात्रादिति। येर्भुक्तेभस्मनाशुध्यतेकांस्यमित्यादिस्मृत्युक्तसंस्कारेणापिपात्रंनशुध्यतितेषा
मित्यर्थः। अनिरवसितानामिति निषेधबलादेवश्रूद्रशब्दोत्रैवर्णिकेतरपरः। नतुश्रूद्रत्वजातिपरः।
गवाश्वमिति। इरूपश्रुद्वंद्वे विभाषाप्राप्ता। दासीदासमिति। अपुमान्स्त्रियेत्येकशेषोबाध्यते। अत्र
वार्तिकम्। गवाश्वप्रभृतिषुयथोच्चारितंद्वंद्ववृत्तमिति। गणपाठेरूपमेषां विवक्षितं नतुपूर्वोत्तरपदनि
र्देशमात्रेतात्पर्यमित्यर्थः। तेनावडादेशाभावपक्षेनभवति। अपशवोवा अन्येगोअश्वेभ्यः पशवोगो
अश्वा॥ पशुग्रहणमिति। विकल्पार्थमित्यनुषज्यते। नपुंसकत्वार्थमिति। अयंभावः पशुद्वंद्व

२८

2̶7̶8̶

म०स्तु०

इत्येतस्मिन्द्वन्द्वेऽश्ववडवग्रहणंप्रतिपदविधानार्थम्।तेनाश्ववडवमित्येकवद्भावपक्षेपूर्ववदश्व
वडवावित्येतद्द्वा।धिलासनपुंसकमित्येतदेवभवति।तच्छब्देनहिएकवद्भावभाजंपरामृश्य
विधीयमानंनपुंसकत्वंएकवद्भाववदेवप्रतिपदविहितंभवतीति।अन्यथेति।ननुपूर्ववदश्व
वडवावित्यस्यनिरवकाशत्वेशंक्यम्।एकवद्भावविरुपक्षेसावकाशत्वात्।विप्रतिषिद्धंच।
भवत्येवेति।विप्रतिषिद्धग्रहणाभावेतुसनस्यात्।अद्रव्यवाचिनामेवेतिनियमादितिभावः।यत्तु
वृत्तिकृताकामक्रोधाविति प्रत्युदाहृतंतन्न।तत्रापिशीतोष्णंसुखदुःखमित्यादाविवपाक्षि
कस्यैकवद्भावस्यदुर्वारत्वात्।नियमार्थंहीदंसूत्रमितिस्थितम्।नवाद्रव्यवाचिनांचेद्भव
तितर्हिविप्रतिषिद्धानामेवेतितदाशयःकल्प्यः।शीतोष्णेउदकेइत्यत्रपाक्षिकैकवद्भावाप
त्तेःनचेष्टापत्तिः।अनधिकरणवाचीतिकिम्।शीतोष्णेउदकेइतिस्वोक्त्यासह विरोधापत्ते
रितिदिक्।दधिपयसीइति।व्यंजनवाचित्वाद्विकल्पःप्राप्तः।अधिकारणेतावत्त्वेच।समासार्थ ॥राम
स्याधिकरणमाश्रयोवर्त्तिपदार्थः।तस्यएतावत्त्वंपरिमाणनियमः।तस्मिन्गम्यमानेइतिव्याव ॥१५०

(२७९)

षेद्रव्यसंख्येति। अत्र व्याचख्युः समाहारद्वन्द्वस्यायं निषेधो न तु नियमः स्यात् तथा हि सति नियमे प्रतिषि
द्धेऽपि वार्थे द्वन्द्व इति समाहारे द्वन्द्वः स्यादिति। तन्नेति ध्वनयन् व्याचष्टे नियमो न स्यादिति। अयं भावः प्र
त्यापदे दशा दन्तोष्ठा इति वदुदाहृतमेव न सिद्ध्येत्। प्राण्यङ्गानां समाहार एवेत्यनेन इतरेतरयोगद्वन्द्व
स्य निषिद्धत्वात्। ननु समाहारद्वन्द्वोऽपि प्रकृतसूत्रेण निषिद्ध इति वक्तुं तर्हि वाक्यमेव स्यात्। द्वन्द्वद्वयस्या
पि निषेधात्। एवं च पंच खदिराः स्युः। अधिकरैषिष्टिशिख्याभिन्नाः युनामा धुकरीसद्वन्द्वो। त्यादीनामसा
धुत्वं स्यात्। किं च। समाहारद्वन्द्वनिषेधो व्यर्थः। न्यायबलेनैव तद्धारणात्। तथा हि। वृत्तिपदार्थस्य सं
ख्याविशेषबोधनीयसमाहारद्वन्द्वस्य प्राप्तिरेव नास्ति सविशेषणानां वृत्तिर्नेति वचनात्। सापेक्ष
त्वेनासामर्थ्याच्च। कथं तर्हि दशापंचपूल्य इति समाहारे द्विगुरिति चेत्। प्रधानभूते समाहारे दश
त्वसंख्यान्वयादिति गृहाण। न चोक्तन्यायेनेतरेतरयोगद्वन्द्वोऽपि न स्यादिति वाच्यम्। तत्र प्रधानस्य
सापेक्षत्वात्। उक्तं हि भाष्ये। भवति वै प्रधानस्य सापेक्षस्य वृत्तिरिति। न्याय्यं चैतत्। प्रधानस्यैकदेश
त्वाभावात्। सामान्याप्रयोगे इति लिंगादिति दिक्। विभाषा समीपे। यद्यपीह समाहारद्वन्द्वो वेति व्या°

म०स्तु०

ख्या। ने [illegible]न्दसतिस्तथापि प्रक्रममनुरुध्यान्नियमो वास्यादिति। उपदशमिति। एकवद्भावपक्षेऽव्य
यीभावस्यैवानुप्रयोगः। यदि तु बहुव्रीहिस्तदा उपदशस्य पाणिपादस्येति षष्ठी स्यात्। उपदशं पाणिपा
दस्येत्येव चेष्यते इत्याकरः। आनङ् ऋतो द्वंद्वे इहोत्तरपदेन पूर्वपदं नाक्षिप्यते तेन मध्यमस्याप्यानङ्। तदा
होतापोतानेष्टोद्गातार इति। एतच्च समर्थसूत्रे भाष्यकैयटयोः स्पष्टम्। ओजःसहोम्भस्तमसस्तृ
तीयाया इति सूत्रे पदसंज्ञायां तु स्पष्टतरम्। यत्तु प्रावोक्तं पूर्वपदस्यानङ् स्यादिति। यच्च व्याख्यातम्
द्वंद्वे पूर्वपदकार्य्यविशेषमाश्रित्यावतारितम्। यच्चाधिकृतेनोत्तरपदेन पूर्वपदमाक्षिप्यत इत्युक्तं तत्सर्व
माकरविरोधादुपेक्ष्यम्। प्रसिद्धसाहचर्यस्येति। द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभि
व्यक्तिष्विति सूत्रेऽभिव्यक्तिग्रहणेनात्यन्तसहचरितयुगले द्वंद्व इति निपातनादिति भावः। ईदग्नेः देव
ताद्वंद्व इति। काशिकानुरोधेनानुवर्तितम्। आश्वलायनस्तु ज्योतिर्लतयोरदेवताद्वंद्वेऽपि प्रयुंक्ते। त्रै
ग्नीषोमौ प्रणेष्यामीति। अग्निष्टदिति। अग्निःस्तूयते। स्मिन्नसौ क्रतुविशेषः। संपदादित्वादधिकरणे क्विप् ॥राम॥
पूरुत्वं माभूदिति। अकारे सति सकारस्य श्रवणं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः। विस ॥१४१॥

र्गमिति। तथा चक्वचिद्विकारो नेत्येवानुमेयं लक्ष्यानुरोधादिति भावः। मातरपितरौ। मातृशब्दस्य रङादेशो निपात्यते वाक्कृत्वं वमिति। बहूनां द्वंद्वे तु वाक्स्रक्त्वचम्। द्वंद्वगर्भे द्वंद्वे तु वाक्स्रजत्वचम्॥ ॥इति द्वंद्वः॥ ॥विरूपाणामपीति। एतच्च सूत्राक्षरैरेव सुलभम्। रूप्यते इति व्युत्पत्त्या सौत्रस्य रूपशब्दस्यार्थपरतया पिव्याख्यानात्। वृद्धो यूना। अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यैः परिभाषितस्येह ग्रहणम्। यूना कृत्रिमेण साहचर्यात्। तदाह गोत्रं शिष्यत इति। भागवित्तीति। भागवित्तिः। सौवीरत्वे वृद्धगोत्रार्थकादिञंतात् यूनि वृद्धाट्ठक् सौवीरेषु बहुलमिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते न तु युवत्वमात्रकृतवैरूप्यम्। गार्ग्यवात्स्यायनाविति। इह प्रकृत्यंशे वैरूप्यं न गोत्रादिकृतम्। पुंवद्भावप्रयुक्तं वैलक्षण्यं स्फुटीकर्तुं द्विवचनान्तेन विग्रहमाह। गार्ग्यायणाविति। पुमान् स्त्रिया। ननु हंसश्च वरटा चेत्यत्र प्रसंगः हंसत्वजातिसाम्यात्। शब्दवैलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वादिति चेन्नैवम्। सरूपग्रहणानुवृत्तेः। अनुवृत्तौ ज्ञापकं तु भ्रातृपुत्राविति सूत्रम्।

म॰सु॰

नन्वेवमापैनेगारेयंगौश्च्यायंतयोः सरूपोक्तोऽएतौगाविति नियमतो न स्यात् लक्षणविशेषाभावादिति चेन्
नैवम्। तदितरकृतविशेषविरहरूपे विशिष्टाभावे तात्पर्यात् स च स्त्रीविशेषाभावादस्त्येव। इंद्रेंद्राण्या
वित्यादौ तु नैक शेषः पुंयोगकृतविशेषात्। पितामात्रा। श्वशुरः श्वश्र्वा। नन्वेतत्सूत्रद्वयं व्यर्थम्। तथा
हि। यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेनास्मिन्विषये पितृशब्द एव मातरमपि वक्ति श्वशुरश
ब्दः श्वश्रूं तत्र शक्तिरेव निरूढलक्षणा वेत्यन्यदेतत् तत्र स्त्रीं विनापि सुलभम्। न च पूर्वसूत्रस
मूहवत् इदमपि सूत्रद्वयं द्वंद्वनिवृत्त्यर्थमिति वाच्यम्। द्वंद्वस्यापि पक्षे इष्टत्वादिति चेन्नैव
म्। पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोरुक्तविषये केवलयोः प्रयोगं वारयितुं सूत्रारंभात्।
अनभिधानमाश्रित्य प्रत्याख्यानं तु दुर्बलमिति दिक्। त्यदादीनि सर्वैः। सर्वैः किम्। प्रत्यासत्त्यादिभिरे
वसरूपोक्तौ प्राप्तावित्यर्थे मा भूत्। यत्परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादितः इति। आद्यादित्वा ॥य

त्तसिः। त्यदादीनां शेषे सह विवक्षितेषु यः पुमान् यश्च नपुंसकं तद्द्वारेण लिंगप्रतिपादकानि भवन्ति। अ ॥१६

र्थात्यदादीन्येव। अर्द्धं द्वेति। द्वंद्वादिविशेषणानां प्रागुक्तं न ॰ किंतु विशेष्यनिघ्नं तेवेति भावः। तद्धेति। पिप
ल्याः अर्द्धमित्यर्थः। सा चेति। अर्द्धपिप्पलीत्यर्थः। इह सर्वत्रेति। एतेन कृतद्वंद्वानामेकशेष इति त्रमं व्या
वर्त्तयति। ननु तथैव किं न स्यादिति चेत्। न। एकशेषस्यांतरंगत्वात्। न चेदं दुराग्रहमात्रम्। किंतु फले
पि विशेषः। स्त्रीत्याह। तेनेति। यस्तु द्वंद्वापवाद एकशेष इति केषांचिद्दुर्घोषस्तत्रापवादशब्दो बाध
कमात्रपरतया नेयः। इको गुणवृद्धी इति सूत्रे तद्घोषस्तदपवादो वेत्यत्र यथा॥ ॥इत्येकशेषः॥ ॥प्र
संगादाह पराथेर्थेति। अभिधानमिति करणे ल्युट्। अनेनैतद्दर्शयति। न केवलया लक्षणया ऽवयव
शक्त्या सर्वत्र निर्वाहः। किंतु विशिष्टार्थविषयकं शक्त्यन्तरमेवश्री कर्त्तव्यम्। अत एव वृत्तौ विशेषण
स्य पदार्थैकदेशत्वान्न विशेषणसंबंधः। द्वंद्वे च शब्दस्याप्रयोगः। बहुव्रीहौ यच्छब्दादेः। वाक्ये तु स
वमिदं भवत्येवेति वैलक्षण्यम्। किंच। अवयवशक्त्यैव निर्वाह इत्याग्रहे मीमांसकानां बहुव्रीहि हिरन्य
पदार्थे शक्तिर्न सिद्ध्येत्। योगरूढिभ्व तत्तद्वादीनां दुर्लभा स्यात्। लक्षणाशक्त्यनुसारिण्या निरूढल

स॰ स्तु॰ क्षणायै।वा निर्वाहात्म नचेष्टापत्तिः।अपसिद्धान्ता दिति भावः।अदि ग्रहइति।लौकिकविग्रहइत्यर्थः।अस्वपदेति।समस्यमानयावत्पदाघटितविग्रहइत्यर्थः।क दृप्तू॰।अजस्रमिति।इत्युक्तप्रत्ययाविधौकटप्रूअजस्रइतिसमस्तानुवादसामर्थ्यात्।धातुनासमासआक्षिप्यतेतत्रैववानिपात्यतेइतिहरदत्तादियंथेस्पष्टम्।तिङंतार्थक्तितेनसहेतियोगविभागेनाप्येतत्सुसाधम्॥ ॥इतिसर्वसमासशेषः॥ ॥ऋक्पू॰।तदन्तस्येति।तद्वाचकधूःशब्दांतस्येत्यर्थः।यदितुअक्षेसमासार्थेसतिनेतिव्याख्यायेततर्हिदृढधूरक्षइत्यत्रैवस्यात्।नाक्षधूरित्यत्र।यदिवाक्षेपूर्वपदेनेतिव्याख्यायततोऽक्षधूरित्यत्रैवस्यात्।नतुदृढधूरक्षइत्यत्र।तस्माद्व्याप्तिन्यायाद्व्योक्तमेवन्यायः।कृतसमासांतस्येति।येनविधिस्तदन्तस्येतिसूत्रेप्रयोजनंमहद्‌पस्वक्षटनत्तृणांदीर्घविधाविति वार्त्तिकेआपस्तेषं ति स्वापइतिभाष्यंचात्रप्रमाणामित्यवधेयम्।प्रतीपंसमीपमिति।प्रतिकूलाःसंगताश्चआपोऽस्मिन्निति विग्रहः। ॥राम॥ समापोदेवयजनमिति।देवाइज्यन्तेऽस्मिन्इतिव्युत्पत्त्याय[illegible]मिः।समापश[illegible]पुंस्त्वंलोकादित्या ॥१४३॥

ऊः। भाष्ये तु क्लीबमुदाह्रियते। अवर्णान्ता द्वेति। छन्नरिति सूत्रे परस्मात्। ईत्वमनवर्णादिति वक्तव्यम्। इह
माभूत् प्रापं परापमिति भाष्योक्तेः। गतिश्चेति सूत्रे यद्यपि धिनस्मावाबीत्वस्वांगादिस्वरणत्वेषु दोष इत्युप
क्रम्य अबीत्वम्। प्रेपं परेपमिति भाष्योक्तेश्चेति भावः। ऊदनोर्देशे। दीर्घोच्चारणं अवग्रहार्थम् इत्याक
रः। बह्वृचास्तु अनूपे गोमान् गोभिरित्यादौ अनूपश्च द्वंनावग्रह्णन्ति। अनुगता आपो ऽस्मिन्नित्यनूपो
देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः। प्रादिसमासः। बहुव्रीहिर्वा। कृष्ण
भूम इत्यादयो बहुव्रीहयः। पद्मनाभ इति। पद्माकारा नाभिर्यस्येति गौणेन पद्मशब्देन सामानाधि
करण्याद्बहुव्रीहिः। यद्वा गड्वादित्वात् सप्तम्याः परनिपातः। एतेनोर्णनाभो व्याख्यातः। तत्र ऊर्णापोः संज्ञा
छंदसोरिति ह्रस्वो विशेषः। गवाक्ष इति। गावः किरणाः। अचतुर०। निपात्यन्त इति। निपातनफलं तु समास
विशेषनियमः। टिलोपादिकं च। तदाह अद्याद्य इति। बहुव्रीह्यय इति। बहुव्रीह्यय एवेत्यर्थः। तेन नञ्तत्पुरु
षे अचत्वार इति भावः। त्रिचतुरा इति। त्रयश्चत्वारो वेति विग्रहः। संख्ययाव्ययेति बहुव्रीहिः। बहुव्रीहौ सं
ख्येयेति डचो ऽपवादो ऽच्। अक्षिभ्रुवमिति। प्राण्यंगत्वादेकवत्। ऊर्वष्ठीवमिति। सक्थि क्लीबे पुमानूरुरित्य

नरवेदिन इत्यर्थः॥४

त्येवर

म०सु०

मरः।जानूरूपर्वाष्ठीवदस्त्रियामितिवा।सरजःपंकजमिति।कथंतर्हिसरजसमपहायकेतकीनांप्रसवमि
त्यादि।सरजसमकरंदनिर्भरासुप्रसवविभूतिषुवीरुधांविरक्तइति।प्रमादएवायमित्याहुः।गोष्ठेश्वेति।एते
नसप्तमीतत्पुरुषएवेतिनियमंदर्शयति।षष्ठीतत्पुरुषेतुगोष्ठश्वेत्येव।ब्रह्मवर्चसमित्यादीषष्ठीतत्पुरुषौ
।वर्चोदीप्तिः।पलंमांसमर्हतीतिपल्यः।मांसभोजीतदीयंवर्चः।पल्यवर्चसम्।अवतमसमित्यादि।अवही
नंसंततंवतमइतिविग्रहः।अंधमिति।गाढमितिफलितोऽर्थः।अतएवध्वांतेगाढेंऽधतमसंक्षीणेऽवतमसं
तमः।विष्वकुसंतमसंइत्यमरः।श्वसो।वसुत्राब्दइति।एतेनअवसच्छब्दादीयसुनिअवसीयइतिव्या
ख्याणाआकरविरोधादुपेक्ष्याइतिध्वनयति।वसीयइति।तथाचश्रूयते।यःकामयेतवसीयान्स्यामि
तिवसुमान्यज्ञोवसीयान्भूयासमितिच।श्वसच्छब्दइति।यद्यप्ययमन्यत्रकालविशेषेवर्त्ततेतथा
पीहसमासेउत्तरपदार्थभूतांप्रशंसामाशिषोविषयमाह।आशीर्विषयतायाद्योतकोऽयमितिया
वत्।एतच्चवृत्तिरीत्योक्तम्।श्वसच्छब्दस्यहार्थएवनास्तीत्यपिसुवचम्।उत्तरपदार्थद्योतित्वंवास्तु ।।राम
उक्तंचपाणिनीयमतदर्पणे।अर्थंपरपदस्याहश्वःशब्दःकालवाच्यपि।अमियत्तेरस्वभावेनत ।।१४'

नेमौमंगलार्थकाविति॥ ॥अन्ववं॰रहः इत्यत्र प्रकारान्तरमुच्यते। अनुगतम्वसीनंरहः इति प्रा
दिसमासः। अनुगतं रहो ऽस्मिन्नित्यादि बहुव्रीहिर्वा तन्न मिवतत्रम्। पर णानधिगम्यं हिय द्रसो
वक्षितत्वत्वत्। तत्रं वत द्रहश्चेति तत्तत्र रहः संविदुः। न पूजनात्। इत्यतः प्रागिति। प्राग्बहुव्रीहिग्र
हणं कर्त्तव्यमिति वार्त्तिकोक्तेरिति भावः। प्रा वातु बहुव्रीहौ सक्थ्यक्ष्णोर निषेध इत्युक्तम्। तन्न्यू
नम्। इत्यादावित्यध्याहारेण वा योज्यम्। तेन सक्थ्नी अत्यूध्नीत्यादि सिद्धम्। नञस्तत्पुरुषात्। ने
ञ इति षष्ठी॥ ॥इति सकलसमाससाधारणाः समासान्ताः॥ ॥स्तोकान्मुक्त इति। समास
प्रयोजनं तु स्तोकान्मुक्तस्यापत्यं स्तौकान्मुक्तिः। स्तोकान्मुक्तायाः स्तौकान्मुक्तेयः। इहस्तो
कांतिकं कृच्छ्राणि क्तेनेति समासशास्त्रे पठिता एव स्तोकादयो गृह्यन्त इत्याशयेनाह एवमिति
। ओजःसहः। कथं तर्हि सततं नैश्चातमो वृतमन्यत इति भारविः। अत्र दुर्घटवृत्तिकृत्। नुम्। उत्तरप
दाधिकारे तदन्तग्रहणं नास्ति किंतु केवलपदाधिकार एवेति। तन्न। भाष्ये पदांगाधिकारस्य

दूरार्थ

289

मं०सु०

त्रइष्टकेषीकेत्यादेः प्रयोजनत्वेनोदाहरणात्। यदपिहरदत्तादयआहुः। उत्तरपदाक्षिप्तेनपूर्व
पदेनरुओजः प्रभृतयोविशेष्यन्तेपूर्वपदभूतेभ्यः। ओजःप्रभृतिभ्यइति। नवात्र तमः शब्दः पू
र्वपदम्। किंतर्हिसततनैशातमः शब्दः। यत्रतुतदन्तविधिरिष्यतेतत्रोपात्तेनाक्षिप्तंविशेष्यते। य
थाइष्टकेषीकादावितितदपिचिन्त्यम्। भाष्यवार्तिकविरोधात्। विशेषणविशेष्यभावव्यव
स्थाऽर्थमिवपदांगाधिकारइत्यादीनांप्रवृत्तिरितिकैयटवदेवस्वयमपिव्याख्यातत्वात्। भा
रविप्रयोगस्त्वित्थंसमाधेयः। वृतंवृतिः। नैशातमोवृतंइतिषष्ठीतत्पुरुषः। नपुंसकेभावेक्त
स्ययोगेशेषविवक्षायांषष्ठी। ततः सततंनैशातमोवृतंयस्मिन्निति बहुव्रीहिः। यद्वा० वृतुवर्त
नेघञर्थकविधानमितिभावेकः। शेषंप्राग्वत्पुरणइतिवक्तव्यमिति। इहआत्मनश्चेत्यं
शोऽपिवार्त्तिकांतर्गतः नतुसूत्रमितिकेचित्तन्नमंतितत्त्वादर्त्तव्यमिति भावः। तथाहिसतिउत्तर ॥राम॥
सूत्रेआत्मनइतिनलभ्येत० परस्यचेतितदुत्तरसूत्रंचवाऽर्थमिवस्यादितिस्पष्टमेवविवेकिना ॥१४५॥

म्। बकुव्रीहित्रिर्बोध्य इति। एकस्यापि वस्तुनो भेदं परिकल्प्य वृत्तिपदार्थत्वं [illegible] पदार्थत्वं च विवक्षणी
यमिति भावः। वैयाकरणाख्यायाम्। व्याकरणे भवा वैयाकरणी। अण् ऋगयनादिभ्य इत्यण्। सा चासा
वाख्या चेति कर्मधारयः। आत्मनेभाषा इति। यद्यपीयमाख्या ऽष्टाध्याय्यां न दृष्टा तथापि वैयाक
रणी भवत्येव। धातुसूत्रगणोणादिवाक्यात्मकं पंचप्रख्यानं व्याकरणमिति स्वीकारात्। अस्याश्च
धातुपाठे दृष्टत्वात्। ननु प्रकृतिविकृतिभावविरहात्तदर्थं धनाय स्थालीतिवत्समासो न स्यादत
आह योगविभागादिति। एतच्च वृत्तिन्यासावनुसृत्योक्तम्। अलुग्विधिसामर्थ्यादित्यपि हृस्तुव
वम्। हृद्द्युभ्यां च। हृदिस्पृगिति। हृदयं दिवं च स्पृशतीति विग्रहः। कर्मणोऽधिकरणत्वविवक्ष
या सप्तमी। भाष्ये तु कर्मण्येव सप्तमीत्युक्तम्। अलुग्विधिरेव ज्ञापक इति तदाशयः। अप्सव्य
इति। दिगादित्वाद्यत्। ओर्गुणः। वांतो यि। प्रावातु यत्स्थाने जराश्च पठित्वाऽप्सुज इत्युदाहृतम्।
तदाकरविरोधादुपेक्ष्यम्। अप्सुज इति तु हल[illegible]न्तादित्येव सिद्धम्। अप्सु[illegible]वेति। कारीय्यं अ

ञ्च अतिदेशस्य प्रकृतिवत्त्वेन त्यदादीनाम् ॥ प्रकृतिवत्त्वाभावे तु त्यदादीनामथ इति एकशेषो न भवति ॥ ४

म०सु० ज्यभागयोः ॥ अप्स्वग्ने सधिष्टव ॥ अप्सु मे सोमो अब्रवीत् इत्यनुवाक्ये तत्र वाप्सु ... ऽस्ति ॥ नन्वेवं प्रकृतिवदनुकरणं इत्यतिदेशेन अप्सु इति सोः प्रत्ययत्वात् तदन्तात्प्रथमाया अभावे तु बवदुर्लभः ॥ अतिदेशाप्रवृत्तौ तु सो र्लुकः प्राप्तिरेव नास्तीति चेत् ॥ सत्यम् ॥ अतिदेशस्य वैकल्पिकत्वान्नोक्तदोषद्वयमपि ॥ वैकल्पिकत्वे प्रमाणं तु यन्त्रदेतेभ्य इति सौत्रनिर्देश उक्तः ॥ प्रकृतवार्तिकमपि तथेति ध्येयम् ॥ यत्तु प्रावामतिष्विति पठित्वा अप्सुमतिरित्युदाहृतम् ॥ तद्भाष्यादौ न दृष्टम् ॥ यत्तु वदंति ॥ मतुष्विति पाठे सप्तम्यन्तान्मतुपः कथं संभव इति चिन्त्यमिति ॥ तदेव चिंत्यमिति ॥ पाठांतरस्यानाकरत्वात् ॥ मतुपः संभवस्योक्तत्वाच्च ॥ पश्यतो हर इति ॥ षष्ठी चानादर इति षष्ठी ॥ पश्यंतमनादृत्य हरतीत्यर्थात् ॥ देवानामिति ॥ मूर्खा हि देवानां प्रीतिं जनयंति ॥ देवपशुत्वात् ॥ शुनः शेपः इव शेपमस्य शुनःशेपः ॥ शेपशब्दो हि अकारांतोऽप्यस्ति ॥ शीङो नीपादित्वादौणादिकः पप्रत्ययः ॥ तथा च मंत्रः ॥ यस्यामुशंतः प्रहराम शेपमिति ॥ एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः ॥ ऋषिविशेषाणामेताः संज्ञाः ॥ बहुवृचब्राह्मणादौ प्रसिद्धाः ॥ मातुःपि

॥राम॥

॥१४॥

(२९१)

तुर्य्यामितिसूत्रेसमासइत्यनुवर्तितंतस्यफलमाह।समासेत्विति।इहपाक्षिकमपिषत्वंनइत्यर्थः॥ ॥
इत्यलुक्समासः॥ ॥घरूप०।चेलट्इतिपचादौटित्पठ्यतेङीबर्थम्।ब्राह्मणितरेति।तसिलादिष्वितिपुंव
द्भावस्तुन।जातेश्चेतिनिषेधात्।एतेनपुंवद्भावंबाधित्वापरत्वाद्ध्रस्वइतिव्याचक्षाणाःपरास्ताः।आमल
कीतरेति।आमलकीशब्दोवृक्षेनित्यस्त्रीलिंगः।एवंकुवलीशब्दः।नद्याः।पूर्वसूत्रेश्रुतादन्यःशेषःस
वद्विधेत्याह।घ्नतेति।निर्मूलमिति।यत्तुवृत्तिकृतोक्तम्।पुंवद्भावोऽत्रपक्षेवक्तव्यः।श्रेयस्तरा।विद्वत्त
रा।प्रकर्षयोगात्प्राक्स्त्रीत्वस्याविवक्षितत्वात्सिद्धमिति।अत्रेदंवक्तव्यम्।पुंवद्भावइत्यादिमुनित्रया
नुक्तत्वादप्रामाणिकम्।सूत्रकृताहितसिलादिष्वितिनित्यएवपुंवद्भावउक्तः।नतुपाक्षिकः।भाष्य
वार्तिकयोरपिनाधिकमुक्तम्।प्रमाणतामभ्युपेत्यापिब्रूमः।कथमिदंवचनंव्यज्यतेपुंवद्भावोयःप्रा
प्तःसोऽत्रपक्षेवक्तव्यइतिउतपुंवद्भावएववक्तव्यइति।आद्येपुंवद्भावनिषेधार्थमिदंवचनंस्यात्।त
थाचइतःप्रागेवत्वदुदाहृतानिश्रेयसीतमाविदुषीतराविदुषीतमेतिदीर्घङीपिशिष्टानिरूपाणिसि
द्धंतुनाम।प्रकर्षयोगादित्यादित्वदीयग्रंथस्त्वसंगतएवस्यात्।सहेत्युपसंख्यानंप्रत्याचष्टइतिन्यास

म॰स्तु॰

कृताः वतारितः। प्रत्याख्यानं च तस्य पुंवद्भाव फ[illegible] वेसत्येव स्यात्। न तु तत्रेति फलकत्वे। वस्तुत
स्तु तदपि न। ङ्याबूग्रहणं तदंतात्तद्धितविधानार्थं [illegible]त्वात्। स्वार्थद्रव्यलिंगाद्यनन्तरमेव प्रियकुत्स
न प्रकर्षादि विवक्षेति भाष्ये निर्णीतत्वाच्च। द्धितो[illegible]स्तु संभवेद्यदि तसिलादिमध्ये तरप्तमपौ न परिग
णय्यातां। तौ तु सर्वैरेव परिगणितौ। दर्शनीयतरा दर्शनीयतमेति वोदाहृतं। न च वृत्तिग्रंथविदु
षीतमेत्यादिदीघेपि न्यासः स्थितप्रदर्शनपरो न तु त्रेरूप्यपर इति वाच्यं। प्रकर्षयोगाद्दित्यादिग्रं
थत्रोषविरोधात्। तस्मादसंगत एवायं वृत्तिग्रंथ इति। एतच्च सर्वं इति मन्यत इति वदता हरदत्तेन ध्वनि
तं। न्यासकारस्य तु इदमुपसंख्यानमिति भ्रमः। तत्प्रत्याख्यानं युक्तमिति भ्रमश्चास्त्येवेति तत्तद्ग्रंथ
दर्शिनां स्पष्टमेव। एवं स्थिते पद्धेपुंवद्भावो वक्तव्य इति प्रक्रियाग्रंथः न्यायसिद्धमिदमित्यादितद्व्याख्या
तृग्रंथश्च वृत्तिन्यासोक्तार्थानुवादी मूलशैथिल्यादनादर्तव्य इति दिक्। पादस्य पद। पदेति सौत्रो वि
भक्तिलुक्। ऋचः शः। श इति शस्प्रत्ययस्येदमेकदेशानुकरण[illegible]दने घ इति। सादृश्यात्पुरुष ।।राम
स्येयं संज्ञा। उदपेषमिति। स्नेहने। पिष इति णमुल्। उदधिर्घटः इति। उदकं धीयते। [illegible]विग्रहः। ।।१४[illegible]

293

कर्मण्यधिकरणे चेति किप्रत्ययः। उदमंथ इति। द्रवद्रव्यसं[illegible]कृताः सक्तवो मंथः। तृतीयेति योगविभागात्स
मासः। ष्यङः संप्रसारणम्। इह तत्पुरुष इत्यनेन पूर्वपदमुत्तरपदं वा आक्षिप्यत इत्याशयेनाह पूर्वपदस्याति
उत्तरपदयोरिति व इहोत्तरपदेन पुत्रपती विशेष्येते न तु विपरीतम्। तेन कारीषगंध्यापुरम पुत्र इत्यत्र
नातिप्रसंगः। मालभारीति। मालां बिभर्तीति ताच्छील्ये णिनिः। के चित्तु हारिषिति पठंति। कारे सत्यागदस्य।
सत्यंकारः समयकरणम्। अशपथेऽपि परत्वाशुं बंबाधित्वा मुम्। अगदंकारो वैद्यः। अस्तुंकारोऽभ्युपग
मः। अस्त्विति तिङन्तप्रतिरूपकमव्ययम्। धेनुंभव्येति। भव्यगेयेति कर्त्तरि कृत्यः। धेनुश्चासौ भव्या चेति वि
ग्रहः। भविष्यंती धेनुरित्यर्थः। गौतमस्मृतौ तु स्नातकधर्मेषु अधेनुं धेनुभव्येति ब्रूयादिति प्रयुक्तं तत्रार्ष
त्वान्मुगागमो नेति तत घ्यारव्यायां मिता दत्ताराख्यायां हरदत्तः। लोकंपृणइति। पृणतिः पूरणकर्मेति हर
दत्तः। प्रीणन इति तु पठ्यत एव। अनभ्याशमित्य इति। अभ्याशं समीपं तद्भिरुद्रूमनभ्याशं दूरम्। एति स्तुशा
स्वित्यादिना इणः क्यप्। भ्राष्ट्रमिंध इति। कर्मण्य[illegible]ण्। घञंतेन वा षष्ठीसमासः। तिमिङ्गिल इति। गिलंगिल
तीति गिलगिलः। तिमीनां गिलगिल इति विग्रहे [illegible]त्वम्। नित्यमवेति। पूर्वविप्रतिषेधेनेति भावः। सज्या

२९५

म॰स्तु॰

तिरिति। समानं ज्योतिरस्येति बहुव्रीहिः। यस्मिन् ज्योतिषि आदित्यनक्षत्रे वा उपनिपतिते तं तदस्तमयपर्यन्त

मनुवर्त्तमानमाशौचं सज्योतिरित्युच्यते। पृषोदरादीनि यथोपदिष्टम्। निरुक्तादिशास्त्रसिद्धानां समास

पदानां गुणादयो बहुलमिति सिद्धिः। अनेन तु समासपदानामिति विवेक इति हरदत्तः। वस्तुतस्तु समास

विषयकमेवेदमिति न नियमः। हंससिंहशब्दयोरपि प्राचां कारिकायामुदाहृतत्वात्। हन्तेः पचाद्यच् विस

गागमः। हिंसेस्तु पचाद्यच् हिकारसकारयोः स्थानव्यत्ययः। यद्वित्तु मेवेदित्यादि श्लोकस्यापि प्रकृतसू

त्रोदाहरणतायां नाग्रहः। किंतु नैरुक्तव्युत्पत्तिरनेकधेत्येतावन्मात्रं तदाह हरदत्तोक्तिविवेकोपि निर्बाधए

वेति दिक्। आकृतिगणोऽयमिति। तेनान्यदपि सिद्ध्यति। यथा। लुंपेदवश्यमः कृत्ये तुं काममनसोरपि।

समो वा हिततयोर्मांसस्य पचि युड्घञोः॥ १॥ अन्त्यमिति शेषः। कृत्यप्रत्ययांते उत्तरपदे अवश्यमूशब्दस्या

न्त्यं मकारं तु मो लुंपेत्। तथा कामशब्दे मनःशब्दे च परे तुमूशब्दस्यांत्यम्। तुमिति षष्ठ्यर्थे प्रथमा। युड्घञ्प्रत्य

यपरो यः पच् धातुः तस्मिन् परे मांसस्यान्त्यमकारं लुंपेदित्यर्थः। अवश्यसेव्यः। गंतुकामः। गंतुमनाः। सहि ॥ २

तः। संहितः। सततः। संततः। मांस्पचनम्। मांस्पाकः। इह संयोगांतलोपाभावोऽपि निपातनाद्बोध्यः। छंद ॥

षिद्धमिति। अर्थविशेषे किम्। औष्ट्रपतम्। उष्ट्रपतिर्नाम पत्रं। तस्येदम्। पत्राद्ध्वर्युपरिषदश्चेत्यञ्। अथ कथं
दैतेय इति। अत्राहुः। दितिशब्दात्कृदिकारादक्तिन इति ङीषि कृते स्त्रीभ्यो ढक्। ण्यस्तु न। लिंगवि
शिष्टपरिभाषाया अनित्यत्वादिति। आदित्य इति। आदित्यशब्दात् ण्यप्रत्यये यस्येति लोपे हलो
यमां यमि लोप इति यलोपः। न चाल्लोपस्य स्थानिवद्भावः। न पदान्तेति यलोपे तन्निषेधात्। काशिकाया
मिति। हरदत्तमाधवादिग्रन्थेष्वेवम्। तथा च प्रयोगः। नाभ्नुयाम शातशो याम्याः पुनर्यातना इति
। भाष्ये तु नैतत् दृष्टम्। तत्र ष्यञा प्रयोगो निर्बाधः। बर्हिष इति। टिलोपवचनमव्ययानां भमात्रे
टिलोपस्यानित्यत्वज्ञापनार्थम्। तेनारातीय इत्यादि सिद्धम्। ण्य प्रकृते यञ्वचनमाद्युदात्त
त्वम्। प्राचो ग्रंथे तु यण्वेति पठ्यते तदनाकरम्। अश्वत्थाम इति। भाष्योदाहरणादेवेह तदन्तवि
धेः। अन्यथा बलवा विनः स्थामन् शब्दस्य केवलस्यापत्येन योगाभावे पिजातादिष्व
ः स्यात्। अश्वस्येव स्थाम यस्येति बहुव्रीहौ पृषोदरादित्वात्समस्यतः। गोरिति। न केवल
त्यय एव किंतु सर्वेषु प्राग्दीव्यतीयेषु। गव्यमिति। गवि भवं गोरिदं गौर्देवतास्येत्यादिरर्थः।

अनेन हैगव्यमिति जैमिनिसूत्रे विद्यमानं दूषयन्तो वार्त्तिककाराः समाहिताः। केचित्तु प्राग्दीव्यतो

येभ्योऽन्यत्रापत्यार्थे अयं यदिति व्याख्यानं। गतान्तरं हैगव्यः इत्याद्यप्याहुः। गोरूप्यमित्यादि। हेतु

मनुष्येभ्योऽन्यतरस्यां रूप्यः मयट् च इति [illegible] मयटौ॥ उत्सादिभ्योऽञ्। अणस्तदपवादानामि

त्यादीनां वापवादोऽयम्। इह पठ्यते वष्कयासो [illegible] समासे। पूर्वविार्यसंज्ञेयम्। वष्कयस्या

पत्यं वाष्कयः। असे किम्। गौवष्कयिः। असइत्येतदेव [illegible] तदन्तविधिं ज्ञापयति। तेन अधेन्वनां स

मूहः आधेनवमिति सिध्यति। धेनुशब्दस्येह पाठात्। न चैवं धैनुकं गोधेनुकं च न सिध्येदिति वा

च्यम्। धेनुरनञ इकमुत्पादयतीति विशेषवचनस्य भाष्ये आपिशलिमतत्वेनोदाहृतत्वात्। इक

मिति ठकमित्यर्थ इति कैयटः। अग्निकलिभ्यामिति। अयमर्थः। स्त्रकृतासास्य देवतेत्यधिका

रेऽग्नेर्ढगिति सूत्रितम्। दृष्टं सामेत्यधिकारे कलेर्ढगिति वार्त्तिककृता पूरितं तदिदं सूत्रद्वयम

पनीय प्राग्दीव्यत इति प्रकरणे अग्निकलिभ्यां ढगिति पाठ्यम्। तेन अनेरपत्यं [illegible] दृष्टं साम

आग्नेयं भवं अग्नेरागतं अग्नेः स्वं वा आग्नेयं कालेयमिति सिद्धम्। एते [illegible] मांसकयं [illegible]

(297)

यस्मयादित्वेनापि निर्वाह उक्तः। अपरस्परः क्रियासातत्य इति सूत्रे सातत्य इति। निर्देशो
कदेशानुमितिद्वारा पूर्वाचार्यपठितो यं श्लोको ज्ञापित इत्यप्याहुः। नहिवृतीति। एषु परेष्विति। उत्तर
रेष्विति बाध्यम्। उपनह्यते इत्युपानत्। संपदादित्वात्कर्मणि क्विप्। निवर्त्तते इति नीवृत्। प्रवर्षतीति
प्रावृट्। मर्माणि विध्यतीति मर्मावित्। रुच दीप्तौ। निरोचते इति नीरुक्। ऋतिं सहते ऋतीषट्। सहेः
पृतनर्त्ताभ्यां चेत्यत्र सहेरिति योगविभागादनुक्तसमुच्चयाद्वा सस्य षत्वमिति न्यासकारः। पूर्व
पदादिति षत्वमिति हरदत्तः। परितनोतीति परीतत्। गमः क्वावित्यत्र गमादीनामिष्यत इति वचना
त्तनोतेर्नलोपः। यत्तु वेदभाष्ये ऋतेन मित्रावरुणावृतावृधाविति मंत्रस्य व्याख्यायामुक्तं ऋतस्य
वर्द्धयितारावित्यर्थे ऽन्तर्भावितण्यर्थाद्वृधेः क्विप्। नहिवृतीत्यादिना पूर्वपदस्य दीर्घ इति तच्चिंत्यम्।
प्रकृतसूत्रे वृधेरनुपात्तत्वात्तस्मादन्येषामपीति दीर्घस्तत्र बोध्यः। वनं पुरगा। व्यत्ययेन षष्ठ्याः स्था
ने प्रथमेत्याहुः। वनशब्दस्येति। विध्यर्थ इति। असंज्ञात्वेन पूर्वपदात्संज्ञायामित्यस्याप्राप्तेरिति भावः।
अत एवाह निपातनादिति। यत्तु व्याचष्टे हलदन्तादिति सप्तम्या अलुगिति तन्नेति भावः। प्रथमेति। सप्त
म्यर्थस्य प्रातिपदिकार्थेऽन्तर्भावादिति भावः। निषाद इति। निषीदत्यस्मिन्पापमिति निषादः पुलिंदो

सु०

कथं तर्हि प्रतीहारो दौवारिकः। अत्राहुः। प्रतीहारो द्वारम्।
मनुष्यजातिः। हलश्चेत्यधिकरणे घञ्। कथं तर्हि प्रतीहारो दौवारिकः। अत्राहुः। प्रतीहारो द्वारम्।
तास्थ्यात्ताच्छब्द्यमिति। एकश्चितीकइति। त्रैशिकः। कपू। शुनो दन्तेत्यादि। अत्र केचिद् दंष्ट्रेति ह्रस्वांतं प
ठित्वा श्वादंष्ट्र इति बहुव्रीहावेवायं दीर्घ इत्याहुः। अन्ये तु दीर्घान्तमेव पठन्ति तत्पुरुषस्याप्युदाह
रणतामाहुः। इत्तृषा दिति। केचित्तु कान्ते पूर्वे तिल तालव्यमध्यं पठन्ति तत्सामादिकमिति भावः। शिरी
षवणमिति। ननु यस्य फलमेव न पुष्पं स वनस्पतिः। वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पति
रित्यमरकोशात्। स च उदुंबरादिः। शिरीषस्तु न तथा। तस्य फलपुष्पोभयसत्वात्। कथमिह ष
त्वमिति चेत्। सत्यम्। इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते। अत्र च लिंगं लुपि युक्तवदिति स्त्रीत्व
त्वमिति चेत्। सत्यम्। इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते। अत्र च लिंगं लुपि युक्तवदिति
त्र व्यक्ति वचने इति किं शिरीषाणामदूरभवो ग्रामः शिरीषाः। तस्य वनं शिरीषवनम्। वनस्पतित्व
मतिदिश्यते तत्र णत्वं स्यादिति भाष्यकारोक्तिः। इरिकादिभ्य इति। ओषधित्वात्प्राप्तिः। क्षीर
पाणा उशीनरा इति। उशीनरराष्ट्रे देशविशेषे वा वीतः शासिषोपवारिकः। गिरिनद्यादीनामिति। व
त्वमेतत्। संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेयम्। माषवादिणाविति। बकुल
कव्यमेतत्। संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेयम्। माषवादिणाविति। बकुल
मा भीरुत्येष इति णि। निः। व्रीहिवापाणीति। कर्मण्यण्। उत्तरपदं यद्भिरिति। अन्न व्याख्यानमेवशरण

॥राम॥
॥१५॥

म्॥ग्रं वस्तुनुम्ग्रहणामिहज्ञापकमित्याकुस्तद्दर्शयति॥अतएवेति॥ज्ञापकं॥ि॥किल॥मिति॥च्छगयति॥
किंचेति॥परिपक्कानीति॥अत्रकुमतिवेतिनित्यंणत्वंप्राप्तम्॥हरिमाणीति॥मनेणत्वंप्राप्नोति॥चिकिपूप्राकुसुबुस
तेःसमासात्नकारान्तमुत्तरपदम्॥नांतत्वान्ङीम्णत्वम्॥चतुरंगयोगेनेति॥चत्वार्यंगान्यस्य॥तेनयोगइ
तिविग्रहः॥अतद्धितइति॥व्यवधायकस्यपदस्यतद्धितश्चेत्यपरोनभवतितदानिषेधइत्यर्थः॥आङ्गो
मयेणेति॥अत्रगोशब्दःपदम्॥पारस्करइति॥पारंकरोतीतिविग्रहेकृञोहेतुताच्छील्येटिटः॥किष्किंध
ति॥किंकिंदधातीतिविग्रहेआतोऽनुपसर्गेकः॥पूर्वस्यकिमोमलोपःसुट्षत्वंचनिपात्यते॥रूढिशब्द
श्चैतेकथंचिद्व्युत्पाद्याः॥तद्वृहतोरितिगणसूत्रम्॥तदिति॥तलोपश्चेत्यत्रेतिभावः॥वर्चेनेत्युपल
क्षणम्॥सलोऽस्त्रीतिलोपस्यापिसुवचत्वात्॥दकारतकाराविति॥तद्वृहद्भ्यांयथासंख्यंबोध्यम्॥प्रा
यस्येति॥प्रायःपापंविनिर्दिष्टंचित्तंतस्यविशोधनमितिस्मरन्ति॥आकृतिगणो॥ऽयमिति॥तेनपरःशताइ
त्यादिसिद्धम्॥अधिश्रयंतीर्जनताःपरःशताइतिमाघः॥शतात्पराइतिविग्रहेपंचमीतियोगविभागा
त्समासः॥राजदंतादित्वात्परनिपातः॥सर्वनाम्नोवृत्तिमात्रेइतिपुंवद्भावः॥लोकाश्रयत्वाल्लिंगस्य
विशेष्यनिघ्नता॥पारस्करादित्वात्सुडितिदिक्॥ ॥इतिसमासाश्रयाविधयः॥ ॥समर्थानाम्॥

४०८

मु·

ननु प्रकृतसूत्रे एकार्थीभावरूपं सामर्थ्यं गृहीतं नोचितम् । समर्थः पदविधिरिति परिभाषया गतार्थत्वात् । घ
का कन्नेषिति । अलुग्विधिना द्विरस्तु वंता त्वा । द्वितीयस्तिति । तथा च पदविधि लिंस्य एमेव । अत एवाह सामर्थ्यमि
ति । कृतेत्यादि । अस्य फलं तु तस्यापत्यमिति सूत्रे मूले एव स्फुटीभविष्यति । इह समर्था प्रथमा दितिपुत्रं व
तुं । महोत्सर्गेणाह । प्राग्दीव्यतोण् । अश्वपत्यादिभ्यश्च । प्राग्दीव्यतीयेष्विति । दीव्यतः प्राक् प्राग्दीव्यत । अ
पपरिबहिरंचवः पंचम्या । अव्ययीभाव इत्याह । प्राग्दीव्यमिति तु उचितं इत्य इति टच् प्रत्ययः । ततो भवार्थे
ठक् । दृत्तुन० अमेहत्यादि परिगणनात् । अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचारा इति
परिगणनात् । अचामादेरिति । निर्द्धारणे षष्ठी । तेनार्थसिद्धमाह अच इति । अचो ञ्णिति सूत्रादच इत्यस्या
नुवृत्तिरपीहस्तु वचा । प्रमादि क्रमेवेति । यद्यपि चातुर्वर्ण्यादेराकृतिगणत्वष्य [illegible] ञ एतत्सूपपादम्
[illegible] पिह रदनयं यथानुरोधादेवमुक्तम् । दित्यदित्या० पूर्वं पति शब्दस्योत्तरपदशब्देन बहुव्रीहिं कृत्वा दित्या
[illegible] द्वंद्वः कार्य इति व्याचष्टे दित्यादिभ्यः प्रसूत्तपदा ज्ञेति । पत्यंतादिति तु नोक्तम् । बहुचु पूर्वादपि प्रसंगो
[illegible] देत्य इति । ननु दितेर्ण्य प्रत्ययो देवता द्यर्थे सावकाशः । अपत्ये तु परत्वादितरौ स्यातामि [illegible] त्र इतिक
[illegible] ह । सत्समम् । पद्यते ऽत्र पूर्वविप्रतिषेधः । ण्यादयोऽर्थविशेषलक्षणादणपवादात् । पूर्वविप्रति

उपचारो सर्गः ६

ती०

॥ रा॥

३०७

...श्वरापत्यस्य नलकूबरस्य तपसः फलं स्तनौ यस्याः यद्वा अथ तपः कारितामपि जितेऽद्भुरेव। कदल्यपि ध
निकापत्यानां तपसा फलानि यस्याः। उत्तमं वस्तु तपसा विना न प्राप्यते धनिकापत्यैरेव प्राप्यते यत इत्य
र्थः। विशालत्वेन कदली तयारूर्वो रूपमानयोग्या न भवति। ५ ऊरुयुगलक्षणेन कदशनेवरं भारया
देवांगना कदल्यपि तया जितेति भावः। द्वयेन द्वयं जितं युक्तं॥ श्लेषानुप्रासव्यतिरेकाः॥ परिणाहो विशा
लतेत्यमरः। रंभा कदल्यप्सरसोरिति विश्वः। नलोके ति निषधात्तरुमित्यादौ द्वितीया। सुंदरीति गो
रादित्वान्ङीष्॥ ३७॥ ॥जलजे रविसेवयेव येयं पदमेतत्सदृतामवापतुः॥ ध्रुवमेत्य रुतः सहंसकी
कुरुतस्तौ विधिपत्र दंपती॥ ३८॥ ॥य कमले सूर्यपरिचर्ययेव भैमीचरणत्वलक्षणं पदमुत्तमं स्था
नं मयपत्यव्याजं प्रापतुरिव ते कर्मभूते जलजे ब्रह्मवाहनं पादेजायापती हंसस्त्रीपुंसौ कर्तृभूतावे
त्य त्यागत्य रुतः। शब्दाद हंससहिते हंससहिते कुतः। कर्तृभूते तेपद्ये कर्मभूते तो विधिहंसस्त्रीपुंसो
प्राप्य ससहंसकौ कुरुतो यो दात्मानमितिवा। हंसस्वतुल्याद्विजितादेतेसहंसे इत्यनुमीयत इत्य
र्थः। रुतः शब्दं कुरुतः स्त्रयासहंसे कुरुत इतिवा। अथ हंसकः पादकटकः तत्सहिते नूपुरयुते कु
रुतः। हंसमिथुनत्वेन नूपुरत्वेन परिणतमित्यर्थः। जलजे इत्यनेन सदा जलवासः सूच्यते। रविसेवयार

302

[illegible]तथाधामि[illegible]

गोत्रे पा[illegible]यस्[illegible]पार्थंव मित्यादि सर्वेनेत्र[illegible] ॥ ॥स्त्री[illegible]स न्याम्[illegible]गित[illegible]वह

पूर्वोऽस्तु मे॥ ॥इत्यपत्यादिविकारान्तार्थसाधार[illegible]

ती। स्त्रैण इति। स्त्रीषु भवः स्त्रीभिश्चरति स्त्रीभ्यो हित[illegible]नादावत्यर्थ इति। सामान्यापेक्षं ज्ञापकमिति

भावः। अत एवोदाहरति स्त्रीवदिति। कथं तर्हि त्वतलोः स्त्रीत्वं स्त्रीता पुंस्त्वं पुंस्तेति। आवत्वादिति[illegible]

रादिति वक्ष्यते। द्विगोर्लुगनपत्ये। द्विगोरिति षष्ठी। तदर्थश्च हेतुत्वं। तद्वदर्थंतरसामत्वादेरिवभावि

नापि बुध्याध्यवसायात्। तदेतदाह द्विगोर्निमित्तमिति। अजादिरिति। एतच्चोत्तरसूत्रादन्वीत्यस्या

पकर्षेण लभ्यते। वाग्रहणमनुवर्त्य व्यवस्थितविभाषा[illegible]यणा न वा। गोत्रे लुगचि। गोत्रे किम्। यस्का

दिभ्यो गोत्र इति प्रकरणेन यस्य लुक् प्राप्तः तस्यैवा[illegible]धा स्यात्। नेह। कुवलस्येदं कौवलं वादरम्।

यूनि लुक्। इह द्विगोर्लुगनपत्ये। चिं यूनि गोत्रे नेत्य[illegible]च्यतां। तथा च लुग्ग्रहणं शक्यमकर्तुम्।

अजादाविति किम्। ग्लौचुकायनरूप्यम्। [illegible]त्रीये किम्। तस्मै हितं ग्लौचुकायनीयम्। ननु उप

[illegible]इति स्थितेऽत्रो गुणं बाधित्वा[illegible]ति वृ[illegible]भाव्यं। गुणस्य तु पिवव्यामत्यादि[illegible]

[illegible]कारकस्य[illegible]ता[illegible]

॥ इदं पुस्तकं नीलकंठस्य ॥
॥ ध्ययनी देवगुरुस ॥

305

[OrderDescription]
,CREATED=07.10.20 12:47
,TRANSFERRED=2020/10/07 at 14:24:10
,PAGES=304
,TYPE=STD
,NAME=S0003929
,Book Name=M-1292-PROTH MANORMA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,